रपं÷ ॥ ८४ ॥ यदिमाः ॥ यदिमाव्वाजयंन्नुहमोषंधीर्हस्तंऽआदुधे ॥
आत्त्कमायक्ष्मंस्यनश्यतिपुराजीवगृभोंयथा ॥ ८५ ॥ यस्यौषधीः ।
प्प्रसप्पुंथाङ्गंमङ्गम्परुंष्षपरुः ॥ ततोयक्ष्मंव्विबाधद्ध्वऽउग्ग्रोमंद्ध्यमुशी
रिंव॥८६॥साकंठ्यंक्ष्म ॥ साकंठ्यंक्ष्मुप्रपंतुचाषेणकिकिदीविनां ॥सु
कंव्वातंस्युद्ध्राज्ज्यांसाकन्नंश्यनिहाकया॥८७॥शतं६० ०॥अन्न्यावंः॥
अन्न्यावोंऽअन्न्यामंवत्त्वन्न्यान्न्यस्याऽउपांवत ॥ ताःसर्व्वाःसंव्विदानाऽ
इदम्मेप्प्रावंताव्वचंः॥ ८८ ॥ याःफलिनीः । याःफलिनीठ्याऽअंफलाऽ
अंपुष्पायाश्चंपुष्प्पिणीः ॥ बृहस्प्पतिंप्प्रसूतास्त्तानोंमुञ्चन्त्वꣳहंसः

॥ ८९ ॥ मुञ्चन्तुंमा । शपुत्थ्याुदथोँव्वरुण्ण्याुदुत ॥ अथोयुमस्यु
पड्ड्वींशात्त्सर्व्वँस्म्माद्देवकिल्ब्बिषात् ॥ ९० ॥ अवुपतन्तीरवदन् ॥
अवुपतंन्तीरवदन्दिवऽओषधयुस्प्परिं ॥ यज्जीवमुश्नवांमहैनसारिं
ष्यातिपूरुंषः ॥ ९१ ॥ याऽओषंधीः ॥ याऽओषंधीःसोमंराज्ञी
र्ब्बह्वीःशुतविंचक्षणाः ॥ तासांमसित्त्वमुंत्तमारङ्कामांयुशꣳहृदे ॥९२॥
याऽओषंधीः ॥ याऽओषधुीःसोमंराज्ञीर्व्विष्ठिताःपृथिवीमनुं ॥ बृहु
स्प्पतिंप्प्रसूताऽअुस्यैसन्दंत्तव्वीर्य्यम् ॥ ९३ ॥ याश्च्च ॥ याश्च्चेदमु
पशृण्ण्वन्तियाश्च्चंदूरम्परांगताः ॥ सर्व्वाः सुङ्गत्त्यंव्वीरुधोस्यैसन्दंत्त

वीर्य्यम् ॥ ९४ ॥ मावः ॥ मावोरिषत्त्खनितायस्मैचाहङ्खनामिवः
द्विपाच्चतुष्प्पादस्म्माकꣳसर्व्वमस्त्वनातुरम् ॥ ९५ ॥ ओषधयꣳसम् ॥
ओषधयꣳसम्वदन्तसोमेनसहराज्ञा ॥ यस्म्मैकृणोतिब्राह्मणस्तꣳ
राजन्पारयामसि ॥ ९६ ॥ नाशयित्रीबलासस्यार्शसऽउपचिता
मसि ॥ अथोशतस्ययक्ष्माणाम्पाकारोरसिनाशनी ॥ ९७ ॥ त्वा
ङ्गन्धर्व्वाः ॥ त्वाङ्गन्धर्व्वाऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्प्पतिः ॥ त्वा
मोषधेसोमोराजाविद्वान्यक्ष्मादमुच्यत ॥ ९८ ॥ सहस्वमे ॥
सहस्वमेऽअरातीःसहस्वपृतनायतः ॥ सहस्वसर्व्वम्पाप्मानꣳसह

मानास्योषधे ॥ ९९ ॥ दी॒र्ग्घायु॑स्त्ते ॥ दी॒र्ग्घायु॑स्त्त॒ऽओष॑धे खनि॒
ताय॒स्मै॑ च त्त्वा॒ खना॑म्म्य॒हम् ॥ अथो॒ त्त्वन्दी॒र्ग्घायु॑र्ब्भू॒त्त्वा श॒तव॑ल्शा
व्विरो॑हतात् ॥ १०० ॥ त्त्वमु॑त्तमा । स्यो॑षधे तव॒ वृ॒क्षा॒ऽउप॑स्त्तयः ॥
उप॑स्त्तिरस्त्तु॒ सो॒स्माकं॒ य्यो॒ऽअ॒स्माꣳ॒ऽअ॑भि॒दास॑ति ॥ १०१ ॥
[२७] मा मा॑ हिꣳसी॒ज्जनि॒ता यः॒ पृ॑थि॒व्या यो॒ वा॒ दि॒वꣳ॑ स॒त्त्यध॑र्म्मा॒ व्या
न॑ट् ॥ यश्चा॒पश्च॒न्द्राः॒ प्र॑थ॒मो ज॒जान॒ कस्मै॑ दे॒वाय॑ ह॒विषा॑ व्विधेम ॥
॥ १०२ ॥ अ॒ब्भ्याव॑र्त्तस्व । पृथि॒वि य॒ज्ञेन॒ पय॑सा स॒ह ॥ व्व॒पान्ते॑ऽ
अ॒ग्निरि॑षि॒तो॒ऽअ॑रोहत् ॥ १०३ ॥ अग्ने॒ यत ॥ अग्ने॒ यत्ते॑ शु॒क्रं॑ य्य

च्चुन्द्रंण्ठ्यत्त्पूतंण्ठ्यच्चंयुज्ञियंम् ॥ तद्दुवेब्भ्योंभरामासि ॥ १०४ ॥ इषु
मूर्ज्जंम् ॥ इषुमूर्ज्जंमुहमितऽआदंमृतस्युयोनिंम्महिषस्युधारांम् ॥
आमागोषुंव्विशुत्त्वातुनूषुजहांमिसेदिमनिंराममींवाम् ॥ १०५ ॥
अग्नेतवं ॥ अग्नेतवुश्श्रवोव्वयोमहिंब्भ्राजन्तेऽअर्च्चयोंव्विभावसो ॥
बृहद्भानोशवंसाव्वाजंमुक्क्थ्युन्दधांसिदाशुषेंकवे ॥ १०६ ॥ पावुक
वंर्च्चाऽंशुक्रवंर्च्चाऽं ॥ पावुकवंर्च्चाऽंशुक्रवंर्च्चाऽअनूंनवर्च्चाऽउदिंयर्षिभा
नुनां ॥ पुत्रोमातरांव्विचरन्नपांवसिपृणक्षिरोदंसीऽउभे ॥ १०७ ॥ ऊ
र्ज्जोंनपात् ॥ ऊर्ज्जोंनपाज्जातवेदऽंसुशस्तिभिर्म्मन्दंस्वधीतिभिर्हि

तः ॥ त्त्वेऽइष॒ꣳसन्द॑धु॒र्ब्भूरि॑वर्प्प॑साꣳश्चि॒त्रोत॑योव्वा॒मजा॑ताꣳ ॥ १०८ ॥
इ॒र॒ज्ज्यन्न॑ग्ग्ने । प्प्रथयस्वज॒न्तुभि॑र॒स्म्मेरायो॑ऽअमर्त्त्य ॥ सद॑र्श॒तस्य॒
व्व॒पु॑षो॒व्विरा॑जसिपृ॒णक्षि॑सान॒सिङ्क्र॒तु॑म् ॥ १०९ ॥ इ॒ष्क॒र्त्तार॑मद्ध्व॒रस्य॑ ॥
इ॒ष्क॒र्त्तार॑मद्ध्व॒रस्य॒प्प्रचे॑तसङ्क्ष॒य॑न्त॒ꣳराध॑सोम॒हः ॥ रा॒तिव्वा॒मस्य॑सु॒
भगा॑म्म॒हीमि॒षन्द॑धासिसान॒सिꣳर॒यिम् ॥ ११० ॥ ऋ॒तावा॑नम्म॒
हि॒षम् । व्वि॒श्श्वद॑र्शतम॒ग्ग्निꣳसु॒म्म्नाय॑दधिरेपु॒रोजनाꣳ ॥ श्रु॒त्क॑र्ण्ण॒
ꣳस॒प्प्रथ॑स्तमन्त्वागि॒रादैव्य॒म्मानु॑षायु॒गा ॥ १११ ॥ आप्प्या॑यस्व॒ ।
सम्मे॑तुतेव्वि॒श्श्वत॑÷सोम॒व्वृष्ण्य॑म् ॥ भवा॒व्वाज॑स्यसङ्ग॒थे ॥ ११२ ॥

सन्तें ॥ सन्तेपयांꣳसिसमुयन्तुव्वाजाःसंव्वृष्ण्यांन्यभिमातिषा
हः ॥ आप्प्यायंमानोऽअमृतांयसोमदिविश्श्रवांꣳस्युत्तमानिंधिष्ष्व
॥ ११३ ॥ आप्प्यायस्व । मदिन्तमुसोमुव्विश्श्वेभिरꣳशुभिंः ॥
भवांनःसुप्प्रथस्तमुःसखांव्वृधे ॥ ११४ ॥ आतें । व्वृत्त्सोमनोयम
त्त्परमाव्वित्त्सुधस्त्थांत् ॥ अग्ग्नेत्त्वाङ्गांमयागिरा ॥ ११५ ॥ तुब्भ्यु
न्ताः ॥ तुब्भ्युन्ताऽअंङ्गिरस्त्तमुव्विश्श्वांःसुक्षितयुःपृथंक् ॥ अग्ग्नेका
मांययेमिरे ॥११६॥ अग्ग्निःप्प्रियेषुँ ॥ अग्ग्निःप्प्रियेषुधामंसुकामोभू
तस्युभव्व्यंस्य ॥ सम्म्राडेकोव्विरांजति ॥११७॥ [१६] इतिवाजस

नेयसंहितायांद्वादशोऽध्यायः ॥१२॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्
सूत्रम् ॥ मयिगृह्णामिपञ्चदशध्रुवासिमधुव्वाताएकादशकौसम्म्यक्स्रवं
तिनवेमंमाषडपांत्वैकाऽयंपुरःपञ्चसप्ताष्टापञ्चाशत् ॥ मयिगृह्णामि ॥
मयिगृह्णाम्म्यग्ग्रेऽअग्निरꣳरायस्प्पोषायसुप्प्रजास्त्वायंसुवीर्य्याय ॥
मामुंदेवताꣳसचन्ताम् ॥ १॥ अपाम्पृष्ठम् ॥ अपाम्पृष्ठमंसियोनिंरग्ग्नेः
संमुद्रमभितꣳपिन्न्वंमानम् ॥ वर्द्धमानोमहाꣳऽआचपुष्क्करेदिवोमात्त्रं
याव्वरिम्म्णाप्प्रंथस्व ॥ २ ॥ ब्रह्मंजज्ञानम् ॥ ब्रह्मंजज्ञानम्प्रं
थमम्पुरस्ताद्विसीमतःसुरुचोव्वेनऽआंवः ॥ सबुध्न्याऽउपमाऽअंस्य

व्विष्ठाःसुतश्चयोनिमसंतश्चव्विवं÷ ॥ ३ ॥ हिरण्यगर्भःसमंवर्त्त
ताग्ग्रेभूतस्यंजातःपतिरेकंऽआसीत् ॥ सदांधारपृथिवीन्द्यामुतेमा
ङ्कस्म्मैदेवायंहविषांव्विधेम ॥ ४ ॥ द्रप्पसश्चस्कन्द । पृथिवीमनुद्यामि
मञ्चयोनिमं यश्चपूर्व्वं÷ ॥ समानंय्योनिमनुसञ्चरंन्तन्द्रप्पसञ्जुहो
म्म्यनुंसप्तहोत्राः ॥ ५ ॥ नमोस्तु । सर्प्पेभ्योयेकेचंपृथिवीमनु ॥
येऽअन्तरिक्षेयेदिवितेभ्यं÷सर्प्पेभ्योनमं÷ ॥ ६ ॥ याऽइषवः ॥
याऽइषवोयातुधानानांय्येवावनस्प्पतीँ१रनुं ॥ येवांवटेषुशेरंतेतेभ्यं÷
सर्प्पेभ्योनमं÷ ॥ ७ ॥ येवा । मीरोचनेदिवोयेवासूर्य्यंस्यरश्म्मिषुं ॥

येषांमुप्प्सुसदंस्कृतन्तेभ्भ्यंःसुर्प्पैभ्भ्योनमंः ॥ ८॥ कृणुष्ष्वपाजंः ॥
कृणुष्ष्वपाजुꣳप्प्रासिंतिन्नपृत्थ्वींठ्याहिराजेवामंवाँ२ऽइभेंन ॥ तृष्ष्वी
मनुप्प्रासिंतिन्द्रूणानोस्त्तांसिविद्ध्यंरक्षसुस्त्तापिंष्ठैꣳ ॥ ९ ॥ तवंभ्भ्र
मासंः॥तवंभ्भ्रमासंऽआशुयापंतन्त्त्यनुंस्पृशधृषताशोशुंचानꣳ ॥ तपू
ꣳष्ष्यग्ग्नेजुह्वापतुङ्ज्ञानसांन्दितोव्विसृंजुव्विंष्ष्वंगुल्काः ॥ १० ॥ प्रतिस्प्प
शंः ॥ प्रतिस्प्पशोव्विसृंजुतूर्ण्णितमोभवापायुर्व्विशोऽअस्याऽअदंब्धः ॥
योनोंदूरेअघशंꣳसोयोऽअन्त्त्यग्ग्नेमाकिंष्टेव्यथिरादंधर्षीत् ॥ ११ ॥ उदं
ग्ग्ने॥तिष्ठुप्प्रत्त्यातंनुष्ष्वुन्न्यमित्राँ२ऽओषतात्तिग्ममहेते ॥ योनोऽअरां

तिꣳसमिधानञ्चक्रेनीचातन्धक्ष्यतसन्नशुष्कम् ॥ १२ ॥ ऊर्द्ध्वोभव ।
ऊर्द्ध्वोभवप्प्रतिविद्ध्याद्ध्यस्म्मदाविष्कृणुष्वदैव्यान्यग्ग्ने॥ अवस्त्थि
रातनुहियातुजूनाञ्जामिमजामिम्प्रमृणीहिशत्रून् ॥ अग्ग्निष्ट्वातेजसा
सादयामि ॥ १३ ॥ अग्ग्निर्म्मूर्द्धा । दिवङ्ककुत्पति÷पृथिव्याअ
यम् ॥ अपाꣳरेताꣳसिजिन्वति ॥ इन्द्रस्यत्त्वौजसासादयामि ॥
॥ १४ ॥ भुवोयज्ञस्य ॥ भुवोयज्ञस्यरजसश्चनेतायत्त्रानियु
द्भिःसचसेशिवाभि÷ ॥ दिविमूर्द्धानन्दधिषेस्वर्षाञ्जिह्वामग्ग्नेचकृषेह
व्यवाहम् ॥ १५ ॥ [१५] ध्रुवासि । धरुणास्त्तृताविश्वकर्म्मणा ॥

मा॑त्त्वा॑समु॒द्रऽउद्वृ॑धी॒न्मासु॑प॒र्णो॑व्य॑थमानापृथि॒वीन्दृꣳ॑ह ॥ १६ ॥
प्र॒जाप॑तिष्ट्वा । सादयत्त्व॒पाम्पृ॒ष्ठेस॑मु॒द्रस्ये॒म॑न् ॥ व्यच॑स्वतीम्प्रथ॑
स्वती॒म्प्रथ॑स्वपृथि॒व्यासि ॥ १७ ॥ भूर॑सि ॥ भूर॑सि॒भूमि॑र॒स्यादि॑ति
र॒सि॒वि॒श्वधा॑या॒वि॒श्व॑स्य॒भुव॑नस्यध॒र्त्री ॥ पृ॒थि॒वीय्य॑च्छपृथि॒वीन्दृꣳ
हपृथि॒वीम्माहिꣳ॑सीः ॥ १८ ॥ विश्व॑स्मैप्प्रा॒णाय॑ ॥ विश्व॑स्मै
प्प्रा॒णाया॑पा॒नाय॑व्या॒नायो॑दा॒नाय॑प्प्रति॒ष्ठायै॑च॒रित्रा॑य ॥ अ॒ग्निष्ट्वा॒भि
पा॑तुम॒ह्यास्व॒स्त्याच्छ॒र्दिषा॒शन्त॑मेनत॒यादे॒वत॑याङ्गिर॒स्वद्ध्रु॒वासी॑द ॥
॥ १९ ॥ काण्डा॑त्त्काण्डात्प्र॒रोह॑न्ती । परु॑षःपरुष॒स्परि॑ ॥ ए॒वानो॑

दूर्व्वेप्प्रतनुसहस्रेणशतेनंच ॥ २० ॥ याशतेनं । प्प्रतनोषिसहस्रेणाव्वि
रोहसि ॥ तस्यास्तेदेवीष्टकेव्विधेमहविषाव्वयम् ॥ २१ ॥ यास्ते
ऽअग्नेसूर्य्येरुचोदिवमातन्वन्तिरश्मिभिः ॥ ताभिर्न्नोऽअद्यस
र्व्वाभीरुचेजनायनस्कृधि ॥ २२ ॥ यावः ॥ यावोदेवाःसूर्य्ये
रुचोगोष्वश्वेषुयारुचः ॥ इन्द्राग्नीताभिःसर्व्वाभीरुचन्नोधत्त
बृहस्पते ॥ २३ ॥ व्विराड्ज्योतिः ॥ व्विराड्ज्योतिरधारयत्स्वरा
ड्ज्योतिरधारयत् ॥ प्रजापतिष्ट्वासादयतुपृष्ठेपृथिव्याज्ज्योतिष्म
तीम् ॥ व्विश्वस्मैप्प्राणायापानायव्यानायव्विश्वञ्ज्योतिर्य्यच्छ ॥

अग्निष्टेऽधिपतिस्तयादेवतयाङ्गिरस्वद्ध्रुवासीद ॥ २४ ॥ मधुश्च ॥
मधुश्चमाधवश्चवासन्तिकावृतूऽअग्नेरन्तꣳश्लेषोसिकल्प्पेतान्द्या
वापृथिवीकल्प्पन्तामापऽओषधयꣳकल्प्पन्तामग्नयꣳपृथङ्ममज्ज्यै
ष्ठ्यायसव्व्रताꣳ ॥ येऽअग्नयꣳसमनसोन्तराद्यावापृथिवीऽइमे ॥ व्वासं
न्तिकाव्वृतूऽअभिकल्प्पमानाऽइन्द्रमिवदेवाऽअभिसंव्विशन्तुतयादेवत
याङ्गिरस्वद्ध्रुवेसीदतम् ॥ २५ ॥ अषाढासि ॥ अषाढासिसह
मानासहस्वारातीꣳसहस्वपृतनायतः ॥ सहस्रव्वीर्य्यासिसामाजि
न्व ॥ २६ ॥ [११] मधुव्वाताꣳ ॥ मधुव्वाताऽऋतायतेमधुक्ष

रन्तुसिन्धंवः ॥ माद्ध्वीर्न्नंःसुन्त्त्वोषंधीः ॥ २७ ॥ मधुनक्तंम् ॥ मं
धुनक्तंमुतोषसोमधुंमत्त्पार्थिंवुद्गृरजं÷ ॥ मधुद्यौरंस्तुनःपिता ॥
॥ २८ ॥ मधुंमान्नः ॥ मधुंमान्नोव्वनुस्प्पतिर्म्मधुंमाꣳअस्तुसूर्य्यं÷॥
माद्ध्वीर्गावोभवन्तुनः ॥ २९ ॥ उपाङ्गम्भंन् ॥ उपाङ्गम्भंन्त्सीदुमा
त्त्वासूर्य्योभिताप्प्सीन्माग्निर्वैश्श्वानरः ॥ अच्छिंन्नपत्त्राःप्प्रजाऽ
अंनुवीक्षस्वानुंत्त्वादिव्याव्वृष्टिःसचताम् ॥ ३० ॥ त्रीन्त्संमुद्रा
न् ॥ त्रीन्त्संमुद्रान्त्समंसृपत्स्वर्ग्गानुपाम्पतिंव्वृषभऽइष्टंकानाम् ॥ पु
रीषंव्वसानःसुकृतस्यंलोकेतत्रंगच्छयत्रपूर्व्वेपरेताः ॥ ३१ ॥ महीद्यौः

पृथिवीचंनऽइमंयज्ञम्मिमिक्षताम् ॥ पिपृतान्नोभरीमभिः ॥ ३२ ॥
विष्णोःकर्म्माणि । पश्यतयतोव्व्रतानिपस्पशे ॥ इन्द्रस्ययुज्ज्यःसखा ॥ ३३ ॥ ध्रुवासि । धरुणेतोजज्ञेप्रथममेभ्योयोनिभ्योऽअधि
जातवेदाः ॥ सगायत्र्यात्रिष्टुभानुष्टुभाचदेवेभ्योहव्यंव्वहतुप्प्रजानन् ॥३४॥ इषेराये ॥ रमस्वसहसेद्युम्नऽऊर्ज्जेऽअपत्याय ॥ सम्म्राडसिस्वराडसिसारस्वतौत्वोत्सौप्प्रावताम् ॥ ३५ ॥ अग्नेयक्ष्व ॥
अग्नेयुक्ष्वाहियेवाश्वासोदेवसाधवः ॥ अरंव्वहन्तिमन्यवे ॥ ३६ ॥
युक्ष्वाहि । देवहूतमाँ२ऽअश्वाँ२ऽअग्नेरथीरिव ॥ निहोतापूर्व्यःसदः ॥

॥ ३७ ॥ [११] स॒म्म्यक्स्र॑वन्ति । स॒रितो॒नधेना॑ऽअ॒न्तर्हृ॒दामन॑सा
पू॒यमा॑नाः ॥ घृ॒तस्य॒धारा॑अ॒भिचा॑कशीमिहि॒र॒ण्ययो॑व्वे॒तसो॒मद्ध्ये॑ऽ
अ॒ग्नेः ॥३८॥ ऋ॒चेत्त्वा॑ । रु॒चेत्त्वा॑भा॒सेत्त्वा॒ज्ज्योति॑षेत्त्वा ॥ अभू॑दि॒दं
व्विश्श्व॑स्य॒भुव॑नस्य॒व्वाजि॑नम॒ग्नेर्व्वै॑श्वान॒रस्य॑च ॥ ३९ ॥ अ॒ग्निज्ज्यो॑ति
षा ॥ अ॒ग्निज्ज्यो॑तिषा॒ज्ज्योति॑ष्मान्रु॒क्मोव्वर्च्च॑सा॒व्वर्च्च॑स्वान् ॥ स॒ह॒स्र॒
दाऽअ॑सिस॒हस्रा॑यत्त्वा ॥ ४० ॥ आ॒दि॒त्यङ्गर्भ॑म् ॥ आ॒दि॒त्यङ्गर्भ॒
म्पय॑सा॒सम॑ङ्ग्धिस॒हस्र॑स्यप्प्रति॒मांव्वि॒श्श्वरू॑पम् ॥ परि॑वृङ्ग्धि॒हर॑सा॒माभि
म॑ꣳस्त्थाःशता॑यु॒षङ्कृ॒णु॒हि॒ची॒यमा॑नः ॥ ४१ ॥ व्वात॑स्य॒जूति॑ । व्वरु॑ण

स्यनाभिमश्वंजज्ञानꣳसरिरस्यमध्ये ॥ शिशुन्नदीनाꣳहरिमद्रिबु
ध्नमग्नेमाहिꣳसीःपरमेव्योमन् ॥ ४२ ॥ अजस्रमिन्दुम् ॥ अजस्र
मिन्दुमरुषम्भुरण्युमग्निमीडेपूर्व्वचित्तिन्नमोभिः ॥ सपर्व्वभिर्ऋतुशः
कल्पमानोगाम्माहिꣳसीरदितिंविराजम् ॥ ४३ ॥ वरूत्रीन्त्वष्टुः ॥
वरूत्रीन्त्वष्टुर्वरुणस्यनाभिमविंजज्ञानाꣳरजसःपरस्मात् ॥ मही
ꣳसाहस्रीमसुरस्यमायामग्नेमाहिꣳसीःपरमेव्योमन् ॥ ४४ ॥ योऽ
अग्निः ॥ योऽअग्निरग्नेरध्यजायतशोकात्पृथिव्याऽउतवादिवस्प
रि ॥ येनम्प्रजाविश्वकर्म्माजजानतमग्नेहेडःपरितेवृणक्तु ॥ ४५ ॥

चित्रन्देवानाम् ॥ चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्यव्वरुणस्या
ग्नेः ॥ आप्प्राद्यावापृथिवीऽअन्तरिक्षꣳसूर्य्यँआत्माजगतस्तस्थु
षश्च ॥ ४६ ॥ [१] इमम्मा । हिꣳसीर्द्विपादम्पशुꣳसहस्राक्षोमेधा
यच्चीयमानः ॥ मयुम्पशुम्मेधमग्नेजुषस्वतेनचिन्वानस्तन्व्वोनिषी
द ॥ मयुन्तेशुगृच्छतुयन्द्विष्मस्तन्तेशुगृच्छतु ॥ ४७ ॥ इमम्मा ।
हिꣳसीरेकशफम्पशुङ्कनिक्रदंव्वानंव्वाजिनेषु ॥ गौरमारण्यमनुतेदि
शामितेनचिन्वानस्तन्व्वोनिषीद ॥ गौरन्तेशुगृच्छतुयन्द्विष्मस्तन्ते
शुगृच्छतु ॥ ४८ ॥ इमꣳसाहस्रम् ॥ इमꣳसाहस्रꣳशतधारमुत्सव्व्य

च्च्यमानꣳसरिरस्यमध्ये ॥ घृतन्दुहानामदितिञ्जनायाग्नेमाहिꣳ
सीःपरमेव्व्योमन् ॥ गवयन्तेशुगृच्छतयन्द्विष्मस्तन्तेशुगृच्छतु ॥
॥ ४९ ॥ इममूर्णायुं । वरुणस्यनाभिन्त्वचम्पशूनान्द्विपदाञ्चतुष्प्प
दाम् ॥ त्वष्टु÷प्प्रजानाम्प्रथमञ्जनित्रमग्ग्नेमाहिꣳसीःपरमेव्व्योमन् ॥
उष्ट्रमारण्यमनुतेदिशामितेनचिन्वानस्तन्वोनिषीद ॥ उष्ट्रन्तेशुगृ
च्छतुयन्द्विष्मस्तन्तेशुगृच्छतु ॥ ५० ॥ अजोहि ॥ अजोह्यग्नेरज
निष्टशोकात्सोऽअपश्यज्जनितारमग्ग्रे ॥ तेनदेवादेवतामग्ग्रमायँस्ते
नरोहमायन्नुपमेद्ध्यासः ॥ शरभमारण्यमनुतेदिशामितेनचिन्वा

न॒स्त॒न्न्वो॒निषी॑द ॥ श॒र॒भन्ते॒शुगृ॑च्छ॒तु॒यन्द्वि॒ष्म्मस्त्तन्ते॒शुगृ॑च्छतु ॥५१॥
त्वंय्य॑विष्ठ । दा॒शुषो॒नृँःपा॑हिशृणु॒धी॑गिरः ॥ रक्षा॑तो॒कमु॒तत्त्मना॑ ॥
॥ ५२ ॥ अ॒पान्त्वा ॥ अ॒पान्त्वेम॑न्त्सादया॒म्म्य॒पान्त्वोद्म॑न्त्सादया
म्म्य॒पान्त्वाभस्म्म॑न्त्सादया॒म्म्य॒पान्त्वा॒ज्ज्योति॑षिसादया॒म्म्य॒पान्त्वा
य॑नेसादया॒म्म्यर्ण॒वेत्त्वा॒सद॑नेसादयामिसमु॒द्द्रेत्त्वा॒सद॑नेसादयामिस
रि॒रेत्त्वा॒सद॑नेसादया॒म्म्य॒पान्त्वा॒क्षये॑सादया॒म्म्य॒पान्त्वा॒साधि॑षिसाद
या॒म्म्य॒पान्त्वा॒सद॑नेसादया॒म्म्य॒पान्त्वा॑स॒धस्त्थे॑सादया॒म्म्य॒पान्त्वा
यो॒नौ॑सादया॒म्म्य॒पान्त्वा॒पुरी॑षेसादया॒म्म्य॒पान्त्वा॒पाथ॑सिसादयामि

गायत्रेणत्त्वाच्छन्दसासादयामित्रैष्टुभेनत्त्वाच्छन्दसासादयामिपाङ्क्तेनत्त्वाच्छन्दसासादयामि ॥ ५३ ॥ [१] अयम्पुरः ॥ अयम्पुरोभुवस्तस्यप्प्राणोभौवायनोव्वसन्तःप्प्राणायनोगायत्रीव्वासन्तीगायत्र्यैगायत्रङ्गायत्रादुपाꣳशुरुपाꣳशोस्त्रिवृत्त्रिवृतोरथन्तरंव्वसिष्ठऽऋषिःप्प्रजापतिगृहीतयात्त्वयाप्प्राणङ्गृह्णामिप्प्रजाभ्यः ॥ ५४ ॥

अयन्दक्षिणा । व्विश्वकर्म्मातस्यमनोव्वैश्वकर्म्मणङ्ग्रीष्मोमानसस्त्रिष्टुब्ग्रैष्म्मीत्रिष्टुभःस्वारꣳस्वारादन्तर्य्यामोन्तर्य्यामात्पञ्चदशःपञ्चदशाद्बृहद्बृहद्भरद्वाजऽऋषिःप्प्रजापतिगृहीतयात्त्वयामनोगृह्णामि

प्प्रजाभ्यः ॥ ५५ ॥ अयम्पश्चात् ॥ अयम्पश्चाद्विश्वव्यचास्त
स्यचक्षुर्वैश्वव्यचसंवर्षाश्चाक्षुष्योजगतीवार्षीञ्जगत्त्याऽऋक्सममृ
क्समाच्छुक्रःशुक्रात्सप्तदशःसप्तदशाद्वैरूपञ्जमदग्निर्ऋषिःप्प्रजा
पतिगृहीतयात्त्वयाचक्षुर्ग्गृह्णामिप्प्रजाभ्यः ॥ ५६ ॥ इदमुत्तरात्स्व
स्तस्यश्श्रोत्रᳪसौवᳪशरच्छ्रौत्र्यनुष्टुप्शारद्यनुष्टुभऽऐडमैडान्मन्थीम
न्थिनऽएकविᳪशऽएकविᳪशाद्वैराजंविश्वामित्रऋषि प्प्रजापतिगृही
तयात्त्वयाश्श्रोत्रङ्गृह्णामिप्प्रजाभ्यः ॥ ५७ ॥ इयमुपरिमतिस्तस्यैवा
ङ्मात्याहेमन्तोवाच्यःपङ्क्तिर्हैमन्तीपङ्क्त्यैनिधनवन्निधनवतऽआग्रय

णांत्रिणवत्रयस्त्रिꣳशौत्रिणवत्रयस्त्रिꣳशाभ्याꣳशाक्वररैवतेविश्वकर्म्मऽ ऋषिःप्प्रजापतिगृहीतयात्त्वयावाचङ्गृह्णामिप्प्रजाभ्योलोकन्ताऽइन्द्रम् ॥ "लोकम्पृणच्छिद्रम्पृणाथोसीदध्रुवात्त्वम् ॥ इन्द्राग्नीत्त्वाबृहस्पतिरस्मिन्योनावसीषदन् ॥ १ ॥ ताऽअस्यसूददोहसःसोमꣳश्रीणन्तिपृश्नयः ॥ जन्मन्देवानांविशस्त्रिष्वारोचनेदिवः ॥ २ ॥ इन्द्रंविश्वाऽअवीवृधन्स्समुद्रव्यचसङ्गिरः ॥ रथीतमꣳरथीनांवाजानाꣳसत्पतिम्पतिम् ॥ ३ ॥" ॥ ५८ ॥ [५] इति श्रीवाजसनेयसंहितायांत्रयोदशोऽध्यायः ॥ १३ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम् ॥ ध्रुव

क्षितिःषट्सजूर्ऋतुभिर्मूर्द्धावयोर्द्धिकाविन्द्राग्नीआयुर्मैषट्कावाशुस्त्रि
वृदेकाग्नेर्भागोस्येकयाचतुष्कावष्टावेकत्रिꣳशत् ॥ हरिः ॐध्रुवक्षिति
र्ध्रुवयोनिः ॥ ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासिध्रुवꣳयोनिमासीदसाधुया ॥
उक्ख्यंस्यकेतुम्प्रथमञ्जुषाणाश्विनाध्वर्यूसादयतामिहत्त्वा ॥ १ ॥
कुलायिनीघृतवती ॥ कुलायिनीघृतवतीपुरन्धिःस्योनेसीदसदनेपृ
थिव्याः ॥ अभित्त्वारुद्रावसवोगृणन्त्विमाब्रह्मपीपिहिसौभगाया
श्विनाध्वर्यूसादयतामिहत्त्वा ॥ २ ॥ स्वैर्दक्षैः ॥ स्वैर्दक्षैर्दक्षपितेहसी
ददेवानाꣳसुम्नेबृहतेरणाय ॥ पितेवैधिसूनवऽआसुशेवास्वावेशातु

न्वासंव्विशस्वाश्विनाद्ध्वर्य्यूसादयतामिहत्त्वा ॥ ३ ॥ पृथिव्व्याःपुरी
षम् ॥ पृथिव्व्याःपुरीषमस्यप्प्सोनामतान्त्वाव्विश्श्वेऽअभिगृणन्तुदे
वाः ॥ स्तोमपृष्ठाघृतवतीहसीदप्प्रजावदस्म्मेद्द्रविणायजस्वाश्विना
द्ध्वर्य्यूसादयतामिहत्त्वा॥४॥आदित्यास्त्वा । पृष्ठेसादयाम्म्यन्तरिक्ष
स्यधर्त्त्रीव्विष्टम्भनीन्दिशामधिपत्नीम्भुवनानाम्॥ऊर्म्मिर्द्द्रप्प्सोऽअपा
मसिव्विश्श्वकर्म्मातऽऋषिरश्विनाद्ध्वर्य्यूसादयतामिहत्त्वा॥५॥शुक्रश्च।
शुक्रश्चशुचिश्चग्ग्रैष्म्मावृतूऽअग्नेरन्तꣳश्लेषोसिकल्प्पेतान्द्यावापृथिवी
कल्प्पन्तामापऽओषधयꣳकल्प्पन्तामग्ग्नयꣳपृथङ्ममज्ज्यैष्ठ्यायसव्व्र

ताꣳ ॥ येऽअग्नयꣳसमनसोन्तराद्यावापृथिवीऽइमे ॥ ग्रैष्म्मावृतूऽ
अभिकल्पमानाऽइन्द्रमिवदेवाअभिसंव्विँशन्तुतयाद्देवतयाङ्गिरस्वद्ध्रु
वेसीदतम् ॥ ६ ॥ [६] सजूर्ऋतुभि÷सजूर्व्विधाभिः सजूर्द्देवैर्व्वयोना
धैरग्नयेत्त्वावैश्श्वानरायाश्श्विनाद्ध्वर्य्यूसादयतामिहत्त्वासजूर्ऋतुभि÷
सजूर्व्विधाभि÷सजूर्व्वसुभिꣳसजूर्द्देवैर्व्वयोनाधैरग्नयेत्त्वावैश्श्वानराया
श्श्विनाद्ध्वर्य्यूसादयतामिहत्त्वासजूर्ऋतुभि÷सजूर्व्विधाभि÷सजूरुद्द्रैꣳस
जूर्द्देवैर्व्वयोनाधैरग्नयेत्त्वावैश्श्वानरायाश्श्विनाद्ध्वर्य्यूसादयतामिहत्त्वा
सजूर्ऋतुभि÷सजूर्व्विधाभि÷सजूरादित्यैꣳसजूर्द्देवैर्व्वयोनाधैरग्नयेत्त्वावै

श्श्वानुरायुाश्श्विनांध्वुर्य्यूँसांदयतामिहत्त्वांसुजूर्ऋतुभिं÷सुजूर्व्विधाभि÷
सुजूर्व्विश्श्वैर्द्देवैंःसुजूर्द्देवैंर्व्वयोनाधैरग्ग्नयेंत्त्वावैश्श्वानुरायुाश्श्विनांध्वु
र्य्यूँसांदयतामिहत्त्वां ॥ ७ ॥ प्प्राणम्मे । पाह्यपानम्मेंपाहिव्युान
म्मेंपाहिचक्षुंम्मेंऽउुर्व्यांव्विभांहिश्श्रोत्रंम्मेंश्श्लोकय ॥ अपःपिन्वौ
षधीर्ज्जिन्वद्विपादंवचतुंष्प्पात्त्पाहिदिवोंव्वृष्टिमेरंय ॥ ८ ॥ [२]
मूर्द्धांव्वयं÷प्प्रजापंतिश्छन्दं÷क्षत्रंव्वयोमयंन्दुञ्छन्दोंव्विष्टम्भोव्वयोधिप
तिश्च्छन्दोंव्विश्श्वकंर्म्मांव्वयं÷परमेष्ठीच्छन्दोंव्वुस्तोव्वयोंव्विवुलञ्छन्दो
व्वृष्ष्णिर्व्वयोंव्विशालञ्छन्दःपुरुंषोव्वयस्तुन्द्रञ्छन्दोंव्याग्घ्रोव्वयोनाधृष्ट

ञ्छन्द॑÷सि॒ᳫँहोव्वय॑श्छ॒दिश्च्छन्द॑÷पष्ठ॒वाड्ड्वयो॑बृह॒तीच्छन्द॑ऽउ॒क्षाव्व
य॑÷क॒कुप्प्छन्द॑ऽऋष॒भोव्वय॑÷स॒तोबृ॑ह॒तीच्छन्दो॑न॒ड्ड्वान्वय॑÷ ॥ ९ ॥
अ॒न॒ड्ड्वान्वय॑÷प॒ङ्क्तिश्च्छन्दो॑धे॒नुर्व्वयो॒जग॑ती॒च्छन्द॒स्त्र्य॒विर्व्वया॑स्त्रि॒ष्टुप्प्छ
न्दो॑दि॒त्य॒वाड्ड्वयो॑वि॒राड्छन्द॒ꣳप॒ञ्चावि॒र्व्वयो॑गाय॒त्रीच्छन्द॑स्त्रिव॒त्सोव्व
य॑ऽउ॒ष्णिक्छन्द॑स्तु॒र्य्य॒वाड्ड्वयो॑नु॒ष्टुप्प्छन्दो॑लो॒कं[१]ता[२]ऽइ[३]न्द्र॑म् ॥ १० ॥
[२] इन्द्रा॑ग्नी॒ऽअव्य॑थमानाम् ॥ इन्द्रा॑ग्नी॒ऽअव्य॑थमाना
मिष्ट॑कान्दृᳫँहतंय्यु॒वम् ॥ पृ॒ष्ठेन॒द्यावा॑पृथि॒वीऽअ॒न्तरि॑क्षञ्च॒व्विबा॑ध

---

१ लोकम्पृण । २ ताअस्य । ३ इन्द्रंविश्वाः ।

से ॥ ११ ॥ व्वि॒श्श्वकर्म्मात्त्वा । सादयत्त्व॒न्तरिक्षस्यपृष्ठेव्व्यचंस्व
तीम्प्रथंस्वतीम॒न्तरिक्षंय्यच्छा॒न्तरिक्षन्दृꣳहा॒न्तरिक्षम्माहिꣳसीः ॥
व्विश्श्वंस्म्मैप्प्राणायांपा॒नायंव्व्या॒नायोंदा॒नायंप्प्रति॒ष्ठायैच॒रित्त्रांय ॥
व्वायु॒ ाभिपांतुम॒ह्ह्यास्व॒स्त्याच्छ॒र्द्दिषा॒शन्तंमेन॒तयादे॒वतंयाङ्गि॒रस्व
द्ध्रुवासींद ॥ १२ ॥ शतम् ॥ ७०० राज्ञ्यंसि ॥ राज्ञ्यंसि॒प्प्राची॒दि
ग्ग्वि॒राडंसि॒दक्षिणा॒दिक्स्स॒म्म्राडंसि॒प्प्र॒तीची॒दिक्स्स्व॒राड॒स्यु॒दीची॒
दिगधिपत्त्न्यसिबृह॒तीदिक् ॥ १३ ॥ व्वि॒श्श्वकर्म्मात्त्वा ॥ सादयत्त्व॒
न्तरिक्षस्यपृ॒ष्ठेज्ज्योतिष्म्मतीम् ॥ व्विश्श्वंस्म्मैप्प्राणायांपा॒नायंव्व्या

नायुर्व्विश्श्वव्युज्ज्योतिर्य्यच्छ ॥ व्वायुष्टेऽधिपतिस्तयादेवतयाङ्गिरस्वद्ध्रु
वासीद ॥ १४ ॥ नभश्च । नभस्यश्चव्वार्षिकावृतूऽअग्ग्नेरन्तःश्श्ले
षोसिकल्प्पेतान्द्यावापृथिवीकल्प्पन्तामापऽओषधयःकल्प्पन्ताम
ग्ग्नयःपृथङ्ङ्ममज्ज्यैष्ठ्यायसव्व्रताः ॥ येऽअग्ग्नयःसमनसोन्तराद्या
वापृथिवीऽइमे ॥ व्वार्षिकावृतूऽअभिकल्प्पमानाऽइन्द्रमिवदेवाऽअ
भिसंव्विशन्तुतयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम् ॥ १५ ॥ इषश्च ॥
इषश्चोर्ज्जश्चशारदावृतूऽअग्ग्नेरन्तःश्श्लेषोसिकल्प्पेतान्द्यावापृथिवी
कल्प्पन्तामापऽओषधयःकल्प्पन्तामग्ग्नयःपृथङ्ङ्ममज्ज्यैष्ठ्यायस

व्रताः ॥ यऽअग्नयःसमनसोन्तराद्यावापृथिवीइमे ॥ शारदावृतूऽ
अभिकल्पमानाऽइन्द्रमिवदेवाऽअभिसंविशन्तुतयादेवतयाङ्गिरस्व
द्ध्रुवेसीदतम् ॥ १६ ॥ [६] आयुर्म्मे । पाहिप्प्राणम्मेपाह्यपा
नम्मेपाहिव्यानम्मेपाहिचक्षुर्म्मेपाहिश्श्रोत्रम्मेपाहिव्वाचम्मेपिन्वम
नोमेजिन्वात्त्मानम्मेपाहिज्ज्योतिर्म्मेयच्छ ॥ १७ ॥ माच्छन्दः ।
प्प्रमाच्छन्दःप्प्रतिमाच्छन्दोऽअस्त्रीवयश्छन्दःऽपङ्क्तिश्छन्दऽउ
ष्णिक्छन्दोबृहतीच्छन्दोनुष्टुप्प्छन्दोविराट्छन्दोगायत्रीच्छन्दस्त्रि
ष्टुप्प्छन्दोजगतीच्छन्दःपृथिवीच्छन्दः ॥ १८ ॥ पृथिवीच्छन्दो

न्तरिक्षञ्छन्दोद्यौश्छन्दꣳसमाश्छन्दोनक्षत्राणिच्छन्दोवाक्छ
न्दोमनश्छन्दःकृषिश्छन्दोहिरण्यञ्छन्दोगौश्छन्दोजाच्छन्दो
ऽश्वश्छन्दः ॥ १९ ॥ अग्निर्देवता । अग्निर्देवतावातोदेवतासूर्य्यो
देवताचन्द्रमादेवतावसवोदेवतारुद्रादेवतादित्त्यादेवतामरुतोदेवता
विश्वेदेवादेवताबृहस्पतिर्देवतेन्द्रोदेवतावरुणोदेवता ॥२०॥ मूर्द्धा
सि ॥ मूर्द्धासिराड्ध्रुवासिधरुणाधर्त्र्यसिधरणी ॥ आयुषेत्वावर्च्चसे
त्वाकृष्यैत्वाक्षेमायत्वा ॥ २१ ॥ यन्त्रीराट् ॥ यन्त्रीराड्यन्त्र्यसि

यम॑नीद्ध्रुवासिधरित्त्री ॥ इषेत्त्वोर्ज्जेत्त्वा॑रय्यैत्त्वापोषा॑यत्त्वालो॑[1]कन्ता[2]ऽइ[3]
न्द्र॑म् ॥ २२ ॥ [६] आशुस्त्रिवृत् ॥ आशुस्त्रिवृद्भान्तःप॑ञ्चदशोव्व्यो
मासप्तदशोधरुण॑ऽएकविꣳशःप्प्रतू॑र्त्तिरष्टादशस्त्तपोनवदशोभीवर्त्तः
स॑विꣳशोव्वर्च्चोद्वाविꣳशःसम्भर॑णस्त्रयोविꣳशोयोनि॑श्चतुर्व्विꣳशोग
र्ब्भाःपञ्चविꣳशऽओज॑स्त्रिणवःक्क्रतु॑रेकत्रिꣳशःप्प्र॑तिष्ठात्त्र॑यस्त्रिꣳशोब्ब्र
ध्नस्या॑व्विष्टप॑ञ्चतुस्त्रिꣳशोनाकः॑षट्त्रिꣳशोव्विवर्त्तोष्टाचत्त्वारिꣳशोधर्त्र
ञ्च॑तुष्टोमः ॥ २३ ॥ [१] अग्ग्नेर्ब्भागः ॥ अग्ग्नेर्ब्भागोसिदीक्षायाऽ

---

१ लोकम्पृण । २ ताअस्य । ३ इन्द्रंविश्वाः ।

आधिपत्त्यम्ब्रह्मस्प्पृतन्त्रिवृत्त्स्तोमऽइन्द्रस्यभागोसिव्विष्णोराधि
पत्त्यङ्क्षत्रꣳस्प्पृतम्पञ्चदशस्त्तोमोनृचक्षसाम्भागोसिधातुराधिप
त्त्यञ्जनित्रꣳस्प्पृतꣳसप्तदशस्त्तोमोमित्रस्यभागोसिव्वरुणस्याधिप
त्त्यन्दिवोवृष्टिर्व्वातस्प्पृतऽएकविꣳशस्तोमोव्वसूनाम्भागः ॥ २४ ॥
व्वसूनाम्भागोसिरुद्द्राणामाधिपत्त्यञ्चतुष्प्पात्त्स्प्पृतञ्चतुर्व्विꣳशस्त्तोमऽ
आदित्त्यानाम्भागोसिमरुतामाधिपत्त्यङ्गर्ब्भाःस्प्पृत्ताःपञ्चविꣳशस्तो
मोदित्त्यैभागोसिपूष्णऽआधिपत्त्यमोजस्प्पृतन्त्रिणवस्त्तोमोदेवस्य
सवितुर्ब्भागोसिबृहस्प्पतेराधिपत्त्यꣳसमीचीर्द्दिशस्प्पृताश्चतुष्टोम

स्तोमो॒यवा॑नाम्भा॒गः ॥ २५ ॥ यवानाम्भा॒गो॒स्यय॑वाना॒माधि॑पत्त्य
म्प्र॒जास्स्पृ॒ताश्च्च॑तुश्च्चत्त्वारि॒ꣳशस्तोम॑ऋभू॒णाम्भा॒गो॒सि॒विश्श्वे॑षान्दे॒वा
ना॒माधि॑पत्त्यम्भू॒तꣳस्स्पृ॒तन्त्र॑यस्त्रि॒ꣳशस्तोमः॒सह॑श्च्च ॥ २६ ॥
सह॑श्च्च । सह॒स्य॒श्च्च॒हैम॑न्तिकावृ॒तू॒ऽअ॒ग्नेर॑न्तःश्ले॒षो॒सि॒कल्पे॑ता
न्द्यावा॑पृथि॒वीकल्प॑न्ता॒मापु॒ऽओष॑धयःकल्प॑न्ताम॒ग्नयः॒पृथ॒ङ्ङ्मम॒
ज्ज्यैष्ठ्या॑यसव्व्र॑ताः ॥ ये॒ऽअ॒ग्नयः॒सम॑नसो॒न्त॒राद्यावा॑पृथि॒वीऽइ॒मे ॥
हैम॑न्तिकावृ॒तू॒ऽअ॑भि॒कल्प्प॑माना॒ऽइन्द्र॑मिवदे॒वाऽअ॑भि॒संवि॑शन्तु॒तया॑
दे॒वत॑याङ्गिर॒स्वद्ध्रु॒वेसी॑दतम् ॥ २७ ॥ [४] एक॑यास्तुवत । प्प्र॒

जाऽअधीयन्तप्प्रजापतिरधिपतिरासीत्तिसृभिरस्तुवतब्ब्रह्मासृज्ज्य
तब्ब्रह्मणस्प्पतिरधिपतिरासीत्त्पञ्चभिरस्तुवतभूतान्न्यसृज्ज्यन्तभू
तानाम्पतिरधिपतिरासीत्त्सप्तभिरस्तुवतसप्तऽऋषयोसृज्ज्यन्तधा
ताधिपतिरासीन्नवभिरस्तुवत ॥ २८ ॥ नवभिरस्तुवत । पितरोसृ
ज्ज्यन्तादितिरधिपत्त्न्यासीदेकादशभिरस्तुवतऽऋतवोसृज्ज्यन्ता
र्त्तवाऽअधिपतयऽआसँस्त्रयोदशभिरस्तुवतमासाऽअसृज्ज्यन्तसंव्व
त्त्सरोधिपतिरासीत्त्पञ्चदशभिरस्तुवतक्षत्त्रमसृज्ज्यतेन्द्रोधिपतिरा
सीत्त्सप्तदशभिरस्तुवतग्ग्राम्म्याःपशवोसृज्ज्यन्तबृहस्प्पतिरधिप

तिरासीन्नवदुशाभिंरस्तुवत ॥ २९ ॥ नुवदुशाभिंरस्तुवत । शूद्रा
ऽर्य्यावंसृज्ज्येतामहोरात्त्रेऽ अधिंपत्त्नीऽआस्त्तामेकांविꣳशत्त्यास्तुवुतै
कंशफाःपुशवोंसृज्ज्यन्तुव्वरुणोधिंपतिरासीत्त्रयोंविꣳशत्त्यास्तुवतक्षु
द्राऽंपुशवोंसृज्ज्यन्तपूषाधिंपतिरासीत्त्पञ्चांविꣳशत्त्यास्तुवतारुण्ण्याः
पुशवोंसृज्ज्यन्तव्वायुरधिंपतिरासीत्त्सुप्तविंꣳशत्त्यास्तुवतुद्यावांपृथि
वीव्ययैतांव्वसंवोरुद्द्राऽआंदित्त्याऽअंनुव्यायँस्त्तऽएवाधिंपतयऽआसुन्नवं
विꣳशत्त्यास्तुवत ॥ ३० ॥ नवांविꣳशत्त्यास्तुवतुव्वनुस्प्पतंयोसृज्ज्यन्तु
सोमोधिंपतिरासीदेकांत्त्रिꣳशतास्तुवतप्प्रजाऽअंसृज्ज्यन्तुयवाश्चा

य॑न्त्राश्च्चाधिपतयऽआसुँस्त्त्रय॑स्त्रिꣳशतास्त्तुवतभू[2]तान्न्य॑शाम्म्यन्न्प्रजाप॑तिःपरमेष्ठ्यधिपतिरासील्लोँ[1]क॑न्ता[3]ऽइन्द्र॑म् ॥ ३१ ॥ [४] इतिश्री वाजसनेयसंहितायांचतुर्द्दशोऽध्यायः ॥ १४ ॥ श्रीवेदपुरुषायनमः ॥

अनुवाक्सूत्रम् अग्ग्नेजातान् पञ्च रश्मिनासत्त्यायचतस्रः राज्यस्य यंपुरः पञ्चकौ अग्ग्निर्म्मूर्द्धैकोनात्रिꣳशत् येनऽऋषयोष्टौ तपश्चनव सप्त पञ्चषष्टिः ॥ हरिःॐअग्ग्ने॑जातान् ॥ अग्ग्ने॑जातान्न्प्रणु॑दानःसुपत्त्नान्प्रत्त्यजा॑तान्नुदजातवेदः ॥ अधि॑नोब्रूहिसुमनाऽअहेडुँस्त्तव॑स्यामुश

---

१ लोकम्पृण । २ ताअस्य । ३ इन्द्रंविश्वाः ।

म्म्माँस्त्रिवरूंथऽउद्धौ ॥ १ ॥ सहसाजातान् ॥ सहंसाजातान्प्रणुंदानःसुप
त्क्नान्प्रत्त्यजाताञ्जातवेदोनुदस्व ॥ अधिंनोब्रूहिसुमनुस्यमांनोव्वुयꣳ
स्यांमुप्प्रणुंदानःसुपत्क्नांन् ॥ २ ॥ षोडुशीस्तोमं÷षोडुशीस्त्तोमुऽओ
जोद्द्राविंणञ्चतुश्च्चत्त्वारिꣳशस्तोमोव्वर्च्चोंद्द्राविंणम् ॥ अुग्ग्नेःपुरींषमुस्य
प्प्सोनामुतान्त्वाव्विश्श्वेंऽअुभिगृंणन्तुदेवाः ॥ स्तोमंपृष्ठाघृतवंतीहसीं
दप्प्रुजावंदुस्म्मेद्द्रविुणायंजस्व ॥ ३ ॥ एवुश्च्छन्दं÷ ॥ एवुश्च्छन्दोव्व
रिंवुश्च्छन्दं÷शुम्भुश्च्छन्दं÷परिंभूश्च्छन्दऽआच्छच्छन्दोमनुश्च्छ
न्दोव्व्यचुश्च्छन्दुःसिन्धुश्च्छन्दं÷समुद्द्रश्च्छन्दं÷सरिरञ्छन्दं÷कुकु

प्प्छन्द॑स्त्रिक॒कुप्प्छन्दः॑ का॒व्यञ्छन्दो॑ऽअङ्कु॒पञ्छन्दो॒ऽक्षर॑पङ्क्ति॒श्छन्दः॑
प॒दप॑ङ्क्ति॒श्छन्दो॑ वि॒ष्टा॒रप॑ङ्क्ति॒श्छन्दः॑ क्षु॒रो भ्रज॒श्छन्द॑ऽआ॒च्छच्छ
न्दः॑ प्र॒च्छच्छन्दः॑ ॥ ४ ॥ आ॒च्छच्छन्दः॑ प्र॒च्छच्छन्दः॑ ॥ सं॒य
च्छन्दो॑ वि॒यच्छन्दो॑ बृ॒हच्छन्दो॑ रथन्त॒रञ्छन्दो॑ नि॒का॒यश्छन्दो॑ विव॒ध
श्छन्दो॒ गिर॒श्छन्दो॒ भ्रज॒श्छन्दः॑ सꣳ॒स्तुप्प्छन्दो॑ऽनु॒ष्टुप्छन्द॒ऽएव॒
श्छन्दो॒ वरि॑व॒श्छन्दो॒ वय॒श्छन्दो॑ वय॒स्कृच्छन्दो॒ वि॒ष्प॒र्द्धा॒श्छ
न्दो॑ वि॒शा॒लञ्छन्द॒श्छ॒दिश्छन्दो॑ दू॒रो॒ह॒णञ्छन्द॑स्त॒न्द्रञ्छन्दो॑ऽअ
ङ्का॒ङ्कञ्छन्दः॑ ॥ ५ ॥ [५] र॒श्मिना॑ स॒त्याय॑ ॥ स॒त्यञ्जि॑न्व॒ प्रेति॑

ना॒धर्म्मँ॑णा॒धर्म्मँ॑ञ्जिन्वान्वि॑त्त्यादि॒वादि॒व॑ञ्जिन्वस॒न्धिना॒न्तरि॑क्षेणा॒
न्तरि॑क्षञ्जिन्वप्प्रति॒धिना॑पृ॑थि॒व्या॒पृ॑थि॒वी॑ञ्जिन्वव्विष्ट॒म्भे॑न॒व्वृष्ट्या॒व्वृष्टि॑
ञ्जिन्वप्प्र॒वया॒न्हाहा॑र्ज्जि॑न्वानु॒या॒रात्र्या॒रात्री॑ञ्जिन्वो॒शिजा॒व्वसु॑भ्यो॒व्व
सू॑ञ्जिन्वप्प्रके॑तना॒दि॒त्त्येभ्य॑ऽआदि॒त्त्या॑ञ्जिन्व॒तन्तु॑ना॒रायः ॥ ६ ॥
तन्तु॑ना ॥ तन्तु॑ना॒राय॒स्प्पोषे॑ण॒राय॒स्प्पोष॑ञ्जिन्वसꣳस॒र्प्पे॑णꣳश्रु॒
ताय॑ꣳश्रु॒तञ्जिन्व॒ैडे॑नौ॑षधी॑भि॒रोष॑धी॒र्ज्जि॑न्वो॒त्त॒मे॑न॒तनू॒भि॑स्त॒नूर्ज्जि॑न्व
व्वयो॒धसा॒धी॑ते॒नाधी॑तञ्जिन्वा॒भिजि॑ता॒तेज॑सा॒तेजो॑जिन्व ॥ ७ ॥
प्र॒ति॒पद॑सि । प्प्रति॒पदे॑त्त्वानु॒पद॑स्यनु॒पदे॑त्त्वास॒म्पद॑सिस॒म्पदे॑त्त्वा॒ः

तेजोसितेजसेत्त्वात्त्रिवृदसि ॥ ८ ॥ त्रिवृदसि ॥ त्रिवृतेत्त्वा
प्प्रवृदसिप्प्रवृतेत्त्वाव्विवृदसिव्विवृतेत्त्वासवृदसि सवृतेत्त्वाक्क्रमोस्या
क्क्रमायत्त्वासङ्क्रमोसिसङ्क्रमायत्त्वोत्क्क्रमोस्युत्क्क्रमायत्त्वोत्क्क्रान्तिरस्यु
त्क्क्रान्त्यैत्त्वाधिपतिनोर्ज्जोर्ज्जञ्जिन्व ॥ ९ ॥ [४] राज्ञ्यसि ॥
राज्ञ्यसिप्प्राचीदिग्वसवस्तेदेवाऽअधिपतयोग्निर्हेतीनाम्प्रतिधर्त्ता
त्रिवृत्त्वास्तोम÷पृथिव्याꣳश्रयत्त्वाज्ज्यमुक्थमव्यथायैस्तभ्नातु
रथन्तरꣳसामप्प्रतिष्ठित्त्याऽअन्तरिक्षऽऋषयस्त्त्वाप्प्रथमजादेवेषुदि
वोमात्त्रयावरिम्म्णाप्प्रथन्तुव्विधर्त्ताचायमधिपतिश्चतेत्त्वासर्व्वेसंव्विदा

नानाक॑स्यपृ॒ष्ठेस्व॒र्गेलो॒केयज॑मानञ्चसादयन्तु॥१०॥व्वि॒राड॑सि ॥ व्वि॒
राड॑सिद॒क्षि॒णादिग्ग्रु॒द्रास्ते॑दे॒वाऽअधि॑पतय॒ऽइन्द्रो॑हे॒तीनाम्प्र॑तिध॒र्त्ताप॑
ञ्चद॒शस्त्वा॒स्तोम॑÷पृथि॒व्याꣳश्र॑यतुप्प्रऽउ॑गमु॒क्थमव्य॑थायैस्तभ्ना
तुबृ॒हत्त्साम॒प्प्रति॑ष्ठित्त्याऽअ॒न्तरि॑क्ष॒ऽऋष॑यस्त्त्वाप्प्रथम॒जादे॒वेषु॑दि॒वो
मात्त्र॑याव्वरि॒म्म्णाप्र॑थन्तुव्विध॒र्त्ताचा॒यमधि॑पतिश्च॒तेत्त्वा॒सर्व्वे॑संविदा॒ना
नाक॑स्यपृ॒ष्ठेस्व॒र्गेलो॒केयज॑मानञ्चसादयन्तु ॥ ११ ॥ स॒म्म्राड॑
सि ॥ स॒म्म्राड॑सिप्प्र॒तीचीदिगा॑दि॒त्त्यास्ते॑दे॒वाऽअधि॑पतयोव्वरु॑णोहे
ती॒नाम्प्र॑तिध॒र्त्तास॑प्तद॒शस्त्वा॒स्तोम॑÷पृथि॒व्याꣳश्र॑यतुमरुत्त्व॒तीय॑मु॒

क्थमव्व्यथायैस्तब्भ्नातुव्वैरूपꣳसामप्प्रतिष्ठित्त्याऽअन्तरिक्षऽऋषय
स्त्वाप्प्रथमजादेवेषुदिवोमात्त्रयाव्वरिम्म्णाप्प्रथन्तुव्विधर्त्ताचायमधि
पतिश्चतेत्त्वासर्व्वेसंव्विदानानाकस्यपृष्ठेस्वर्ग्गेलोकेयजमानञ्चसादय
न्तु ॥ १२ ॥ स्वराडसि ॥ स्वराडस्युदीचीदिङ्मरुतस्तेदेवाऽ
अधिपतयःसोमोहेतीनाम्प्रतिधर्त्तैकव्विꣳशस्त्वास्तोमःपृथिव्याꣳ
श्रयतुनिष्केवल्यमुक्थमव्व्यथायैस्तब्भ्नातुव्वैराजꣳसामप्प्रतिष्ठित्त्या
ऽअन्तरिक्षऽऋषयस्त्वाप्प्रथमजादेवेषुदिवोमात्त्रयाव्वरिम्म्णाप्प्रथ
न्तुव्विधर्त्ताचायमधिपतिश्चतेत्त्वासर्व्वेसंव्विदानानाकस्यपृष्ठेस्वर्ग्गेलो

केयजंमानश्चसादयन्तु ॥ १३ ॥ अधिंपत्त्कन्यासि ॥ आधिं
पत्त्कन्यासिबृहुतीदिग्गिवश्श्वेंतेदेवाऽआधिंपतयोबृहुस्प्पातिर्हैंतीनाम्प्रं
तिधुर्त्तात्त्रिणवत्त्रयस्त्रिꣳशौत्त्वास्त्तोमौंपृथिव्व्याꣳश्श्रंयतांवैश्श्वदेवा
ग्ग्नमारुतेऽउक्क्थेऽअव्व्यंथायैस्त्तब्भ्नीताꣳशाक्क्वररैवुतेसामंनीप्प्रातिंष्ठि
त्त्याऽअन्तरिक्षुऽऋषंयस्त्त्वाप्प्रथमुजादेवेषुंदिवोमात्त्रंयाव्वरिम्म्णाप्प्रं
थन्तुव्विधुर्त्ताचायमाधिंपतिश्श्चुतेत्त्वासर्व्वेंसंव्विदानानाकंस्यपृष्ठेस्वुर्ग्गे
लोकेयजंमानश्चसादयन्तु ॥ १४ ॥ [५] अयम्पुरः ॥ अयम्पुरो
हरिकेशुꣳसूर्य्यंरश्मिस्तस्यंरथगृत्सश्चुरथौजाश्चसेनानीग्ग्रामु

ण्ण्यौ ॥ पुञ्जिकुस्त्थलाचंक्रतुस्त्थलाचांप्प्सुरसौदुङ्क्ष्णवं÷पुशवौहे
तिःपौरुंषेयोव्वुधः प्प्रहेंतिस्त्तेब्भ्युोनमोंऽअस्त्तुतेनोंवन्तुतेनोंमृडयन्तु
तेषन्द्विुष्म्मोयश्च्चनोुद्वेष्टितमैषुाञ्जम्भेंदध्मः ॥१५॥ अुयन्दंक्षिुणा ॥
अुयन्दंक्षिुणाव्विुश्श्वकंर्म्मुातस्यंरथस्वुनश्च्चुरथेंचित्रश्च्चसेनानीग्ग्रामु
ण्ण्यौ ॥ मेनुकाचंसहजुन्न्याचांप्प्सुरसौयातुधानांहेतीरक्षांꣳसि
प्प्रहेंतिस्त्तेब्भ्युोनमोंऽअस्त्तुतेनोंवन्तुतेनोंमृडयन्तुतेषन्द्विुष्म्मोयश्च्चं
नोुद्वेष्टितमैषुाञ्जम्भेंदध्मः ॥ १६ ॥ अुयम्पुश्च्चात् ॥ अुयम्पुश्च्चा
द्विुश्श्वव्यंचुास्त्तस्युरथंप्प्रोतुश्च्चसंमरथश्च्चसेनानीग्ग्रामुण्ण्यौ ॥ प्र

म्म्लोचन्तीचानुम्म्लोचन्तीचाप्प्सरसौव्याग्घ्राहेतिःसर्प्पाःप्प्रहेति
स्त्तेभ्भ्योनमोऽअस्त्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्द्विष्म्मोयश्च्चनोद्द्वेष्ट्टि
तमेषाञ्जम्भेदध्ध्मः ॥ १७ ॥ अयमत्तरात् ॥ अयमुत्तरात्त्संयद्द्वसु
स्तस्यताक्ष्यर्श्च्चारिष्ट्टनेमिश्च्चसेनानीग्ग्रामण्यौ ॥ व्विश्वाचीचघृ
ताचीचाप्प्सरसावापोहेतिर्व्वातःप्प्रहेतिस्त्तेभ्भ्योनमोऽअस्त्तुतेनोवन्तु
तेनोमृडयन्तुतेयन्द्द्विष्म्मोयश्च्चनोद्द्वेष्ट्टितमेषाञ्जम्भेदध्ध्मः ॥ १८ ॥ अ
यमुपरि ॥ अयमुपर्य्यर्व्वाग्ग्वसुस्तस्यसेनजिच्चसुषेणश्च्चसेनानीग्ग्रा
मण्यौ ॥ उर्व्वशीचपूर्व्वचित्तिश्च्चाप्प्सरसाववस्फूर्ज्जन्हेतिर्व्विद्युत्प्प्रहेति

स्त्तेब्भ्योनमोऽअस्त्तुतेनोऽवन्तुतेनोमृडयन्तुतेयन्द्विष्ष्मोयश्चनोद्वेष्टि
तमेषाञ्जम्भेदध्मः ॥१९॥ [५]अग्निर्म्मूर्द्धा॥अग्निर्म्मूर्द्धादिवःककु
त्पतिःपृथिव्व्याऽअयम् ॥ अपाꣳरेताꣳसिजिन्न्वति ॥२०॥ अयमु
ग्निः ॥ अयमग्निः सहस्त्रिणोव्वाजंस्यशतिनुस्प्पतिः ॥ मूर्द्धाकुवीरं
यीणाम् ॥ २१ ॥ त्वामंग्ने ॥ त्वामंग्नेपुष्क्करादद्ध्यथंर्व्वानिरंमन्थत॥
मूर्द्ध्नोविश्श्वंस्यव्वाघतः ॥२२ ॥ भुवोयज्ञस्यं ॥ भुवोयज्ञस्यरजंसश्च
नेतायत्त्रानियुद्भिःसचंसेशिवाभिः ॥ दिविमूर्द्धानंन्दधिषेस्वर्षाञ्जिह्वा
मंग्नेचकृषेहव्व्यवाहम् ॥२३॥ अबोद्ध्यग्निः ॥ अबोद्ध्यग्निः समि

धा॒जना॑ना॒म्प्रति॑धे॒नुमि॑वाय॒तीमु॒षास॑म् ॥ य॒ह्वाऽइ॑व॒प्प्रव॒यामु॒ज्जिहा॑
नाः॒प्प्रभा॒नवः॑सिस्रते॒नाक॒मच्छ॑ ॥ २४ ॥ अवो॑चामक॒वये॑ ॥ अवो॑चा
मक॒वये॒मेद्ध्या॑य॒वचो॑व॒न्दारु॑वृष॒भाय॒वृष्ण्णे॑ ॥ गवि॑ष्ठिरो॒नम॑सा॒स्तो
म॑म॒ग्नौदि॒वीव॑रु॒क्ममु॑रु॒व्यञ्च॑मऽश्रेत् ॥ २५ ॥ अ॒यमि॒ह ॥ अ॒यमि॒ह
प्प्र॑थ॒मोधा॑यिधा॒तृभि॒र्होता॒यजि॑ष्ठोऽअद्ध्व॒रेष्वीड्यः॑ ॥ यमप्न॑वानो॒भृ
ग॑वोव्विरुरु॒चुर्व्वने॑षुचि॒त्रंव्वि॒भ्वं॑व्वि॒शेवि॑शे ॥ २६ ॥ जन॑स्यगो॒पाः ॥ जन॑
स्यगो॒पाऽअ॑जनिष्टजा॒गृवि॑र॒ग्निःसु॒दक्षः॑सुवि॒ताय॒नव्य॑से ॥ घृ॒तप्प्र॑ती
को॒बृह॒तादि॑विस्पृशा॒द्युम॒द्विभा॑तिभर॒तेभ्यः॒शुचिः॑ ॥ २७ ॥ त्वाम॑ग्ने ॥

त्वामग्नेऽअङ्गिरसोगुहाहितमन्वविन्दञ्छिश्रियाणंव्वनेवने ॥ सजाय
सेमुत्थ्यमानःसहोमहत्त्वामाहुःसहसस्पुत्रमङ्गिरः ॥२८॥ सखायꣳस
म्।सखायꣳसंव्वःसम्यञ्चमिषꣳस्तोमञ्चाग्नये ॥ व्वर्षिष्ठायक्षितीनाम्
ऊर्जोनप्त्रेसहस्वते ॥२९॥ सꣳसमित् ॥ सꣳसमिद्युवसेवृषन्नग्नेव्विश्वा
न्यर्य्यऽआ ॥ इडस्पदेसमिद्ध्यसेसनोव्वसून्याभर ॥ ३० ॥ त्वाञ्चि
त्रश्रवस्तम ॥ त्वाञ्चित्रश्रवस्तमहवन्तेव्विक्षुजन्तवः ॥ शोचिष्के
शम्पुरुप्प्रियाग्नेहव्व्यायवोढवे ॥३१॥ एनावः ॥ एनावोऽअग्निन्नम
सोर्जोनपातमाहुवे ॥ प्रियञ्चेतिष्ठमरतिꣳस्वध्वरंव्विश्वस्यदूतममृतम् ॥

॥ ३२ ॥ व्विश्श्वंस्यदूतम् ॥ विश्श्वंस्यदूतमुमृतुंव्विश्श्वंस्यदूतमुमृतंम् ॥
सयोंजतेऽअरुषाव्विश्श्वभोंजसासदुंद्द्रवुत्त्स्वाऽहुतꣳ ॥ ३३ ॥ सदुंद्द्रवत् ॥
सदुंद्द्रवुत्त्स्वाꣳहुतुꣳसदुंद्द्रवुस्त्त्वाहुतꣳ ॥ सुब्ब्रह्मायुज्ञःसुशमीव्वसूनान्दे
वꣳराधोजनानाम् ॥ ३४ ॥ अग्नेव्वाजंस्य ॥ अग्नेव्वाजंस्युगोमंतुऽ
ईशांनꣳसहसोयहो ॥ अस्म्मेधैंहिजातवेदोमाहिश्श्रवं÷ ॥ ३५ ॥ सऽ
इंधानः ॥ सऽइंधानोव्वसुंष्क्कविरुग्ग्निरीडेन्न्योंगिरा ॥ रेवदुस्म्मभ्य्यं
म्प्पुर्व्वणीकदीदिहि ॥ ३६ ॥ क्षुपोरांजन् ॥ क्षुपोरांजन्नुतत्त्क्मनाग्ग्नेव्व
स्त्तोंरुतोषसं÷ ॥ सतिग्ग्मजम्म्भरुक्षसोंदहुप्प्रातिं ॥ ३७ ॥ भुद्द्रोनं÷ ॥

भद्रोनोऽअग्निराहुतोभद्द्रारातिःसुभगभद्रोऽअद्ध्वरः ॥ भद्राऽउतप्प्र
शंस्तयः ॥३८॥ भद्राऽउत ॥ भद्राऽउतप्प्रशंस्तयोभद्रम्मनःकृणुष्ष्व
वृत्रतूर्य्यें ॥ येनासमत्त्सुसासहः ॥ ३९ ॥ येनासमत्त्सु । सासहोव
स्स्थिरातनुहिभूरिशर्द्धताम् ॥ वनेमातेऽअभिष्टिभिः ॥४०॥ अग्निन्त
म् ॥ अग्निन्तम्मन्न्येयोव्वसुरस्तंय्यंय्यन्तिधेनवः ॥ अस्त्तमर्व्वन्तऽआ
शवोस्त्तन्नित्त्यासोव्वाजिनऽइषꣳस्तोतृभ्भ्यऽआभर ॥ ४१ ॥ सोऽअ
ग्निः ॥ सोऽअग्निर्य्योव्वसुर्ग्गृणेसंय्यमायन्तिधेनवः ॥ समर्व्वन्तोरघुद्रु
वःसꣳसुजातासःसूरयऽइषꣳस्तोतृभ्भ्यऽआभर ॥ ४२ ॥ उभेसुश्च

न्द्र ॥ उभेसुं३श्चन्द्रसर्प्पिषोदर्व्वीं३श्श्रीणीषऽआसनि ॥ उतोनुऽउत्त्पुपू
र्ष्याऽउक्थेषुंशवसस्प्पतऽइषंस्तोतृभ्युऽआभर ॥४३॥ अग्नेतम् ॥
अग्नेतमुद्याश्श्वन्नस्तोमैःक्रतुन्नभद्रंहृदिस्पृशम ॥ ऋध्यामातऽ
ओहैः ॥४४॥ अधाहि ॥ अधाह्यग्नेक्रतोर्भद्रस्यदक्षस्यसाधोः ॥ र
थीर्ऋतस्यबृहतोबभूर्थ ॥४५॥ एभिर्न्नः ॥ एभिर्न्नोऽअर्कैर्भवानोऽअ
र्वाङ्क्स्वर्ण्णज्ज्योतिः ॥ अग्नेविश्श्वेभिःसुमनाऽअनीकैः ॥ ४६ ॥
अग्निर्होतारम ॥ अग्निर्होतारम्मन्न्येदास्वन्तंव्वसुंसूनुंसहं
सोजातवेदसंव्विप्प्रन्नजातवेदसम् ॥ यऽऊर्ध्वयास्वध्वरोदेवोदेवाच्च्याकृ

पा ॥ घृतस्याग्निब्भ्राष्टिमनुवाष्टिशोचिषाजुह्वानस्यसर्पिषः ॥ ४७ ॥
अग्नेत्त्वम् ॥ अग्नेत्त्वन्नोऽअन्तमऽउतत्त्राताशिवोभवावरूत्थ्यः ॥ व
सुरग्निर्व्वसुश्श्रवाऽअच्छानक्षिद्युमत्तमꣳरयिन्दाः । तन्त्वाशोचिष्ठदी
दिवःसुम्म्नायनूनमीमहेसखिब्भ्यः ॥ ४८ ॥ [२९] येनऽऋषयः ॥
येनऽऋषयस्तपसासत्रमायन्निन्धानाऽअग्निꣳस्वराभरन्तः ॥ तस्मि
न्नहन्निदधेनाकेऽअग्निꣳयमाहुम्मनवस्तीण्णबर्हिषम् ॥ ४९ ॥ त
म्पत्त्नीभिः ॥ तम्पत्त्नीभिरनुगच्छेमदेवाःपुत्त्रैब्भ्रातृभिरुतवाहिर
ण्यैः ॥ नाकङ्गृब्भ्णानाःसुकृतस्यलोकेतृतीयेपृष्ठेऽअधिरोचनेदिवः ।

॥ ५० ॥ आवाचꣳ ॥ ॥ आवाचोमद्ध्यमरुहद्भुरण्युरयमग्निःसत्प
तिश्चेकितानꣳ ॥ पृष्ठेपृथिव्यानिहितोदविद्युतदधस्पदङ्कृणुतांस्येपृ
तन्यवं÷ ॥ ५१ ॥ अयमग्निः ॥ अयमग्निर्व्वीरतमोवयोधाꣳसहस्रि
योंद्योततामप्प्रंयुच्छन् । विभ्भ्राजमानꣳसरिरस्यमद्ध्यऽउपप्प्रयांहि
दिव्यानिधाम ॥ ५२ ॥ सम्प्रच्यवद्ध्वमुप ॥ सम्प्रयाताग्नेपथोदेवया
नांकृणुद्ध्वम् ॥ पुनं÷कृण्वानापितरायुवानान्वाताꣳसीत्त्वयितन्तुमे
तम् ॥ ५३ ॥ उद्बुद्ध्यस्व ॥ उद्बुद्ध्यस्वाग्नेप्प्रतिजागृहित्त्वमिष्टापूर्त्ते सꣳ
सृंजेथामयञ्च ॥ अस्मिन्सधस्थेऽअद्ध्युत्तरस्मिन्विश्वेदेवायज

मानश्चसीदत॥५४॥येनव्वहसि ॥ येनव्वहसिसहस्रꣳयेनाग्ग्नेसर्व्ववेदस
म्॥तेनेमꣳयज्ञन्नोनयस्वर्द्देवेषुगन्तवे ॥ ५५ ॥ अयन्ते ॥ अयन्तेयोनि
ॠत्त्वियोयतोजातोऽअरोचथाः ॥ तञ्जानन्नग्ग्नऽआरोहाथानोव्वर्द्धयार
यिम् ॥ ५६ ॥ [८] तपश्च ॥ तपश्चतपस्यश्चशैशिरावृतूऽअग्ग्नेर
न्तःश्लेषोसिकल्पेतान्द्यावापृथिवीकल्पन्तामापऽओषधयःकल्प
न्तामग्ग्नयःपृथङ्ममज्ज्यैष्ठ्यायसव्व्रताः ॥ येऽअग्ग्नयःसमनसान्त
राद्यावापृथिवीऽइमे ॥ शैशिरावृतूऽअभिकल्पमानाऽइन्द्रमिवदेवाऽ
अभिसंव्विशन्तुतयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम् ॥ ५७ ॥ परमेष्ठी

त्त्वां । सादयतुदिवस्प्पृष्ठेज्ज्योतिष्म्मतीम् ॥ व्विश्श्वस्म्मैप्प्राणायापा
नायंव्व्यानायव्विश्श्वञ्ज्योतिर्य्यच्छ ॥ सूर्य्यस्तेधिपतिस्त्तयादेवतया
ङ्गिरस्वद्ध्रुवासीद ॥ ५८ ॥ लोकम्पृण ॥ लोकम्पृणच्छिद्द्रम्पृणाथोसी
दद्ध्रुवात्त्वम् ॥ इन्द्राग्ग्नीत्त्वाबृहस्प्पतिरस्म्मिन्न्योनावसीषदन् ॥५९॥
ता ऽअस्य ॥ ता ऽअस्यसूददोहसःसोमꣳश्रीणन्तिपृश्न्नयः ॥ जन्न्मन्दे
वानांव्विशस्त्त्रिष्ष्वारोचनेदिवः ॥ ६० ॥ इन्द्रंव्विश्श्वाः ॥ इन्द्रंव्वि
श्श्वा ऽअवीवृधन्त्समुद्द्रव्व्यचसङ्गिरः ॥ रथीतमꣳरथीनांव्वाजानाꣳस
त्त्पतिम्पतिम् ॥ ६१ ॥ प्रोथदश्श्वः ॥ प्रोथदश्श्वोनयवसेव्विष्ष्यन्न्यदा

म॒हः॒सँ॒व्वर॑णा॒द्व्यस्त्था॑त् ॥ आद॑स्य॒व्वातो॒ऽअनु॑वातिशो॒चिरध॑स्मते॒
व्र॒जं॑नङ्कृ॒ष्णम॑स्ति ॥ ६२ ॥ आ॒यो॒ष्ट्वा॑ ॥ आ॒यो॒ष्ट्वा॒सद॑नेसाद
या॒म्म्य॒वत॑श्छा॒याया॑ꣳसमु॒द्रस्य॒हृद॑ये ॥ र॒श्मी॒वती॒म्भास्व॑ती॒माया
द्याम्भा॑स्यापृ॑थि॒वीमो॒र्व्व॒न्तरि॑क्षम् ॥ ६३ ॥ प॒र॒मे॒ष्ठीत्त्वा॑ । सा
दयतु॒दि॒वस्पृ॒ष्ठेव्यच॑स्वती॒म्प्रथ॑स्वती॒न्दिवं॑यच्छ॒दि॒वन्दृ॑ꣳह॒दि॒वम्मा
हि॑ꣳसीः ॥ विश्व॑स्म्मैप्प्रा॒णाया॑पा॒नाय॑व्व्या॒नायो॑दा॒नाय॑प्प्रति॒ष्ठायै॑
च॒रित्त्रा॑य ॥ सूर्य्य॑स्त्वा॒भिपा॑तुम॒ह्यास्व॒स्त्याच्छ॒र्दि॑षा॒शन्त॑मेन॒त
या॑दे॒वत॑याङ्गिर॒स्वद्ध्रु॒वेसी॑दतम् ॥६४॥ स॒हस्र॑स्यप्प्र॒मासि ॥ स॒हस्र॑स्य

प्प्रमासिसुहस्त्रंस्यप्प्रतिमासिसुहस्त्रंस्युन्मासिंसाहस्त्रोसिसुहस्त्रांय
त्वा ॥ ६५ ॥ [९] इतिश्रीवाजसनेयसंहितायांपञ्चदशोऽ
ध्यायः ॥ १५ ॥ नमस्तेषोडश हिरण्यबाहवे उष्णीषिणे तक्षभ्यो
ज्येष्ठाय पञ्चकाः स्त्रुत्त्यायचतस्त्रः शम्भवायैका पार्यायपञ्च द्रापेऽ
अन्धसोविꣳशतिः नव षट्षष्टिः ॥ हरिः ॐनमंस्ते॥नमंस्तेरुद्रमुन्न्यवंऽ
उतोतुऽइषवेनमं÷ ॥ बाहुब्भ्यांमुततेनमं÷॥ १ ॥ याते॥यातेरुद्रशिवातु
नूरघोरापांपकाशिनी ॥ तयांनस्तुन्न्वाशन्तंमयागिरिंशन्ताभिचांक
शीहि ॥ २ ॥ यामिषुम् ॥ यामिषुङ्गिरिशन्तुहस्तेंबिभर्ष्यंस्तवे ॥

शिवाङ्गिरित्त्रताङ्कुरुमाहिꣳसीःपुरुषञ्जगत् ॥ ३ ॥ शिवेनवचसा ॥
शिवेनवचसात्त्वागिरिशाच्छावदामसि ॥ यथानःसर्वमिज्जगदयक्ष्म
ꣳसुमनाऽअसत् ॥ ४ ॥ अद्ध्यवोचत् ॥ अद्ध्यवोचदधिवक्ताप्प्रथ
मोदैव्योभिषक् ॥ अहीꣳश्चसर्वाञ्जम्भयन्त्सर्वाश्चयातुधान्योधरा
चीःपरासुव ॥ ५ ॥ असौयः ॥ असौयस्ताम्म्रोऽअरुणऽउतबभ्रुःसु
मङ्गलः ॥ येचैनꣳरुद्राऽअभितोदिक्षुश्श्रिताःसहस्रशोवैषाꣳहेडऽईम
हे ॥ ६ ॥ असौयः ॥ असौयोवसर्प्पतिनीलग्ग्रीवोविलोहितः ॥ उ
तैनङ्गोपाऽअदृश्श्रन्नदृश्श्रन्नुदहार्य्यःसदृष्टोमृडयातिनः ॥ ७ ॥ न

मोस्तु ॥ नमोस्तुनीलग्ग्रीवायसहस्राक्षायमीढुषे ॥ अथोयेऽअ
स्यसत्त्वानोहन्तेब्भ्योकरन्नमः ॥ ८ ॥ प्रमुञ्च ॥ प्रमुञ्चधन्न्वन
स्त्वमुभयोरात्क्न्योर्ज्ज्याम् ॥ याश्च्चतेहस्तऽइषवःपराताभगवोव्वप ॥
॥ ९ ॥ व्विज्ज्यन्धनुः ॥ व्विज्ज्यन्धनुःकपर्द्दिनोव्विशल्ल्योबाण
वाँ२ ऽउत ॥ अनेशन्नस्ययाऽइषवऽआभुरस्यनिषङ्गधिः ॥ १० ॥
याते ॥ यातेहेतिम्मीढुष्टमहस्त्तेबभूवतेधनुः ॥ तयास्स्मान्विश्श्व
तस्त्वमयक्ष्मयापरिभुज ॥ ११ ॥ परिते ॥ परितेधन्न्वनोहेतिर
स्स्मान्व्वृणक्तुव्विश्श्वतः ॥ अथोयऽइषुधिस्तव्वारेऽअस्स्मन्निधेहितम् ॥

॥ १२ ॥ अवुतत्त्युधनु ॥ अवुतत्त्युधनुष्ट्वꣳसहंस्राक्षुशतेंषुधे ॥ निशीर्य्यंशुल्ल्यानाम्मुखांशिवानं÷सुमनांभव ॥ १३ ॥ नमंस्ते ॥ नमस्तेऽआयुंधायानांततायधृष्णवें ॥ उभाब्भ्यांमुततेनमोंबाहुब्भ्यान्तवुधन्न्वंने ॥ १४ ॥ मानं÷ ॥ मानोंमुहान्तंमुतमानोंऽअर्ब्भुंकम्मानुऽउक्षंन्तमुतमानंऽउक्षितम् ॥ मानोंव्वधीꣳपितरुम्मोतंमातरुम्मानं÷प्प्रियास्तन्न्वोरुद्द्ररीरिषꣳ ॥ १५ ॥ मानंस्तोके ॥ मानंस्तोकेतनंयेमानुऽआयुंषिमानोगोषुमानोऽअश्श्वेंषुरीरिषꣳ ॥ मानोंव्वीरान्न्रुद्द्रभामिनोंव्वधीर्हविष्म्मन्तꣳसदमित्त्वाहवामहे ॥१६॥ [१६] शतम् ८००

नमोहिरण्यबाहवे ॥ नमोहिरण्यबाहवेसेनान्न्येदिशाञ्चपतयेनमो
नमोवृक्षेब्भ्योहरिकेशेब्भ्यःपशूनाम्पतयेनमोनमःशष्पिञ्जरायत्त्वि
षीमतेपथीनाम्पतयेनमोनमोहरिकेशायोपवीतिनेपुष्टानाम्पतयेनमो
नमोबब्भ्लुशाय ॥ १७ ॥ नमोबब्भ्लुशायव्व्याधिनेन्नानाम्पत
येनमोनमोभवस्यहेत्यैजगताम्पतयेनमोनमोरुद्द्रायाततायिनेक्षेत्त्रा
णाम्पतयेनमोनमःसूतायाहन्त्यैव्वनानाम्पतयेनमोनमोरोहिताय ॥
॥ १८ ॥ नमोरोहिताय । स्थपतयेवृक्षाणाम्पतयेनमोनमोभुवन्तयेव्वा
रिवस्कृतायौषधीनाम्पतयेनमोनमोमन्त्रिणेव्वाणिजायकक्षाणाम्पत

य॒नमो॒नम॑ऽउ॒च्चैर्घो॒षाया॑क्र॒न्दय॑ते पत्ती॒नाम्पत॑ये॒नमो॒नम॑ः कृ॒त्स्नाय॒
तया॑ ॥ १९ ॥ नम॑ः कृ॒त्स्नाय॒तया॒ ॥ धाव॑ते स॒त्त्व॑ना॒म्पत॑ये॒नमो॒न
म॒ऽस्सह॑मानाय निव्या॒धिन॑ऽआव्या॒धिनी॑ना॒म्पत॑ये॒नमो॒नमो॑ निष॒ङ्गिणे॑
ककु॒भाय॑ स्ते॒नाना॒म्पत॑ये॒नमो॒नमो॑ निचे॒रवे॑ परिच॒राया॒रण्ण्या॑ना॒म्पत॑
ये॒नमो॒नमो॒व्वञ्च॑ते ॥ २० ॥ नमो॒व्वञ्च॑ते । परि॒वञ्च॑ते स्ता॒यूना
म्पत॑ये॒नमो॒नमो॑ निष॒ङ्गिण॑ऽइषुधि॒मते॑ तस्क॑राणा॒म्पत॑ये॒नमो॒नम॑ः सृ
का॒यिभ्यो॒ जिघा॑ᳪसद्भ्यो मु॒ष्ण्ण॒ताम्पत॑ये॒नमो॒नमो॑ऽसि॒मद्भ्यो॒नक्क॒ञ्च
र॑द्भ्यो॒व्विकृ॒न्ताना॒म्पत॑ये॒नम॑ः ॥ २१ ॥ [५] नम॑ऽउ॒ष्ण्णीषिणे॑ । गि

रिचरायकुलुञ्चानाम्पतयेनमोनमऽइषुमद्भ्योधन्वायिभ्यश्चवोन
मोनमऽआतन्वानेभ्यःप्रतिदधानेभ्यश्चवोनमोनमऽआयच्छ
द्भ्योऽस्यद्भ्यश्चवोनमोनमोविसृजद्भ्यः ॥ २२ ॥ नमोविसृजद्भ्योवि
द्ध्यद्भ्यश्चवोनमोनमःस्वपद्भ्योजाग्रद्भ्यश्चवोनमोनमःशयाने
भ्यऽआसीनेभ्यश्चवोनमोनमस्तिष्ठद्भ्योधावद्भ्यश्चवोनमोनमः
सभाभ्यः ॥ २३ ॥ नमःसभाभ्यः । सभापतिभ्यश्चवोन
मोनमोऽश्वेभ्योऽश्वपतिभ्यश्चवोनमोनमऽआव्याधिनीभ्योवि
विद्ध्यन्तीभ्यश्चवोनमोनमऽउगणाभ्यस्तृꣳहतीभ्यश्चवोनमोन

Nepal Sanskrit University, Balmiki Campus, Kathmandu

मोगणेभ्यः ॥ २४ ॥ नमोगणेभ्यो । गणपतिभ्यश्चवोनमोनमोव्रातेभ्योव्रातपतिभ्यश्चवोनमोनमोगृत्सेभ्योगृत्सपतिभ्यश्चवोनमोनमोविरूपेभ्योविश्वरूपेभ्यश्चवोनमोनमःसेनाभ्यः ॥ २५ ॥ नमःसेनाभ्यः । सेनानिभ्यश्चवोनमोनमोरथिभ्योऽअरथेभ्यश्चवोनमोनमःक्षत्तृभ्यःसङ्ग्रहीतृभ्यश्चवोनमोनमोमहद्भ्योऽअर्भकेभ्यश्चवोनमः ॥ २६ ॥ [५] नमस्तक्षभ्यः ॥ नमस्तक्षभ्योरथकारेभ्यश्चवोनमोनमःकुलालेभ्यःकर्मारेभ्यश्चवोनमोनमोनिषादेभ्यःपुञ्जिष्ठेभ्यश्चवोनमोनमः

श्वनिभ्योमृगयुभ्यश्चवोनमोनमःश्वभ्यः ॥ २७ ॥ नमःश्व
भ्यः ॥ श्वपतिभ्यश्चवोनमोनमोभवायचरुद्रायचनमःशर्वायच
पशुपतयेचनमोनीलग्ग्रीवायचशितिकण्ठायचनमःकपर्दिने ॥२८॥
नमःकपर्दिने ॥ चव्युप्तकेशायचनमःसहस्राक्षायचशतधन्वनेच
नमोगिरिशयायचशिपिविष्टायचनमोमीढुष्टमायचेषुमतेचनमोह्र
स्वाय ॥ २९ ॥ नमोह्रस्वाय । चव्वामनायचनमोबृहतेचव्वर्षीयसे
चनमोवृद्धायचसवृधेचनमोग्ग्र्यायचप्प्रथमायचनमऽआशवे ॥३० ॥
नमऽआशवे । चाजिरायचनमःशीग्घ्र्यायचशीभ्यायचनमऽ

ऊर्म्म्या॑यचावस्व॒न्न्या॑यच॒नमो॑नादे॒याय॑चद्वी॒प्प्या॑यच ॥ ३१ ॥
[५] नमो॑ज्ज्ये॒ष्ठाय॑ । चकनि॒ष्ठाय॑च॒नम॑÷पूर्व्व॒जाय॑चापर॒जाय॑
च॒नमो॑मद्ध्य॒माय॑चापग॒ल्भाय॑च॒नमो॑जघ॒न्न्या॑यचबु॒द्ध्न्या॑यच॒नम॒ः
सो॒भ्या॑य ॥ ३२ ॥ नम॒ःसो॒भ्या॑यच । प्प्रतिस॒र्य्या॑यच॒नमो॑
याम्म्या॑यच॒क्षेम्म्या॑यच॒नम॒ꣳश्श्लोक्क्या॑यचावसा॒न्न्या॑यच॒नम॑ऽउर्व्व॒
र्य्या॑यच॒खल्ल्या॑यच॒नमो॒वन्न्या॑य ॥ ३३ ॥ नमो॒वन्न्या॑य । च॒कक्क्ष्या॑
यच॒नम॑÷श्श्र॒वाय॑चप्प्रति॒श्श्र॒वाय॑च॒नम॑ऽआ॒शुषे॑णायचा॒शुर॑थायच॒न
म॒ꣳशूरा॑यचावभे॒दिने॑च॒नमो॑बि॒ल्म्मिने॑ ॥ ३४ ॥ नमो॑बि॒ल्म्मिने॑च

क॒व॒चिने॑च॒नमो॑व्व॒र्म्मिणे॑चव्व॒रू॒थिने॑च॒नम॑÷श्श्रु॒ताय॑चश्श्रु॒तसे॒नाय॑च॒न
मो॑दु॒न्दु॒भ्याय॑चाहन॒न्याय॑च॒नमो॑धृ॒ष्ण्ण॒वे॑ ॥ ३५ ॥ नमो॑धृ॒ष्ण्ण॒वे॑ ।
च॒प्प्र॒मृ॒शाय॑च॒नमो॑नि॒ष॒ङ्गिणे॑चेषु॒धि॒मते॑च॒नम॑स्ती॒क्ष्णेष॑वे॒चायु॒धिने॑च॒
नम॑÷स्वा॒यु॒धाय॑चसु॒धन्व॑नेच ॥ ३६ ॥ [५] नम॒ऽंस्रु॒त्त्याय॑ । च॒
प॒त्थ्याय॑च॒नम॒ऽंकाट्ट्याय॑च॒नी॒प्प्याय॑च॒नम॒ऽंकु॒ल्ल्याय॑चसर॒स्याय॑च॒
नमो॑नादे॒याय॑चवैश॒न्ताय॑च॒नम॒ऽंकू॒प्प्याय॑ ॥ ३७ ॥ नम॒ऽंकू॒प्प्या
य । चाव॒ट्ट्याय॑च॒नमो॒व्वीद्ध्र्याय॑चात॒प्प्याय॑च॒नमो॒मेग्घ्याय॑चाव्वि
द्यु॒त्त्याय॑च॒नमो॒व्वर्ष्ष्याय॑चाव॒र्ष्ष्याय॑च॒नमो॒व्वात्त्याय॑ ॥ ३८ ॥

न॒मो॒वात्त्या॑य । च॒रेष्म्म्या॑यच॒नमो॑वास्त॒व्व्या॑यच॒वास्त॒पा॑यच॒नम॒ः
सोमा॑यचरु॒द्रा॑यच॒नम॑स्ता॒म्म्रा॑यचारु॒णा॑यच॒नम॑ःश॒ङ्ग्वे॑ ॥ ३९ ॥ न
म॑ःश॒ङ्ग्वे॑ । चप॒शुप॑तयेच॒नम॑ऽउ॒ग्ग्रा॑यभी॒मा॑यच॒नमो॑ग्ग्रेव॒धा॑यचदू॒रे
व॒धा॑यच॒नमो॑ह॒न्त्रेच॒हनी॑यसेच॒नमो॑वृ॒क्षेब्भ्यो॒हरि॑केशेब्भ्यो॒नम॑स्ता॒
रा॑य ॥ ४० ॥ [४] नम॑ःशम्भ॒वा॑य ॥ नम॑ःशम्भ॒वा॑यचमयो॒भ॒वा॑य
च॒नम॑ःशङ्क॒रा॑यचमयस्क॒रा॑यच॒नम॑ःशि॒वा॑यचाशि॒वत॑रायच ॥ ४१ ॥
[१] न॒मः॒पार्य्या॑य । चावा॒र्य्या॑यच॒नम॑ःप्प्र॒त॑रणायचो॒त्त॑रणा
यच॒नम॒स्तीर्त्थ्या॑यच॒कूल्ल्या॑यच॒नम॒ःशष्प्प्या॑यच॒फेन्न्या॑यच॒नम॑ः

सिकत्त्याय ॥ ४२ ॥ नमःसिकत्त्याय । चप्प्रवाह्यायचनमःकिꣳ
शिलायचक्षयणायचनमःकपर्द्दिनेचपुलस्तयेचनमऽइरिण्यायचप्प्र
पत्थ्यायचनमोव्व्रज्ज्याय ॥ ४३ ॥ नमोव्व्रज्ज्याय । चगोष्ठ्या
यचनमस्तल्प्यायचगेह्यायचनमोहृदय्यायचनिवेष्ष्प्यायचनमः
काट्ट्यायचगह्वरेष्ठायचनमःशुष्क्याय ॥ ४४ ॥ नमःशुष्क्याय । चह
रित्त्यायचनमः पाꣳसव्यायचरजस्यायचनमोलोप्प्यायचोलप्प्या
यचनमऽऊर्व्व्यायचसूर्व्यायचनमःपर्ण्याय ॥ ४५ ॥ नमःपर्ण्याय ।
चपर्ण्णशदायचनमऽउद्गुरमाणायचाभिग्घ्नतेचनमऽआखिदतेचप्प्र

खिद॒तेच॒नम॑ऽइषु॒कृद्भ्यो॑धनु॒ष्कृद्भ्य॑श्चवो॒नमो॒नमो॑वꣳकिरि॒केभ्यो॑दे॒
वाना॒ꣳहृद॑येभ्यो॒नमो॑व्विचिन्व॒त्केभ्यो॒नमो॑व्विक्षिण॒त्केभ्यो॒नम॑ऽ
आनिर्ह॒तेभ्यः॑ ॥ ४६ ॥ [५] द्रापे॒ऽअन्ध॑सꣳ ॥ द्रापे॒ऽअन्ध॑
सस्पते॒दरि॑द्र॒नील॑लोहित ॥ आ॒साम्प्र॒जाना॑मे॒षाम्प॑शू॒नाम्माभे॒र्म्मा
रो॒ङ्मोच॑न॒ꣳकिञ्च॒नाम॑मत् ॥ ४७ ॥ इ॒मारु॒द्राय॑ । त॒वसे॑कप॒र्द्दिने॑क्ष॒
यद्वी॑राय॒प्रभ॑रामहेम॒तीः ॥ यथा॒शम॑सद्वि॒पदे॒चतुष्पदे॒विश्व॑म्पु॒ष्टङ्ग्रा
मे॑ऽअ॒स्मिन्न॑नातु॒रम् ॥ ४८ ॥ याते॑ ॥ रु॒द्रशि॒वात॒नूःशि॒वाव्वि॒श्वा
हा॑भेष॒जी ॥ शि॒वारु॒तस्य॑भेष॒जीतया॑नोमृडजी॒वसे॑ ॥ ४९ ॥ परि॑

नुः ॥ परिनोरुद्रस्यहेतिर्व्वृणक्तुपरित्त्वेषस्यदुर्म्मतिरघायोः ॥ अव
स्त्थिरामघवद्भ्यस्त्तनुष्ष्वमीढ्वस्त्तोकायतनयायमृड ॥ ५० ॥ मी
ढुष्टमशिवतम । शिवोनः सुमनाभव ॥ परमेव्वृक्षऽआयुधन्निधाय
कृत्तिंव्वसानऽआचरपिनाकम्बिभ्रदागहि ॥ ५१ ॥ व्विकिरिद्द्रवि
लोहित । नमस्त्तेऽअस्तुभगवः ॥ यास्त्तेसहस्रꣳहेतयोन्यमस्म्मन्नि
वपन्तुताः ॥ ५२ ॥ सहस्राणिसहस्रशः ॥ सहस्राणिसहस्रशोबा
ह्वोस्त्तवहेतयः ॥ तासामीशानोभगवःपराचीनामुखाकृधि ॥ ५३ ॥
असंख्यातासहस्राणि । येरुद्राऽअधिभूम्म्याम् ॥ तेषाꣳसहस्र

Nepal Sanskrit University, Balmiki Campus, Kathmandu

योज॒नेव॒धन्न्वा॑नितन्न्मासि ॥ ५४ ॥ अ॒स्मिन्न्म॑ह॒ति ॥ अ॒स्मिन्न्म
ह॒त्त्य॒र्ण॒वे॒न्तरि॑क्षेभ॒वा॒ऽअधि॑ ॥ तेषा॑ꣳसहस्रयोज॒नेव॒धन्न्वा॑नितन्न्म
सि ॥ ५५ ॥ नील॑ग्ग्रीवाःशिति॒कण्ठाः ॥ नी॒ल॑ग्ग्रीवाःशिति॒कण्ठा॒
दिवं॑ꣳरु॒द्राऽउप॑श्रिताः । तेषाँ॑ꣳसहस्रयोज॒नेव॒धन्न्वा॑नितन्न्मसि ॥
॥ ५६ ॥ नील॑ग्ग्रीवाःशिति॒कण्ठाः । श॒र्वाऽअ॒धःक्ष॑मा॒च॒राः ॥ ते
षा॑ꣳसहस्रयोज॒नेव॒धन्न्वा॑नितन्न्मसि ॥ ५७ ॥ येवृ॒क्षेषु॒ । श॒ष्पिप्प॒ञ्ज
रा॒नील॑ग्ग्रीवा॒विलो॑हिताः ॥ तेषा॑ꣳसहस्रयोज॒नेव॒धन्न्वा॑नितन्न्मसि ॥
॥ ५८ ॥ येभूताना॑म् ॥ येभूता॒नाम॑धिपतयोविशि॒खासः॑कप॒र्दिनः ॥

तेषा॑ᳫंसहस्रयोज॒नव॒धन्वा॑नितन्मसि ॥ ५९ ॥ येप॒थाम् ॥ येप॒था
म्पा॑थि॒रक्ष॑यऽऐलबृ॒दाऽआ॑यु॒र्युध॑ः ॥ तेषा॑ᳫंसहस्रयोज॒नेव॒धन्वा॑नित
न्मसि ॥ ६० ॥ येती॒र्त्थानि॑ । प्प्र॒चर॑न्तिसृ॒काह॑स्तानिष॒ङ्गिण॑ः ॥ ते
षा॑ᳫंसहस्रयोज॒नेव॒धन्वा॑नितन्मसि ॥ ६१ ॥ येऽन्ने॑षु । वि॒विद्ध्य॑न्ति
पात्त्रे॑षु॒पिब॑तो॒जना॑न् ॥ तेषा॑ᳫंसहस्रयोज॒नेव॒धन्वा॑नितन्मसि ॥ ६२ ॥
यऽए॒ताव॑न्तऽं॥यऽए॒ताव॑न्तश्च॒भू॒या॑ᳫंसश्च॒दिशो॑रु॒द्द्राव्वि॑तस्त्थि॒रे ॥ते
षा॑ᳫंसहस्रयोज॒नेव॒धन्वा॑नितन्मसि ॥ ६३ ॥ नमो॑स्तु । रु॒द्द्रेब्भ्यो॒
येदि॒वियेषा॑व्व॒र्षमिष॑वऽं ॥ तेब्भ्यो॒दश॒प्प्राची॒र्द्दश॑दक्षि॒णादश॑प्प्र॒तीची॒

द्दिशोदीचीर्द्दिशोर्द्ध्वाः ॥ तेब्भ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुते
यन्द्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदद्ध्मः ॥ ६४ ॥ नमोस्तु । रुद्द्रे
ब्भ्योयेन्तरिक्षेयेषांव्वातऽइषवः ॥ तेब्भ्योदशप्प्राचीर्द्दशदक्षिणादश
प्प्रतीचीर्द्दशोदीचीर्द्दशोर्द्ध्वाः ॥ तेब्भ्योनमोऽअस्तुतेनोवन्तुतेनोमृड
यन्तुतेयन्द्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदद्ध्मः ॥ ६५ ॥ नमो
स्तु । रुद्द्रेब्भ्योयेपृथिव्व्यांय्येषामन्नमिषवः ॥ तेब्भ्योदशप्प्राचीर्द्द
शदक्षिणादशप्प्रतीचीर्द्दशोदीचीर्द्दशोर्द्ध्वाः ॥ तेब्भ्योनमोऽअस्तुते
नोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदद्ध्मः ॥

॥ ६६ ॥ [२०] इति श्रीवाजसनेयसंहितायांषोडशोऽध्या
यः ॥ १६ ॥ अश्मन्नूर्जँदशनमस्तेपश्चाग्निस्तिग्मेननवच्चक्षुषःपिता
ष्टावाशुःशिशानःसप्तदशोदेनंक्रमध्वमाग्निनापश्चदशकौशुक्रज्योतिःस
प्तेमꣳस्तनंत्रयोदशननैकोनशतम् ॥ हरिः ॐअश्म्मन्नूर्ज्जँम् ॥ अश्म्म॒
न्नूर्ज्जम्पर्व्वतेशिश्रि॒याणाम॒द्भ्य॒ऽओषधीभ्यो॒व्वन॒स्पतिभ्यो॒ऽअधि॒स
म्भृ॒तम्पयः ॥ तान्न॒ऽइष॒मूर्ज्जँन्धत्तमरुतꣳसꣳर॒राणाऽअश्म्मँस्तेक्षु
न्मयित॒ऽऊर्ग्ग्र्यान्द्वि॒ष्ष्मस्तन्ते॒शुगृंच्छतु ॥ १ ॥ इ॒मामे । अग्न॒ऽ
इष्टकाधे॒नवंःस॒न्त्वेकांच॒दशंच॒दशंचश॒तश्चंश॒तश्चंस॒हस्रंश्चस॒हस्रंश्चा

युतंश्चायुतंश्चनियुतंश्चानियुतंश्चप्प्रयुतश्चार्बुदञ्चन्न्यर्बुदश्चसमुद्रश्चम
ध्यञ्चान्तंश्चपरार्द्धश्चैतामेऽअग्नऽइष्टकाधेनवःसन्त्वमुत्रामुष्मिँम
ल्लोके ॥२॥ ऋतवंस्स्थ॥ऋतवंस्स्थऽऋतावृधंऽऋतुष्ठास्स्थंऋतावृधः॥
घृतश्चुतोमधुश्चुतोविराजोनामकामदुघाऽअक्षीयमाणाः ॥ ३ ॥
समुद्रस्यत्त्वा ॥ समुद्रस्यत्त्वावकयाग्नेपरिव्ययामसि ॥ पावकोऽ
अस्म्मभ्यꣳशिवोभव ॥ ४ ॥ हिमस्यत्त्वा ॥ जरायुणाग्नेपरि
व्ययामसि ॥ पावकोऽअस्म्मभ्यꣳशिवोभव ॥ ५ ॥ उपज्ज्मन् ॥
उपज्ज्मन्नुपवेतसेवतरनदीष्ष्वा ॥ अग्नेपित्तमपामसिमण्डूकिता

भिरागहिसेमन्नोयज्ञम्पावकवर्णꣳशिवङ्कृधि ॥ ६ ॥ अपामिदम् ॥
अपामिदन्न्ययनꣳसमुद्रस्यनिवेशनम् ॥ अन्याँस्तेऽअस्मत्तपन्तु
हेतयः पावकोऽअस्मभ्यꣳशिवोभव ॥ ७ ॥ अग्नेपावक । रो
चिषामन्द्रयादेवजिह्वया ॥ आदेवान्वक्षियक्षिच ॥ ८ ॥ सनः ॥
पावकदीदिवोग्नेदेवाँ२ ऽइहावह ॥ उपयज्ञꣳहविश्चनः ॥ ९ ॥
पावकयायः ॥ पावकयायश्चितयन्त्याकृपाक्षामन्रुरुचऽउषसोन
भानुना ॥ तूर्वन्नयामन्नेतशस्यनूरणऽआयोघृणेनततृषाणोऽअजरः ॥
॥ १० ॥ [१०] नमस्ते ॥ नमस्तेहरसेशोचिषेनमस्तेऽअस्त्व

र्च्चिषे ॥ अन्न्याँस्त्तेऽअस्म्मत्तपन्तुहेतयः÷पावको ऽअस्म्मब्भ्यꣳशि
वोभव ॥ ११ ॥ नृषदेवेट् ॥ नृषदेवेडप्प्सुषदेवेड्बर्हिषदेवेड्वनसदेवे
ड्स्वर्व्विदेवेट् ॥ १२ ॥ येदेवाः ॥ येदेवादेवानांय्यज्ञियायज्ञियाना
ꣳसंव्वत्सरीणमुपभागमासते ॥ अहुतादोहविषोयज्ञेऽअस्म्मिन्त्स्वय
म्पिबन्तुमधुनोघृतस्य ॥ १३ ॥ येदेवाः ॥ येदेवादेवेष्वधिदेवत्त्व
मायन्न्येब्ब्रह्मणःपुरऽएतारोऽअस्य ॥ येब्भ्योनऽऋतेपवतेधामकिञ्च
ननतेदिवोनपृथिव्व्याऽअधिस्नुषु ॥ १४ ॥ प्राणदाऽअपानदाः ॥
प्राणदाऽअपानदाव्व्यानदाव्वर्च्चोदावरिवोदाः ॥ अन्न्याँस्त्तेऽअस्म्मत्तप

न्तुहेतयं÷पावकोऽअस्मभ्यꣳशिवोभव ॥ १५ ॥ [१५] अग्ने
स्तिग्ममेनं । शोचिषायासद्विश्श्वन्न्युत्त्रिणम् ॥ अग्निन्नोंव्वनतेरयि
म् ॥ १६ ॥ यऽइमा । व्विश्श्वाभुवनानिजुह्वदृषिर्होतान्न्यसीदत्पि
तानं÷ ॥ सऽआशिषाद्द्रविणमिच्छमानःप्प्रथमच्छदवराꣳ ऽआ
व्विवेश ॥ १७ ॥ किꣳस्विदासीदधिष्ठानमारम्भणङ्कतमस्स्वित्क
थासीत् ॥ यतोभूमिञ्जनयन्विश्श्वकर्म्माव्विद्यामौर्णोन्महिनाव्विश्श्व
चक्षाःऽ ॥ १८ ॥ व्विश्श्वतश्श्चक्षुरुत । व्विश्श्वतोमुखोव्विश्श्वतोबाहु
रुतव्विश्श्वतस्प्पात् ॥ सम्बाहुब्भ्यान्धमतिसम्पतत्त्रैर्द्यावाभूमीज

नयन्देवऽएकः ॥ १९ ॥ किꣳस्वित ॥ किꣳस्विद्वनङ्कऽउस
वृक्षऽआसयतोद्यावापृथिवीनिष्टतक्षुः ॥ मनीषिणोमनसापृच्छतेदुत
द्यदध्यतिष्ठद्भुवनानिधारयन् ॥ २० ॥ याते ॥ यातेधामानिपरमा
णियावमायामध्यमाविश्वकर्म्मन्नुतेमा ॥ शिक्षासखिभ्योहवि
षिस्वधावः स्वयꣳयजस्वतन्वंवृधानः ॥ २१ ॥ विश्वकर्म्मन्हवि
षा। वावृधानः स्वयꣳयजस्वपृथिवीमुतद्याम् ॥ मुह्यन्त्वन्येऽअ
भितःसपत्नाऽइहास्म्माकम्मघवासूरिरस्तु ॥ २२ ॥ वाचस्प
तिम् ॥ वाचस्पतिंविश्वकर्म्माणमूतयेमनोजुवंवाजेऽअद्याहुवेम ॥

सनोव्विश्वानिहवनानिजोषद्विश्वशम्भूरवसेसाधुकर्म्मा ॥ २३ ॥
व्विश्वकर्म्मन्हविषा । वर्द्धनेनत्रातरमिन्द्रमकृणोरवद्ध्यम् ॥
तस्म्मैव्विशःसमनमन्तपूर्व्वीरयमुग्ग्रोव्विहव्योयथासत् ॥ २४ ॥
[९] चक्षुषःपिता । मनसाहिधीरोघृतमेनेऽअजनन्नम्म्नमाने ॥
यदेदन्ताऽअददृहन्तपूर्व्वऽआदिद्द्यावापृथिवीऽअप्प्रथेताम् ॥ २५ ॥
व्विश्वकर्म्माव्विमनाः ॥ व्विश्वकर्म्माव्विमनाऽआद्विहायाधाताव्वि
धातापरमोतसन्दृक् ॥ तेषामिष्टानिसमिषामदन्तियत्रासप्तऽऋषी
न्परऽएकमाहुः ॥ २६ ॥ योनः । पिताजनितायोव्विधाताधामा

निर्व्वेदभुवनानिविश्श्वा ॥ योदेवानान्नामधाऽएकऽएवतꣳसम्प्रश्नम्भु
वनायन्त्यन्न्या ॥ २७ ॥ तऽआयजन्तद्रविणꣳसमस्म्माऽऋषयः
पूर्व्वेजरितारोनभूना ॥ असूर्त्तेसूर्त्तेरजसिनिषत्तेयेभूतानिसमकृण्व
न्निमानि ॥ २८ ॥ परोदिवा । परऽएनापृथिव्व्यापरोदेवेभिरसुरैर्य्य
दस्ति ॥ कꣳस्विद्गर्ब्भम्प्रथमन्दध्रऽआपोयत्रदेवाःसमपश्श्यन्तपू
र्व्वे ॥ २९ ॥ तमित् ॥ तमिद्गर्ब्भम्प्रथमन्दध्रऽआपोयत्रदेवाःसमग
च्छन्तविश्श्वे ॥ अजस्स्यनाभावद्ध्येकमर्प्पितंय्यस्म्मिन्विश्श्वानि
भुवनानितस्त्थुः ॥ ३० ॥ नतम् ॥ नतंविदाथयऽइमाजजानान्न्य

युष्म्माकमन्तरम्बभूव ॥ नीहारेणप्प्रावृताजल्प्याचासुतृपऽउक्थ
शासश्चरन्ति ॥ ३१ ॥ विश्श्वकर्म्माहि ॥ विश्श्वकर्म्माह्यजनिष्ट
देवऽआदिद्गन्धर्वोऽअभवद्द्वितीयः ॥ तृतीयःपिताजनितौषधीनाम
पाङ्गर्भंव्यदधात्पुरुत्रा ॥ ३२ ॥ [८] आशुःशिशानोवृषभोनभी
मोघनाघनःक्षोभणश्चर्षणीनाम् ॥ सङ्क्रन्दनोनिमिषऽएकवीरःशतꣳ
सेनाऽअजयत्साकमिन्द्रः ॥ ३३ ॥ सङ्क्रन्दनेनानिमिषेण । जिष्णु
नायुत्कारेणदुश्च्यवनेनधृष्णुना ॥ तदिन्द्रेणजयततत्सहद्ध्वंयुधो
नरऽइषुहस्तेनवृष्ण्णा ॥ ३४ ॥ सऽइषुहस्तैः ॥ सऽइषुहस्तैःसनि

षङ्गिभिर्वशीसꣳस्रष्टासयुधऽइन्द्रोगणेन ॥ सꣳसृष्टजित्सोमपाबा
हुशर्द्ध्युग्ग्रधन्वाप्प्रतिहिताभिरस्ता ॥ ३५ ॥ बृहस्प्पतेपरि । दी
य्यारथेनरक्षोहामित्राँ२ऽअपबाधमानः ॥ प्प्रभञ्जन्त्सेनाःप्प्रमृ
णोयुधाजयन्नस्माकमेद्ध्यवितारथानाम् ॥ ३६ ॥ बलविज्ञायस्त्थ
विरः ॥ बलविज्ञायस्त्थविरःप्प्रवीरःसहस्वान्वाजीसहमानऽउग्ग्रः॥
अभिवीरोऽअभिसत्त्वासहोजाजैत्त्रमिन्द्ररथमातिष्ठगोवित् ॥ ३७ ॥
गोत्त्रभिदङ्गोविदम् ॥ गोत्त्रभिदङ्गोविदंवज्ज्रबाहुञ्जयन्तमज्ज्मंप्प्र
मृणन्तमोजसा ॥ इमꣳसजाताऽअनुवीरयद्ध्वमिन्द्रꣳसखायोऽअ

नु॒सꣳर॑भद्ध्व॒म् ॥ ३८ ॥ अ॒भिगो॒त्त्राणि॑ ॥ अ॒भिगो॒त्त्राणि॒सह॑सा॒गाह॑मा
नो॒द॒योव्वी॒रःश॒तम॑न्यु॒रिन्द्र॑ः ॥ दु॒श्च्य॒व॒नःपृ॑तना॒षाड॑यु॒द्ध्योस्माक॒
ꣳसेना॑ऽअवतु॒प्प्रयु॒त्त्सु ॥ ३९ ॥ इन्द्र॑ऽआसाम् ॥ इन्द्र॑ऽआसान्ने॒ता
बृह॒स्पति॒र्द्दक्षि॑णाय॒ज्ञःपु॒रऽए॑तु॒सोम॑ः ॥ दे॒व॒से॒नाना॑मभिभञ्ज॒ती॒ना
ञ्जय॑न्तीनाम्म॒रुतो॑य॒न्त्वग्ग्र॑म् ॥ ४० ॥ इन्द्र॑स्य॒वृष्ण्ण॑ः ॥ इन्द्र॑स्य॒
वृष्ण्णो॒व्वरु॑णस्य॒राज्ञ॑ऽआदि॒त्त्याना॑म्म॒रु॒ताꣳशर्द्ध॑ऽउ॒ग्ग्रम् ॥ म॒हाम॑
नसाम्भु॒वन॒च्च्यु॒वाना॒ङ्घोषो॑दे॒वाना॒ञ्जय॑ता॒मुद॑स्त्थात् ॥ ४१ ॥ उद्ध॑
र्षय । म॒घव॒न्नायु॑धान्यु॒त्सत्त्व॑नाम्मामु॒काना॒म्मना॑ꣳसि ॥ उद्वृ॑

संहि. त्रहन्वाजिनांव्वाजिनान्युद्रथानाञ्जयतांय्यन्तुघोषाः ॥ ४२ ॥ अ
॥१३३॥ स्म्माकमिन्द्रःसमृतेषुध्वजेष्वस्म्माकंय्याऽइषवस्ताजयन्तु ॥ अ
स्म्माकंव्वीराऽउत्तरेभवन्त्वस्म्माँ२ ऽउन्देवाऽअवताहवेषु ॥ ४३ ॥
अमीषाञ्चित्त । म्प्रतिलोभयन्तीगृहाणाङ्गान्यप्वेपरेहि ॥ अ
भिप्प्रेहिनिर्दहहृत्सुशोकैरन्धेनामित्रास्तमसासचन्ताम् ॥ ४४ ॥
अवसृष्टापरा । पतशरव्येब्रह्मसꣳशिते ॥ गच्छामित्रान्प्रप
पू.अ. द्यस्वमामीषाङ्कञ्चनोच्छिषः ॥ ४५ ॥ प्रेत ॥ प्रेताजयतानरऽइन्द्रो
१७ वःशर्म्मय्यच्छतु ॥ उग्रावःसन्तुबाहवोनाधृष्याय्यथासथ ॥ ४६ ॥

असौया । सेनामरुतःपरेषामभ्यैतिनओजसास्पर्द्धमाना ॥ ताङ्गूहततमसापव्रतेनयथामीऽअन्योऽअन्यन्नजानन् ॥ ४७ ॥ यत्र बाणाः । सम्पतन्तिकुमाराविशिखाऽइव ॥ तन्नऽइन्द्रोबृहस्पतिरदितिःशर्म्मयच्छतुव्विश्श्वाहाशर्म्मयच्छतु ॥ ४८ ॥ मर्म्माणिते ॥ मर्म्माणितेव्वर्म्मणाच्छादयामिसोमस्त्वाराजामृतेनानुवस्ताम् ॥ उरोर्व्वरीयोव्वरुणस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु ॥ ॥ ४९ ॥ [१७] उदेनम् ॥ उदेनमुत्तरान्नयाग्नेघृतेनाहुत ॥ रायस्पोषेणसꣳसृजप्प्रजयाचबहुङ्कृधि ॥५०॥ शतम् १००॥इन्द्रेमम् ॥ इन्द्रे

मम्प्रंतुरान्नंयसजातानांमसद्दृशी ॥ समैनुंब्वर्च्चंसासृजदेवानांम्भागुदाऽअंसत् ॥५१॥ यस्यंकुम्र्मः ॥ यस्यंकुम्म्मोगृहेह्वविस्त्तमंग्ग्नेव्वर्द्धयात्वम् ॥ तस्म्मैदेवाऽअधिंब्ब्रुवन्नुयञ्चब्ब्रह्मणस्प्पतिः ॥ ५२ ॥ उदुत्त्वा ॥ उदुंत्त्वाव्विश्श्वेदेवाऽअग्ग्नेभरंन्तुचित्तिभिः ॥ सनोभवाशिवस्त्वꣳसुप्प्रतीकोव्विभावसुः ॥ ५३ ॥ पञ्चदिशः ॥ पञ्चदिशोदैवीर्य्यज्ञमंवन्तुदेवीरपामंतिन्दुर्म्मतिम्बाधमानाः ॥ रायस्प्पोषेयज्ञपतिमाभजंन्तीरायस्प्पोषेऽअधियज्ञोऽअंस्त्थात् ॥ ५४ ॥ समिद्धेऽअग्नौ ॥ समिद्धेऽअग्नावधिमामहानऽउक्थपत्त्रऽईड्योगृभीतः ॥ तु

स्तङ्घर्म्मम्परिगृह्यायजन्तोर्ज्जायद्यज्ञमयजन्तदेवाः ॥ ५५ ॥ दैव्यायधर्त्रे ॥ जोष्ट्रेदेवश्श्रीःश्श्रीमनाःशतपयाः ॥ परिगृह्यदेवायज्ञमायन्देवादेवेभ्योऽअध्वर्य्यन्तोऽअस्थुः ॥ ५६ ॥ वीतꣳहविः । शमितꣳशमितायजध्यैतुरीयोयज्ञोयत्रहव्यमेति ॥ ततोवाकाऽआशिषोनोजुषन्ताम् ॥ ५७ ॥ सूर्य्यरश्मिर्हरिकेशःपुरस्तात्सविताज्ज्योतिरुदयाँ२ ऽअजस्रम् ॥ तस्यपूषाप्प्रसवेयातिविद्वान्त्सम्पश्यन्विश्वा भुवनानिगोपाः ॥ ५८ ॥ विमानःऽएषः ॥ विमानऽएषदिवोमध्यऽआस्तऽआपप्प्रिवान्रोदसीऽअन्तरिक्षम् ॥ सविश्वाचीरभिचष्टे

घृताचीरन्तरापूर्व्वमपरश्चकेतुम् ॥ ५९ ॥ उक्षासमुद्रः ॥ उक्षासमु
द्रोऽअरुणःसुपर्णःपूर्व्वस्ययोनिम्पितुराविवेश ॥ मद्ध्येदिवोनिहितः
पृश्निरश्मा विचक्रमेरजसस्पात्यन्तौ ॥ ६० ॥ इन्द्रंविश्वाः ॥ इ
न्द्रंविश्वाऽअवीवृधन्त्समुद्रव्यचसङ्गिरः ॥ रथीतमꣳरथीनांवाजा
नाꣳसत्त्पतिम्पतिम् ॥ ६१ ॥ देवहूर्य्यज्ञः ॥ देवहूर्य्यज्ञऽआच
वक्षत्सुम्नहूर्य्यज्ञऽआचवक्षत् ॥ यक्षदग्निर्देवोदेवाꣳ ऽआचवक्ष
त् ॥ ६२ ॥ वाजस्यमा । प्प्रसवऽउद्ग्राभेणोदग्ग्रभीत् ॥ अधास
पत्त्नानिन्द्रोमेनिग्ग्राभेणाधराꣳ अकः ॥ ६३ ॥ उद्ग्राभञ्च । नि

ग्राभश्चब्रह्मदेवाऽअवीवृधन् ॥ अधासपत्नाँनिन्द्राग्नीमेविषूचीना
न्व्यस्यताम् ॥ ६४ ॥ [१५] क्रमध्वमग्निना ॥ क्रमध्वमग्निनाना
कमुख्यꣳहस्तेषुबिभ्रतः ॥ दिवस्पृष्ठꣳस्वर्ग्गत्वामिश्रादेवेभि
राध्वम् ॥ ६५ ॥ प्राचीमनु । प्रदिशम्प्रेहिविद्वानग्नेरग्नेपुरोऽअ
ग्निर्भवेह ॥ विश्वाऽआशादीद्यानोविभाह्यूर्ज्जन्नोधेहिद्विपदेचतुष्प
दे ॥ ६६ ॥ पृथिव्याऽअहम् ॥ पृथिव्याऽअहमुदन्तरिक्षमारुह
मन्तरिक्षाद्दिवमारुहम् ॥ दिवोनाकस्यपृष्ठात्स्वर्ज्ज्योतिरगामहम् ॥
॥ ६७ ॥ स्वर्य्यन्तः ॥ स्वर्य्यन्तोनापेक्षन्तऽआद्याꣳरोहन्तिरोद

सी ॥ यज्ञंयेविश्वतोधारꣳसुविद्वाꣳसोवितेनिरे ॥ ६८ ॥ अग्ने
प्प्र ॥ अग्नेप्प्रेहिप्प्रथमोदेवयताञ्चक्षुर्देवानामुतमर्त्यानाम् ॥ इयक्ष
माणाभृगुभिः सजोषाःस्वर्यन्तुयजमानाःस्वस्ति ॥ ६९ ॥ न
क्तोषासा ॥ नक्तोषासासमनसाविरूपेधापयेतेशिशुमेकꣳसमीची ॥
द्यावाक्षामारुक्मोऽअन्तर्विभातिदेवाऽअग्निन्धारयन्द्रविणोदाः ॥
॥ ७० ॥ अग्नेसहस्राक्ष । शतमूर्द्धञ्छतन्तेप्प्राणाःसहस्रंव्यानाः ॥
त्वꣳसाहस्रस्यरायऽईशिषेतस्मैतेविधेमवाजायस्वाहा ॥ ७१ ॥
सुपर्ण्णोसि । गरुत्मान्पृष्ठेपृथिव्याःसीद ॥ भासान्तरिक्षमापृण

ज्ज्योतिषादिवमुत्तंभानुतेजंसादिशऽउद्दृँह ॥ ७२ ॥ आजुह्वानःसु
प्प्रतीकः । पुरस्त्तादग्ग्नेस्वँयोनिमासीदसाधुया ॥ अस्म्मिन्त्सध
स्त्थेऽअद्ध्युत्तरस्म्मिन्विश्श्वेदेवायजमानश्चसीदत ॥ ७३ ॥ ताँ
सवितुः ॥ ताँसवितुर्व्वरेण्ण्यस्यचित्त्रामाहंव्वृणेसुमतिंव्विश्श्वजन्न्या
म् ॥ यामस्यकण्ण्वोऽअदुहत्प्रपीनाँसहस्रधाराम्पयसामहीङ्गाम् ॥
॥ ७४ ॥ विधेमते । परमेजन्न्मन्नग्ग्नेविधेमस्तोमैरवरेसधस्त्थे ॥ य
स्म्माद्योनेरुदारिथायजेतम्प्रत्वेहवीँषिजुहुरेसमिद्धे ॥ ७५ ॥ प्रे
द्धोऽअग्ग्ने । दीदिहिपुरोनोजस्त्रयासूर्म्म्यायविष्ठ ॥ त्त्वाँशश्वन्तऽउ

पंयन्तिव्वाजांऽ ॥ ७६ ॥ अन्ग्नेतम् ॥ अग्ग्नेतमुद्याऽश्श्वन्नस्त्तोमैंःक्क्रतु
न्नभुद्द्रᳪंहृंदिस्प्पृशंम् ॥ ऋद्ध्यामांतुऽओहैंः ॥७७॥ चित्तिञ्जुहोमि ॥
च्चित्तिञ्जुहोमिमनंसाघृतेनुयथांदेवाऽइहागमंन्वीतिहोत्त्राऽऋतावृधंः॥
पत्त्युंव्विश्श्वंस्युभूमंनोजुहोमिव्विश्श्वकंर्म्मणेव्विश्श्वाहादांब्भ्यᳪंहुविः ॥
॥ ७८ ॥ सुप्प्तते । अग्ग्नेसुमिधंःसुप्प्तजिह्वाःसुप्प्तऽऋषंयःसुप्प्तधामं
प्प्रियाणिं ॥ सुप्प्तहोत्त्राᳪंःसप्प्तुधात्त्वांयजन्तिसुप्प्तयोनीरापृंणस्वघृते
नुस्वाहां ॥ ७९ ॥ [१५] शुक्क्रज्ज्योतिश्च्च । चित्त्रज्ज्योतिश्श्चसुत्त्य
ज्ज्योतिश्श्चुज्ज्योतिष्म्मांश्च ॥ शुक्क्रश्च्चऽऋतुपाश्च्चात्त्यᳪंहाः ॥ ८० ॥

ईदृङ्च ।। ईदृङ्चान्यादृङ्चसदृङ्चप्प्रतिसदृङ्च ।। मितश्चसम्मितश्चसभराः ।।
।। ८१ ।। ऋतश्च । सत्त्यश्चध्रुवश्चधरुणश्च ।। धर्त्ताचविधर्त्ताचवि
धारयः ।। ८२ ।। ऋतजिच्च । सत्त्यजिच्चसेनजिच्चसुषेणश्च ।।
अन्तिमित्रश्चदूरेऽअमित्रश्चगणः ।। ८३ ।। ईदृक्षासऽएतादृक्षा
सः ।। ईदृक्षासऽएतादृक्षासऽऊषुणःसदृक्षासःप्प्रतिसदृक्षासऽएतन ।।
मितासश्चसम्मितासोनोऽअद्यसभरसोमरुतोयज्ञेऽअस्मिन् ।।८४।।
स्वतवाँश्च । प्प्रघासीचसान्तपनश्चगृहमेधीच ।। क्रीडीचशाकी
चोज्जेषी ।। ८५ ।। इन्द्रन्दैवीः ।। इन्द्रन्दैवीर्व्विशोमरुतोनुवर्त्मानो

भवन्न्यथेन्द्रन्दैवीर्व्विशो मरुतोनुवर्त्मानोभवन् ॥ एवमिमंय्यजमा
नन्दैवीश्च व्विशो मानुषीश्चानुवर्त्मानोभवन्तु ॥ ८६ ॥ [७]
इमꣳस्तनम् ॥ इमꣳस्तनमूर्ज्जस्वन्तन्धयापाम्प्रपीनमग्ने सरिर
स्यमद्ध्ये ॥ उत्सञ्जुषस्वमधुमन्तमर्व्वन्त्समुद्द्रियꣳसदनमा विशस्व
॥ ८७ ॥ घृताम्मिमिक्षे ॥ घृतमस्ययोनिर्घृतेऽश्रितो घृतम्म्वस्यधाम ॥
अनुष्ष्वधमावहमादयस्वस्वाहाकृतंव्वृषभव्वक्षिहव्यम् ॥ ८८ ॥ समु
द्द्राद्दूर्म्मिः ॥ समुद्द्राद्दूर्म्मिर्म्मधुमाꣳ ऽउदारदुपाꣳशुनासममृतत्त्व
मानट् ॥ घृतस्यनामगुह्यंय्यदस्तिजिह्वादेवानाममृतस्यनाभिः ॥

॥ ८९ ॥ व॒यन्नाम ॥ व॒यन्नाम॒प्रब्र॑वामा घृ॒तस्या॒स्मिन्य॒ज्ञे धा॑रया
मा॒नमो॑भिः ॥ उप॑ब्र॒ह्मा शृ॑णवच्छ॒स्यमा॑नं॒ चतुः॑शृङ्गो॑ऽवमीद्गौ॒रऽएतत्
॥ ९० ॥ च॒त्वारि॒शृङ्गा॑ ॥ च॒त्वारि॒शृङ्गा॒त्रयो॑ऽअस्य॒पादा॒द्वेशी॒र्षे॑स॒प्त
हस्ता॑सोऽअस्य ॥ त्रिधा॑ब॒द्धो वृ॑ष॒भो रो॑रवीति म॒हो दे॒वो मर्त्या॒ँ२॥ऽआ
वि॑वेश ॥ ९१ ॥ त्रिधा॑हि॒तम् ॥ त्रिधा॑हि॒तम्प॒णिभि॑र्गु॒ह्यमा॑नं॒ग
वि॑दे॒वासो॑ घृ॒तमन्व॑विन्दन् ॥ इन्द्र॒ऽएक॒ꣳसूर्य्य॒ऽएकं॑जजानवे॒नादेकं॑
ꣳस्व॒धया॒निष्ट॑तक्षुः ॥ ९२ ॥ ए॒ताऽअ॑र्षन्ति ॥ ए॒ताऽअ॑र्षन्ति हृ॒द्या॑त्स
मु॒द्रा॒च्छ॒तव्र॑जा रि॒पुणा॒ नाव॒चक्षे॑ ॥ घृ॒तस्य॒ धारा॑ऽअ॒भिचा॑कशीमि हि॒

र॒ण्य्ययो॑व्वेत॒सोम॒ध्य॑ऽआसाम् ॥ ९३ ॥ स॒म्म्यक्क्स्त्र॑वन्ति । स॒रितो
नधेना॑ऽअ॒न्तर्हृ॒दामन॑सापू॒यमा॑नाः ॥ ए॒ते॑ऽअ॑र्षन्त्यू॒र्म्मयो॑घृ॒तस्य॑मृ॒
गाऽइ॑वक्षि॒प॒णोरीष॑माणाः ॥ ९४ ॥ सिन्धो॑रिवप्प्रा॒द्ध्व॒ने ॥ सिन्धो॑
रिवप्प्रा॒नद्ध्व॒नेशू॑घ॒नास॒ोव्वात॑प्प्रमियः पतयन्तिय॒ह्वाः ॥ घृ॒तस्य॒धारा॑ऽ
अ॒रु॒षोनव्वा॒जीकाष्ठा॑भि॒न्दन्नू॒र्म्मिभि॑ः पिन्व॑मानः ॥ ९५ ॥ अ॒भिप्र॑
वन्त ॥ अ॒भिप्र॑वन्तस॒म॑नेव॒योषाः॑कल्ल्या॒ण्ण्य॒ःस्म्मय॑मानासोऽअ॒
ग्निम् ॥ घृ॒तस्य॒धाराः॑स॒मिधो॑नसन्त॒ताजु॑षा॒णोह॑र्य्यतिजा॒तवे॑दाः ॥
॥ ९६ ॥ क॒न्न्याऽइवव्वह॒तुम् ॥ क॒न्न्याऽइवव्वह॒तुमेत॒वाऽउ॑ऽअ॒ञ्ज्य॑ञ्जाना

ऽअभिचाकशीमि ॥ यत्त्रसोमः सूयतेयत्त्रंयज्ञोघृतस्यधाराऽअभितत्त्प
वन्ते ॥९७॥ अभ्यर्षत । सुष्टुतिङ्गव्यमाजिमस्म्मासुभद्द्राद्रविणानिध
त्त॥इमंय्यज्ञन्नयतदेवतानोघृतस्यधारामधुमत्त्पवन्ते ९८॥धामन्ते॥
धामन्तेव्विश्श्वम्भुवनमधिश्श्रितमन्तःसमुद्द्रेहृद्द्यन्तरायुषि ॥ अपाम
नीकेसमिथेयऽआभृतस्त्तमश्यामधुमन्तन्तऽऊर्म्मिम् ॥९९॥[१३]
इति शुक्लयजुःसंहितायांसप्तदशोऽध्यायः ॥१७॥ श्रीगणेशायनमः॥
॥ वेदपुरुषायनमः ॥वाजःसत्त्यमृक्चर्चचतुष्काअश्माग्निस्त्रिकावर्ष्शुः
पञ्चैकाचतस्रोवाजायद्वेवाजस्यन्नवष्टावृताषाट्त्रयोदशाग्निंयुनज्मी

सप्तयदाकूताद्द्वात्रिंहत्त्यायदशकौत्रयोदशसप्तसप्तति: ॥ हार: ॐव्वाज
श्च । मेप्रसवश्चमेप्रयतिश्चमेप्रसितिश्चमेधीतिश्चमेक्रतुश्चमेस्वरश्च
मेःश्लोकश्चमेःश्रवश्चमेःश्रुतिश्चमेज्ज्योतिश्चमेस्वश्चमेयज्ञेनकल्प
न्ताम् ॥ १ ॥ प्राणश्च । मेपानश्चमेव्यानश्चमेसुश्चमेचित्तञ्चमऽआ
धीतञ्चमेव्वाक्चमेमनश्चमेचक्षुश्चमेःश्रोत्रञ्चमेदक्षश्चमेबलञ्चमेयज्ञेनक
ल्पन्ताम् ॥ २ ॥ ओजश्च । मेसहश्चमऽआत्माचमेतनूश्चमेशर्म्म
चमेव्वर्म्मचमेङ्गानिचमेस्त्थीनिचमेपरूंषिचमेशरीराणिचमऽआयु
श्चमेजराचमेयज्ञेनकल्पन्ताम् ॥ ३ ॥ ज्ज्यैष्ठ्यञ्च । मऽआधिपत्त्य

ञ्चमेम॒न्युश्च॑मे॒भाम॑श्च॒मेम॑श्च॒मेम्भ॑श्च॒मेजे॒माच॑मेमहि॒माच॑मेव्वरि॒
माच॑मेप्प्रथि॒माच॑मेव्वर्षि॒माच॑मेद्द्राघि॒माच॑मेव्वृ॒द्धञ्च॑मे॒व्वृद्धि॑श्च॒मेय॒ज्ञेन॑
कल्प्पन्ताम् ॥४॥ [४] स॒त्यञ्च॑। मेश्श्र॒द्धाच॑मे॒जग॑च्च॒मे॒धन॑ञ्च॒मे॒व्विश्व॑
ञ्चमे॒मह॑श्च॒मेक्क्रीडाच॑मे॒मोद॑श्च॒मेजा॒तञ्च॑मेजनि॒ष्यमा॑णञ्चमेसू॒क्तञ्च
मेसुकृ॒तञ्च॑मेय॒ज्ञेन॑कल्प्पन्ताम् ॥ ५ ॥ ऋ॒तञ्च॑। मे॒मृत॑ञ्च॒मेय॒क्ष्म
ञ्च॒मेनाम॑यच्च॒मेजी॒वातु॑श्च॒मेदी॒ग्घायु॒त्त्वञ्च॑मेनमि॒त्रञ्च॒मेभय॑ञ्च॒मेसु॒ख
ञ्च॑मे॒शय॑नञ्च॒मेसू॒षाश्च॑मेसु॒दिन॑ञ्च॒मेय॒ज्ञेन॑कल्प्पन्ताम् ॥ ६ ॥ य॒न्ता
च॑। मे॒धर्ता च॑मे॒क्षेम॑श्च॒मे॒धृति॑श्च॒मे॒व्विश्व॑ञ्च॒मे॒मह॑श्च॒मेसं॒व्विच्च॑मे॒ज्ञा

त्रञ्चमेसूश्चमेप्प्रसूश्चमेसीरञ्चमेलयश्चमेयज्ञेनकल्प्पन्ताम् ॥ ७ ॥
शञ्चमेमयश्चमेप्प्रियञ्चमेनुकामश्चमेकामश्चमेसौमनसश्चमेभग
श्चमेद्द्रविणञ्चमेभद्द्रञ्चमेश्रेयश्चमेव्वसीयश्चमेयशश्चमेयज्ञेनकल्प्प
न्ताम् ॥ ८ ॥ [४] ऊर्क्चँ । मेसूनृताचमेपयश्चमेरसश्चमेघृत
ञ्चमेमधुचमेसग्ग्धिश्चमेसपीतिश्चमेकृषिश्चमेव्वृष्टिश्चमेजैत्रञ्चमऽ
औद्भिद्यञ्चमेयज्ञेनकल्प्पन्ताम् ॥ ९ ॥ रयिश्चँ । मेरायश्चमेपुष्टञ्च
मेपुष्टिश्चमेव्विभुचमेप्प्रभुचमेपूर्णञ्चमेपूर्णतरञ्चमेकुयवञ्चमेक्षितञ्च
मेन्नञ्चमेक्षुञ्चमेयज्ञेनकल्प्पन्ताम् ॥ १० ॥ व्वित्तञ्चँ । मेव्वेद्यञ्चमेभूत

श्चं॑मेभवि॒ष्यच्चं॑मेसु॒गञ्चं॑मेसुप॒त्थ्यञ्चम॒ऽऋ॒द्धञ्चं॑म॒ऽऋद्धिं॑श्चमेक्लृ॒प्तञ्च॑
मे॒क्लृप्ति॑श्चमेम॒ति॑श्चं॑मेसुम॒ति॑श्चं॑मेय॒ज्ञेनं॑कल्पन्ताम् ॥ ११ ॥ व्री
ह॒यं॑श्च ॥ मे॒यवां॑श्चमे॒माषां॑श्चमे॒तिलां॑श्चमेमु॒द्गा॑श्चं॑मे॒खल्वां॑श्चमे
प्प्रि॒यङ्गं॑वश्च॒मेणं॑वश्चमेश्या॒माकां॑श्चमेनी॒वारां॑श्चमेगो॒धूमां॑श्चमेम॒सू
रां॑श्चमेय॒ज्ञेनं॑कल्पन्ताम् ॥ १२ ॥ [४] अश्म्मां॑च ॥ मे॒मृत्ति॑का
चमेगि॒रयं॑श्चमे॒पर्व्व॑ताश्चमे॒सिकं॑ताश्चमे॒वन॒स्प्पतं॑यश्चमे॒हिरं॑ण्यञ्च॒मे
यं॑श्चमेश्या॒मञ्चं॑मेलो॒हञ्चं॑मे॒सीसं॑श्चमे॒त्रपुं॑चमेय॒ज्ञेनं॑कल्पन्ताम् ॥
॥ १३ ॥ अ॒ग्निश्चं॑ । म॒ऽआपं॑श्चमेवी॒रुधं॑श्चम॒ऽओषं॑धयश्चमेकृष्ट

पच्छ्याश्चमेकृष्टपच्छ्याश्चमेग्ग्राम्म्याश्चमेपशवऽआरण्याश्चमेव्वित्तञ्च
मेव्वित्तिश्चमेभूतञ्चमेभूतिश्चमेयज्ञेनकल्पन्ताम् ॥ १४ ॥ व्वसु
च । मेव्वसतिश्चमेकर्म्मञ्चमेशक्तिश्चमेर्थश्चमऽएमश्चमऽइत्याचमे
गतिश्चमेयज्ञेनकल्पन्ताम् ॥ १५ ॥ [३] अग्निश्च ।
मऽइन्द्रश्चमेसोमश्चमऽइन्द्रश्चमेसविताचमऽइन्द्रश्चमेसरस्वतीचम
ऽइन्द्रश्चमेपूषाचमऽइन्द्रश्चमेबृहस्पतिश्चमऽइन्द्रश्चमेयज्ञेनकल्प
न्ताम् ॥ १६ ॥ मित्रश्च । मऽइन्द्रश्चमेव्वरुणश्चमऽइन्द्रश्चमे
धाताचमऽइन्द्रश्चमेत्त्वष्टाचमऽइन्द्रश्चमेमरुतश्चमऽइन्द्रश्चमेविश्वेच

मेदे॒वाऽइन्द्र॑श्चमेय॒ज्ञेन॑कल्पन्ताम् ॥ १७ ॥ पृ॒थि॒वीच॑ । म॒ऽइन्द्र॑
श्चमे॒ऽन्तरि॑क्षञ्चम॒ऽइन्द्र॑श्चमे॒द्यौश्च॑म॒इन्द्र॑श्चमे॒समा॑श्चम॒ऽइन्द्र॑श्चमे॒नक्ष
त्राणि॒चम॒ऽइन्द्र॑श्चमे॒दिश॑श्चम॒ऽइन्द्र॑श्चमेय॒ज्ञेन॑कल्पन्ताम् ॥ १८ ॥
[३] अ॒ꣳशुश्च॑ । मेर॒श्मिश्च॒मेदा॑भ्यश्च॒मेधि॑पतिश्चम॒ऽउपा॒ꣳशुश्च
मे॒न्तर्या॒मश्च॑म॒ऽऐन्द्रवाय॒वश्च॑मेमैत्रावरु॒णश्च॑म॒ऽआश्वि॒नश्च॑मेप्प्रति
प्प्रस्थान॑श्चमेशु॒क्रश्च॑मेम॒न्थीच॑मेय॒ज्ञेन॑कल्पन्ताम् ॥ १९ ॥ आ॒ग्र॒
यणश्च । मेवै॒श्वदे॒वश्च॑मेध्रु॒वश्च॑मेवै॒श्वान॒रश्च॑म॒ऽऐन्द्रा॒ग्नश्च॑मेम॒हावै॑
श्वदेवश्चमेमरुत्वतीया॑श्चमे॒निष्केवल्यश्चमेसावि॒त्रश्च॑मेसारस्व॒तश्च॑

मेपात्नीवतश्च मेहारियोजनश्च मेयज्ञेनकल्पन्ताम् ॥ २० ॥ स्रुचश्च । मेचमसाश्च मेवायव्यानिच मेद्रोणकलशश्च मेग्रावाणश्च मेधिषवणेचमेपूतभृच्च मऽआधवनीयश्च मेवेदिश्च मेबर्हिश्च मेऽवभृथश्च मेस्वगाकारश्च मेयज्ञेनकल्पन्ताम् ॥ २१ ॥ अग्निश्च । मेघर्म्मश्च मेर्कश्च मेसूर्य्यश्च मेप्राणश्च मेश्वमेधश्च मेपृथिवीचमेदितिश्च मेदितिश्च मेद्यौश्च मेङ्गुलयःशक्वरयोदिशश्च मेयज्ञेनकल्पन्ताम् ॥ २२ ॥ व्रतञ्च । मऽऋतवश्च मेतपश्च मेसंवत्सरश्च मेहोरात्रेऽऊर्वष्ठीवेबृह

द्रथन्त॒रे॑च॑मेय॒ज्ञेन॑कल्पन्ताम् ॥ २३ ॥ [५] एका॑च । मेति॒
स्रश्च॑मेति॒स्रश्च॑म॒पञ्च॑चम॒पञ्च॑चमेस॒प्तच॑मेस॒प्तच॑म॒नव॑चम॒नव॑चम॒
ऽएका॑दशचम॒ ऽ एका॑दशचमे॒त्रयो॑दशचम॒त्रयो॑दशचम॒पञ्च॑दशचम॒प
ञ्च॑दशचमेस॒प्तद॑शचमेस॒प्तद॑शचम॒नव॑दशचम॒नव॑दशचम॒ऽएक॑विꣳ
क॑विꣳशतिश्चम॒ऽएका॑विꣳशतिश्चमे॒त्रयो॑विꣳशतिश्चम॒त्रयो॑विꣳशति
श्चम॒पञ्च॑विꣳशतिश्चम॒पञ्च॑विꣳशतिश्चमेस॒प्ता॑विꣳशतिश्चमेस॒प्ता॑वि
ꣳशतिश्चम॒नवा॑विꣳशतिश्चम॒नव॑विꣳशतिश्चम॒ऽएक॑त्रिꣳशच्चम॒ऽएक॑
त्रिꣳशच्चम॒त्रया॑स्त्रिꣳशच्चमेय॒ज्ञेन॑कल्पन्ताम् ॥२४॥ चत॑स्रश्च । म॒ष्टौ

चमेष्टौचमेद्वादशचमेद्वादशचमेषोडशचमेषोडशचमेविꣳशतिश्चमे
विꣳशतिश्चमेचतुर्विꣳशतिश्चमेचतुर्विꣳशतिश्चमेष्टाविꣳशतिश्चमेष्टा
विꣳशतिश्चमेद्वात्रिꣳशच्चमेद्वात्रिꣳशच्चमेषट्त्रिꣳशच्चमेषट्त्रिꣳशच्चमे
चत्वारिꣳशच्चमेचत्वारिꣳशच्चमेचतुश्चत्वारिꣳशच्चमेचतुश्चत्वा
रिꣳशच्चमेष्टाचत्वारिꣳशच्चमेयज्ञेनकल्पन्ताम् ॥२५॥ त्र्यविश्च । मे
त्र्यवीचमेदित्यवाट्चमेदित्यौहीचमेपञ्चाविश्चमेपञ्चावीचमेत्रिवत्स
श्चमेत्रिवत्साचमेतुर्य्यवाट्चमेतुर्य्यौहीचमेयज्ञेनकल्पन्ताम्॥ २६॥प
ष्ठवाट् । मेपष्ठौहीचमऽउक्षाचमेवशाचमऽऋषभश्चमेवेहच्चमेनड्वाँश्च

मेधेनुश्चमेयज्ञेनकल्पन्ताम् ॥ २७ ॥ [४] व्वाजायस्वाहा ।
प्प्रसवायस्वाहापिजायस्वाहाक्क्रतवेस्वाहाव्वसवेस्वाहाहर्प्पतयेस्वाहा
ह्नेमुग्ग्धायस्वाहामुग्ग्धायव्वैनꣳशिनायस्वाहाव्विनꣳशिनऽआन्त्या
यनायस्वाहान्त्यायभौवनायस्वाहाभुवनस्यपतयेस्वाहाधिपतयेस्वा
हाप्प्रजापतयेस्वाहा ॥ इयन्तेराण्मित्त्राययन्तासियमनऽऊर्ज्जेत्त्वावृ
ष्ट्यैत्त्वाप्प्रजानान्त्वाधिपत्त्याय ॥ २८ ॥ आयुर्य्यज्ञेन । कल्पता
म्प्राणोयज्ञेनकल्पताञ्चक्षुर्य्यज्ञेनकल्पताꣳश्श्रोत्त्रंय्यज्ञेनकल्पतां
व्वाग्ग्यज्ञेनकल्पताम्मनोयज्ञेनकल्पतामात्त्मायज्ञेनकल्पताम्ब्र

संहि. ह्मायज्ञेनकल्प्पताञ्ज्योतिर्य्यज्ञेनकल्प्पताᳫस्वर्य्यज्ञेनकल्प्पताम्पृ
॥१४९॥ ष्ठंय्यज्ञेनकल्प्पतांय्यज्ञोयज्ञेनकल्प्पताम् ॥ स्तोमश्श्चयजुश्श्चऽऋक्च
सामचबृहच्चरथन्तरञ्च ॥ स्वर्द्देवाऽअगन्मामृताऽअभूमप्प्रजापतेः
प्प्रजाऽअभूमव्वेट्स्वाहा ॥ २९ ॥ [२] व्वाजस्यनु । प्प्रसवेमातरं
म्महीमदितिन्नामव्वचसाकरामहे ॥ यस्यामिदंव्विश्श्वम्भुवनमाविवे
शतस्यान्नोदेवःसविताधर्म्मसाविषत् ॥ ३० ॥ व्विश्श्वेऽअद्य । मरुतो
यू.अ. व्विश्श्वेऽऊतीव्विश्श्वेभवन्त्वग्नयःसमिद्धाः ॥ व्विश्श्वेनोदेवाऽअवसागम
१८ न्तुव्विश्श्वमस्तुद्रविणंव्वाजोऽअस्मे ॥ ३१ ॥ व्वाजोनः । सप्तप्प्रदि

श॒श्चत॑स्रोवापरा॒वत॑ः ॥ व्वाजो॑नो॒व्विश्वै॑र्द्दे॒वैर्द्धन॑सातावि॒हाव॑तु ॥ ३२॥
व्वाजो॑नः ॥ व्वाजो॑नोऽअ॒द्यप्प्रसु॑वाति॒दा॒नंव्वाजो॑दे॒वाꣳ ऽऋ॒तुभि॑ः
कल्प्पयाति ॥ व्वाजो॒हिमा॒सर्व्वँ॑वीरञ्ज॒जान॒व्विश्श्वा॒ऽआशा॒व्वाज॑पति
र्ज्जयेयम् ॥ ३३ ॥ व्वाज॑ःपु॒रस्ता॑त् ॥ व्वाज॑ःपु॒रस्ता॑दु॒तम॑द्ध्य॒तो
नो॒व्वाजो॑दे॒वान्ह॒विषा॑व्वर्द्धयाति ॥ व्वाजो॒हिमा॒सर्व्वँ॑वीरञ्च॒कार॒सर्व्वा॒ऽ
आशा॒व्वाज॑पति॒र्ब्भवेयम् ॥ ३४ ॥ सम्मा॑ । सृजामि॒पय॑सापृथि॒व्याः
सम्मा॑सृ॒जाम्म्य॒द्भिरोष॑धीभिः ॥ सो॒हंव्वाज॑ꣳसनेयमग्ग्ने ॥ ३५ ॥ प
य॑ःपृथि॒व्याम् ॥ पय॑ःपृथि॒व्याम्पय॒ऽओष॑धीषु॒पयो॑दि॒व्य॒न्तरि॑क्षे॒पयो

धाः ॥ पयस्वतीः प्प्रदिशः सन्तुमह्यम् ॥ ३६ ॥ देवस्यत्त्वा । स
वितुः प्प्रसवेश्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम् ॥ सरस्वत्यैव्वा
चोयन्तुर्य्यन्त्रेणाग्नेः साम्म्राज्ज्येनाभिषिञ्चामि ॥ ३७ ॥ [८ ॥ ऋ
ताषाडृतधामा ॥ ऋताषाडृतधामाग्निर्ग्गन्धर्व्वस्तस्यौषधयोप्प्सर
सोमुदोनाम ॥ सनऽइदम्ब्रह्मक्षत्रम्पातुतस्म्मैस्वाहाव्वाट्ताब्भ्युःस्वा
हा ॥ ३८ ॥ सꣳहितोव्विश्वसामा । सूर्य्योगन्धर्व्वस्तस्यमरीच
योप्प्सरसऽआयुवोनाम ॥ सनऽइदम्ब्रह्मक्षत्रम्पातुतस्म्मैस्वाहाव्वा
ट्ताब्भ्युःस्वाहा ॥ ३९ ॥ सुषुम्म्णःसूर्य्यरश्म्मिः ॥ सुषुम्म्णःसु

ठ्यँरश्मिम्मश्चुन्द्रमांगन्धुर्व्वस्त्तस्युनक्षंत्त्राण्यप्प्सुरसौंभेकुरंयुोनामं ॥
सनंऽइदम्ब्रह्मंक्षुत्त्रम्पांतुतस्म्मैस्वाहुाव्वाट्ताभ्म्युंऽस्वाहां ॥ ४० ॥
इषिुरोव्विुश्श्वव्यंचाः ॥ इषिुरोव्विुश्श्वव्यंचुाव्वातोंगन्धुर्व्वस्त्तस्यापोंऽ
अप्प्सुरसुऽऊज्जौंनामं ॥ सनंऽइदम्ब्रह्मंक्षुत्त्रम्पांतुतस्म्मैस्वाहुाव्वा
ट्ताभ्म्युंऽस्वाहां ॥ ४१ ॥ भुज्ज्युःसुंपुर्णः ॥ भुज्ज्युःसुंपुण्णौंयुज्ञोगं
न्धुर्व्वस्त्तस्युदक्षिंणाऽअप्प्सुरसंस्त्तुावानामं ॥ सनंऽइदम्ब्रह्मंक्षुत्त्र
म्पांतुतस्म्मैस्वाहुाव्वाट्ताभ्म्युंऽस्वाहां ॥ ४२ ॥ प्रुजापंतिर्व्विंश्श्वकर्म्मुां
मनोंगन्धुर्व्वस्त्तस्यंऽऋक्कसुामान्न्यंप्प्सुरसुऽएष्ट्टंयुोनामं ॥ सनंऽइदम्ब्र

ह्मम॑क्ष॒त्रम्पा॑तु त॒स्म्मै॒स्वाहा॒व्वाट्ता॒भ्य॒ःस्वाहा॑ ॥ ४३ ॥ सनः॑ ॥ सनो॑भु
व॒नस्य॒पते॒प्प्र॒जाप॒ते॒यस्य॑त॒ऽउ॒परि॑गृ॒हायस्य॑वे॒ह ॥ अ॒स्म्मै॑ब्र॒ह्म॑णे॒स्मै॑
क्ष॒त्राय॒महि॒शर्म्म॑यच्छ॒स्वाहा॑ ॥ ४४ ॥ स॒मु॒द्रो॑सि॒नभ॑स्वाना॒र्द्रदा॑नुःश॒
म्भूर्म्म॑यो॒भूर॒भिमा॑व्वाहि॒स्वाहा॑मा॒रु॒तो॑सि॒म॒रुता॑ङ्ग॒णः ॥ श॒म्भूर्म्म॑
यो॒भूर॒भिमा॑व्वाहि॒स्वाहा॑व॒स्यूर॑सि॒दुव॑स्वा॒ञ्छ॒म्भूर्म्म॑यो॒भूर॒भिमा॑व्वाहि
स्वाहा॑ ॥ ४५ ॥ यास्ते॑ । ऽअग्ने॒सूर्य्ये॒रुचो॒दिव॑मात॒न्वन्ति॑र॒श्मिभि॑
भिः ॥ ताभि॑र्नोऽअ॒द्यसर्वा॑भीरु॒चेजना॑यनस्कृधि ॥ ४६ ॥ याव॑ः ॥
यावो॑दे॒वाःसूर्य्ये॒रुचो॒गो॒ष्वश्वे॑षु॒यारुच॑ः ॥ इन्द्रा॑ग्नी॒ताभि॒ःसर्वा॑

भीरुचंन्नोधत्तबृहस्प्पते ॥ ४७ ॥ रुचंन्नऽ ॥ रुचंन्नोधेहिब्ब्राह्मणेषुरुचᳪराजंसुनस्कृधि ॥ रुचंव्विश्श्वेषुशूद्रेषुमयिंधेहिरुचारुचम् ॥ ॥ ४८ ॥ तत्त्वा । यामिब्ब्रह्मणाव्वन्दमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोव्वरुणेहबोद्ध्युरुशᳪसमानऽआयुःप्प्रमोषीः ॥ ४९ ॥ स्वर्ण । घर्म्मःस्वाहास्वर्णार्क्कःस्वाहास्वर्णशुक्रःस्वाहास्वर्णज्ज्योतिःस्वाहास्वर्णसूर्य्यःस्वाहा ॥ ५० ॥ [१३] अग्ग्निंय्युनज्ज्म ॥ अग्ग्निंय्युनज्ज्मिशवसाघृतेनदिव्व्यᳪसुपर्ण्णंव्वयसाबृहन्तम् ॥ तेनंव्वयङ्गमेमब्ब्रध्नस्यविष्टपᳪस्वोरुहाणाऽअधिनाकमुत्तम

म् ॥ ५१ ॥ शतम् ॥ १००० ॥ इमौते । पक्षावजरौपतत्रिणौ
याभ्याꣳरक्षाꣳस्यपहꣳस्यग्ने ॥ ताभ्याम्पतेमसुकृतामुलो
कंयत्रऽऋषयोजग्मुःप्प्रथमजाःपुराणाः ॥ ५२ ॥ इन्दुर्दक्षः ।
श्येनऽऋतावाहिरण्यपक्षꣳशकुनोभुरण्युः ॥ महान्त्सधस्थेध्रुवऽ
आनिषत्तोऽनमस्त्तेऽअस्तुमामाहिꣳसीः ॥ ५३ ॥ दिवोमूर्द्धा
सिपृथिव्यानाभिरूर्गपामोषधीनाम् ॥ विश्वायुꣳशर्म्मसप्प्रथान
मस्प्पथे ॥ ५४ ॥ विश्वस्यमूर्द्धन् ॥ विश्वस्यमूर्द्धन्नधितिष्ठसि
श्रितःसमुद्रेतेहृदयमप्प्स्वायुरपोदत्तोदधिम्भिन्त ॥ दिवस्पर्ज्जन्या

दन्तरिक्षात्पृथिव्यास्ततोनोवृष्ट्याव ॥ ५५ ॥ इष्टोयज्ञः ॥ इष्टोयज्ञोभृगुभिराशीर्दावसुभिः ॥ तस्यनऽइष्टस्यप्प्रीतस्यद्द्रविणेहागमेः ॥ ॥ ५६ ॥ इष्टोऽअग्निः ॥ इष्टोऽअग्निराहुतꣳपिपत्तुनऽइष्टꣳहविः ॥ स्वगेदन्देवेभ्योनमः ॥ ५७ ॥ [७] यदाकूतात् ॥ यदाकूतात्समसुस्रोद्धृदोवामनसोवासम्भृतञ्चक्षुषोवा ॥ तदनुप्प्रेतसुकृतामुलोकंय्यत्रऽऋषयोजग्मुःप्प्रथमजाःपुराणाः ॥ ५८ ॥ एतꣳसधस्त्थपरितेददामियमावहाच्छेवधिञ्जातवेदाः ॥ अन्वागन्तायज्ञपतिर्वोऽअत्रतꣳस्मञ्जानीतपरमेव्योमन् ॥ ५९ ॥ एतञ्जानाथ । परमेव्योम

न्देवाꣳसधस्त्थाविदद्रूपमस्य ॥ यदागच्छात्त्पथिभिर्द्देवयानैरिष्टा
पूर्त्तङ्कृणवाथाविरस्मै ॥ ६० ॥ उद्बुद्ध्यस्व ॥ उद्बुद्ध्यस्वाग्ग्नेप्प्रति
जागृहित्त्वमिष्टापूर्त्तेसꣳसृजेथामयञ्च ॥ अस्मिन्त्सधस्त्थेऽअद्ध्यु
त्तरस्मिन्विश्श्वेदेवायजमानश्चसीदत ॥ ६१ ॥ येनवहसि । सह
स्रंयेनाग्ग्नेसर्ववेदसम् ॥ तेनेमंयज्ञन्नोनयस्वर्द्देवेषुगन्तवे ॥ ६२ ॥
प्रस्तरेणपरिधिना । स्रुचावेद्याचबर्हिषा ॥ ऋचेमंयज्ञन्नोनयस्वर्द्दे
वेषुगन्तवे ॥ ६३ ॥ यद्दत्तम् ॥ यद्दत्तंयत्त्परादानंयत्त्पूर्त्तंयाश्चद
क्षिणाः ॥ तदग्ग्निर्वैश्श्वकर्म्मणःस्वर्द्देवेषुनोदधत् ॥ ६४ ॥ यत्रधाराः ॥

यत्र॒धारा॒ऽअन॑पेता॒मधो॑र्ग्घृ॒तस्य॑च॒याः ॥ तद॒ग्निर्वै᳚श्वकर्म्म॒णः॒स्व॑र्द्दे॒वेषु॑नोदधत् ॥ ६५ ॥ अ॒ग्निर॑स्मि॒ ॥ अ॒ग्निर॑स्मि॒जन्म॑नाजा॒तवे॑दा॒घृ॒तम्मे॒चक्षु॑र॒मृत॑म्म॒ऽआ॒सन् ॥ अ॒र्क्कस्त्रि॒धातू॒रज॑सो॒वि॒मानो॒ज॑स्रो॒घ॒र्म्मो॑ह॒विर॑स्मि॒नाम॑ ॥ ६६ ॥ ऋ॒चो॒नाम॑ ॥ ऋ॒चो॒नामा॑स्मि॒यजू॒ꣳषि॒नामा॑स्मि॒सामा॑नि॒नामा॑स्मि ॥ ये॑ऽअ॒ग्नय॒ःपाञ्च॑जन्या॒ऽअ॒स्याम्पृ॑थि॒व्यामधि॑ ॥ तेषा॑मसि॒त्त्वमु॑त्त॒मःप्प्रनो॑जी॒वात॑वेसुव ॥ ६७ ॥ [१०] वार्त्र॑हत्त्याय॒शव॑से । पृत॒नाषाह्या॑यच ॥ इन्द्र॒त्त्वाव॑र्त्त॑यामसि ॥ ६८ ॥ स॒हदा॑नु॒म्पु॒रुहूतक्षि॒यन्त॑मह॒स्त॒मिन्द्र॒सम्पि॑णक्कु॒णा॑

रुम् ॥ अभिवृत्रंवर्द्धमानम्पियारुमपादमिन्द्रतवसाजघन्थ ॥ ६९ ॥
विनः ॥ विनऽइन्द्रमृधोजहिनीचायच्छपृतन्न्यतः ॥ योऽअस्म्माँ२
ऽअभिदासत्त्यधरङ्गमयातमः ॥ ७० ॥ मृगोन । भीमःकुचरोगि
रिष्ठाःपरावतऽआजगन्थापरस्याः ॥ सृकꣳसꣳशायपविमिन्द्रति
ग्ग्मंविशत्रून्ताढिविमृधोनुदस्व ॥ ७१ ॥ वैश्वानरोनः ॥ वै
श्वानरोनऽऊतयऽआप्प्रयातुपरावतः ॥ अग्निर्नःसुष्टुतीरुप ॥
॥ ७२ ॥ पृष्टोदिवि । पृष्टोऽअग्निःपृथिव्याम्पृष्टोविश्वाऽओषधी
राविवेश ॥ वैश्वानरःसहसापृष्टोऽअग्निःसनोदिवासरिषस्पातुन

र्क्कम् ॥ ७३ ॥ अश्यामुतम् ॥ अश्यामुतङ्काममंमग्ग्नेतवोतीऽअश्या
मंरयिꣳरयिवꣳसुवीरम् ॥ अश्यामुव्वाजमभिवाजयन्तोऽश्यामंद्द्युम्म्न
मजराजरन्ते ॥ ७४ ॥ व्वयन्त । ऽअद्ध्वरंरिमाहिकाममुत्तानहस्त्तानम
सोपसद्य ॥ यजिष्ठेनमनसायाक्षिदेवानस्रेधत्तामन्म्मनाव्विप्प्रोऽअग्ग्ने ॥
॥७५॥ धामच्छदग्ग्निः ॥ धामच्छदग्ग्निरिन्द्रोब्ब्रह्मादेवोबृहस्प्पतिः
सचेतसोव्विश्श्वेदेवायज्ञम्प्रावन्तुनꣳशुभे ॥ ७६ ॥ त्वंय्यविष्ठ । दाशु
षोनॄꣳपाहिशृणुधीगिरः ॥ रक्षातोकमुतत्त्मना ॥ ७७ ॥ [१० ॥]
इतिशुक्लयजुस्संहितायामष्टादशोऽध्यायः ॥ १८ ॥ ॥ श्रीवेदपुरुषा

यनमः ॥ स्वाद्वींत्त्वैकादशदेवायज्ञांविꣳशतिःसुरावंतꣳसप्तदशोदीर
तांत्रयोदशाच्याजानुर्दशसोमोराजाष्टौसीसेनतंत्रꣳषोडशसप्तपञ्चन
वतिः ॥ हरि÷ओम् ॥ स्वाद्वीन्त्वा । स्वादुनांतीव्रान्तीव्रेणामृतांमुमृ
तेन ॥ मधुमतीम्मधुमतासृजामिसꣳसोमेन ॥ सोमोस्यश्विभ्या
म्पच्यस्वसरस्वत्यैपच्यस्वेन्द्रायसुत्राम्णेपच्यस्व ॥१॥ परीतः ॥
परीतोषिञ्चतासुतꣳसोमोयऽउत्तमꣳहविः ॥ दधन्वायोनर्य्योऽअ
प्स्वन्तरासुषावसोममद्रिभिः ॥ २ ॥ वायोःपूतः । पवित्रेणप्रत्य
ङ्सोमोऽअतिद्रुतः ॥ इन्द्रस्ययुज्यःसखा ॥ वायोःपूतःपवित्रेण

प्राङ्क्सोमोऽअतिद्रुतः ॥ इन्द्रस्ययुज्यःसखा ॥ ३ ॥ पुनातिते ।
परिस्रुतꣳसोमꣳसूर्य्यस्यदुहिता ॥ वारेणशश्वतातना ॥ ४ ॥ ब्रह्म
क्षत्रम् ॥ ब्रह्मक्षत्रम्पवतेतेजऽइन्द्रियꣳसुरयासोमःसुतऽआसुतोम
दाय ॥ शुक्रेणदेवदेवताःपिपृग्धिरसेनान्नँय्यजमानायधेहि ॥ ५ ॥
कुविदङ्ग । यवमन्तोयवंश्चिद्यथादान्त्यनुपूर्वंवियूय ॥ इहेहैषाङ्कृणु
हिभोजनानियेबर्हिषोनमऽउक्तिंयजन्ति ॥ उपयामगृहीतोस्य
श्विभ्यान्त्वासरस्वत्यैत्वेन्द्रायत्वा सुत्राम्म्णऽएषतेयोनिस्तेजसे
त्वावीर्य्यायत्वाबलायत्वा ॥ ६ ॥ नानाहि । वान्देवहितꣳसद

स्कृतम्मासꣳसृक्षाथाम्परमेव्योमन् ॥ सुरात्त्वमसिशुष्मिणीसोम
ऽएषमामामाहिꣳसीःस्वांय्योनिमाविशन्ती ॥ ७ ॥ उपयामगृहीतो
सि ॥ उपयामगृहीतोस्याश्विनन्तेजः सारस्वतंव्वीर्य्यमैन्द्रम्बलम् ॥
एषतेयोनिर्म्मोदायत्त्वानन्दायत्त्वामहसेत्त्वा ॥ ८ ॥ तेजोसि ॥
तेजोसितेजोमयिधेहिव्वीर्य्यमसिव्वीर्य्यम्मयिधेहिबलमसिबलम्मयि
धेह्योजोस्योजोमयिधेहिमन्युरसिमन्युम्मयिधेहिसहोसिसहोमयि
धेहि ॥ ९ ॥ याव्याघ्रम् ॥ याव्याघ्रंव्विषूचिकोभौवृकंञ्चरक्ष
ति ॥ श्येनम्पतत्रिणꣳसिꣳहꣳसेमम्पात्त्वꣳहंसः ॥ १० ॥ यदापिपे

ष । मातरम्पुत्रःऽप्प्रमुदितोधयन् ॥ एतत्तदग्ग्नेऽअनृणोभवाम्म्यह
तौपितरौमया ॥ सम्पृचस्त्थसम्मामद्द्रेणपृङ्क्तव्विपृचस्त्थव्विमापाप्म
नापृङ्क्त ॥ ११ ॥ [११] देवायज्ञम् ॥ देवायज्ञमतन्न्वतभेषजम्भि
षजाश्श्विना ॥ व्वाचासरस्वतीभिषगिन्द्रायेन्द्रियाणिदधतꣳ ॥ १२ ॥
दीक्षायैरूपम् ॥ दीक्षायैरूपꣳशष्प्पाणिप्प्रायणीयस्यतोक्क्मानि ॥
क्रयस्यरूपꣳसोमस्यलाजाःसौमाꣳशवोमधु ॥ १३ ॥ आतिथ्य
रूपम्मासरम् ॥ आतित्थ्यरूपम्मासरम्महावीरस्यनग्नहुः ॥ रू
पमुपसदामेतत्तिस्रोरात्रीꣳसुरासुता ॥ १४ ॥ सोमस्यरूपम् ॥ सो

म॑स्यरू॒पङ्गृ॒हीतस्यं॑परि॒स्रु॒त्परि॑षिच्च्यते ॥ अ॒श्विभ्यां॑न्दु॒ग्धम्भे॑ष॒ज
मिन्द्रा॑यै॒न्द्रꣳसर॑स्वत्त्या ॥१५॥ आ॒स॒न्दीरू॒पम् ॥ आ॒स॒न्दीरू॒पꣳरा॑
जास॒न्द्यैवेद्यै॑कुम्भीसु॑रा॒धानी ॥ अ॒न्तर॑ऽउत्तरवे॒द्यारू॒पङ्का॑रोत॒रोभि॒ष
क् ॥ १६ ॥ वेद्या॒वेदि॑÷ ॥ वेद्या॒वेदि॒ꣳसमा॑प्प्यतेब॒र्हिषा॑ब॒र्हिरि॑न्द्रि॒य
म् ॥ यूपे॑नयू॒पं॑ऽआप्प्यते॒प्रणी॑तोऽअ॒ग्निर॒ग्निना॑ ॥ १७ ॥ ह॒विर्द्धा
नं॑य्यत् ॥ ह॒विर्द्धानं॑य्यद॒श्विना॑ग्नीद्ध्रं॑य्यत्त्सर॑स्वती ॥ इन्द्रा॑यै॒
न्द्रꣳसद॑ꣳस्कृतम्पत्त्नीशा॒लङ्गार्ह॑पत्त्यꣳ ॥ १८ ॥ प्रै॒षेभि॑÷प्रै॒षान् ॥ प्रै॒
षेभि॑÷प्रै॒षाना॑प्प्नोत्त्या॒प्प्रीभि॑रा॒प्प्रीर्य्य॒ज्ञस्यं॑ ॥ प्र॒या॒जेभि॑रनुया॒जा

न्वषट्कारेभिराहुतीः ॥ १९ ॥ पशुभि÷पशून् ॥ पशुभि÷पशूनाप्नो
तिपुरोडाशैर्हवीꣳष्या ॥ छन्दोभिःसामिधेनीर्याज्याभिर्वषट्का
रान् ॥ २० ॥ धानाःकरम्भःसक्तवःपरीवापःपयोदधि ॥ सोमस्य
रूपꣳहविषऽआमिक्षावाजिनम्मधु ॥ २१ ॥ धानानाꣳरूपम् ॥ धा
नानाꣳरूपङ्कुवलम्परीवापस्यगोधूमाः ॥ सक्तूनाꣳरूपम्बदरमुपवा
काःकरम्भस्य ॥ २२ ॥ पयसोरूपम् ॥ पयसोरूपंयद्यवादध्नो
रूपङ्कर्कन्धूनि ॥ सोमस्यरूपंवाजिनꣳसौम्यस्यरूपमामिक्षा ॥
॥ २३ ॥ आश्रावय ॥ आश्रावयेतिस्तोत्रियाः÷प्रत्याश्रावोऽअ

नुंरूपꣳ ॥ यजेतिधाय्यारूपम्प्रगुाथायेंयजामुहाः ॥ २४ ॥ अर्द्धुऽ
ऋचैरुक्थानांम् ॥ अर्द्धुऽऋुचैरुक्थानांꣳरूपम्पुदैरांप्नोतिनिुविदंः ॥
प्रणुवैःशुस्त्राणांꣳरूपम्पयंसुासोमंऽआप्प्यते ॥ २५ ॥ अुश्विभ्यां
म्प्रातꣳसवुनम् ॥ अुश्विभ्यांम्प्रातꣳसवुन मिन्द्रेणैुन्द्रम्माद्ध्यंन्दि
नम् ॥ वैुश्वुदेवꣳसरस्वत्त्यातृतीयमुाप्तꣳसवंनम् ॥ २६ ॥ वुा
युव्यैर्व्वायुव्यानि ॥ व्वायुव्यैर्व्वायुव्यान्याप्नोतिुसतेंनद्रोणकलुशम् ॥
कुम्भीभ्यांमम्भृणौसुतेस्थालीभिंस्थुालीरांप्नोति ॥ २७ ॥ यजुं
र्भिराप्यन्ते ॥ यजुंर्भिराप्यन्तेुग्ग्रहुाग्ग्रहुैस्तोमाश्चुाविष्टुंतीः ॥ छ

न्दो॑भिरु॒क्थाश॒स्त्राणि॒साम्म्ना॑वभृथऽआ॑प्प्यते ॥ २८ ॥ इडा॑भिर्भ॒क्षान् ॥ इडा॑भिर्भ॒क्षाना॑प्प्नोतिसू॒क्त॒वा॒केना॒शिषः॑ ॥ शंय्यु॒ना॑पत्त्नीसंय्याजान्त्स॑मिष्टयजु॒षा॑स॒ꣳस्त्थाम् ॥ २९ ॥ व्र॒तेन॑दी॒क्षाम् ॥ व्र॒तेन॑दी॒क्षामा॑प्प्नोतिदी॒क्षया॑प्प्नोति॒दक्षि॑णाम् ॥ दक्षि॑णाश्श्र॒द्धामा॑प्प्नोतिश्श्र॒द्धया॑स॒त्त्यमा॑प्प्यते ॥ ३० ॥ ए॒ताव॑द्रू॒पम् ॥ ए॒ताव॑द्रू॒पंय॒ज्ञस्य॒यद्दे॒वैर्ब्रह्म॑णाकृ॒तम् ॥ तदे॒तत्त्सर्व॑माप्प्नोतिय॒ज्ञेसौ॑त्त्राम॒णीसु॒ते ॥ ३१ ॥

[२०] सु॒राव॑न्तम्बर्हि॒षद॑म् ॥ सु॒राव॑न्तम्बर्हि॒षद॑ꣳसु॒वीर॑ꣳय॒ज्ञꣳहि॑न्वन्तिम॑हि॒षानमो॑भिः ॥ दधा॑नाःसोम॑न्दि॒विदे॒वता॑सुम॒देमेन्द्रं॒यज॑

मा॒नाऽंस्व॒र्काः ॥ ३२ ॥ यस्ते॑ ॥ यस्ते॒रस॒ऽंसम्भृ॑त॒ऽओष॑धीषु॒सोम॑स्य॒
शुष्म॒ऽंसु॒र॑यासु॒तस्य॑ ॥ तेन॑जिन्व॒यज॑मान॒म्मदे॑न॒सर॑स्वतीम॒श्वि॑
नाविन्द्र॑म॒ग्निम् ॥ ३३ ॥ यम॒श्विना॒नमु॑चेरासु॒राद॑धि॒सर॑स्व॒त्त्यसु॑
नोदि॒न्द्रि॒याय॑ ॥ इ॒मन्तꣳशु॒क्रम्मधु॑मन्त॒मिन्दु॒ꣳसोम॒ꣳराजा॑नमि॒ह
भ॑क्षयामि ॥ ३४ ॥ यदत्र॑ ॥ यदत्र॑रि॒प्तꣳर॒सिन॑÷सु॒तस्य॒यादिन्द्रो॒ऽ
अपि॑ब॒च्छची॑भिऽं ॥ अ॒हन्तद॑स्य॒मन॑सा॒शि॒वेन॒सोम॒ꣳराजा॑नमि॒ह
भ॑क्षयामि ॥ ३५ ॥ पि॒तृभ्य॑÷स्व॒धा॒यिभ्य॑ऽं । स्व॒धान॑म॑÷पिता
म॒हेभ्य॑÷स्व॒धा॒यिभ्य॑÷ स्व॒धान॒मऽंप्प्रपि॑तामहेभ्य॒ऽंस्व॒धा॒यिभ्य॑÷

स्वधानमं÷ ॥ अक्षंन्पितरोमीमदन्तपितरोतीतृपन्तपितरुःपितरुः शुन्धध्वम् ॥ ३६ ॥ पुनन्तुंमा । पितरँ÷सोम्म्यासं÷पुनन्तुंमापितामुहाः पुनन्तुप्प्रपितामहाः ॥ पुवित्रेंणशुतायुंषा ॥ पुनन्तुंमापितामुहाःपुनन्तुप्प्रपितामहाः ॥ पुवित्रेंणशुतायुंषाव्विश्श्वुमायुर्व्व्यश्श्नवै ॥ ॥ ३७ ॥ अग्नुऽआयूंष्षि । पवसुऽआसुवोर्ज्जुमिषंञ्चनः ॥ आरेबांधस्वदुच्छुनांम् ॥ ३८ ॥ पुनन्तुंमा । देवजुनाःपुनन्तुमनंसाधियं÷ ॥ पुनन्तुव्विश्श्वांभूतानिजातंवेदःपुनीहिमां ॥ ३९ ॥ पुवित्रेंणपनीहिमा । शुक्क्रेणंदेवुदीद्यंत् ॥ अग्नेक्क्रत्त्वाक्क्रतूँ रनुं ॥ ४० ॥

य॒त्ते॑ । प॒वित्त्र॑म॒र्च्चिष्ष्य॒ग्ग्ने॒व्वित॑तमन्त॒रा ॥ ब्रह्म॒तेन॑पुनातु॒मा ॥ ४१ ॥
पव॑मान॒ःसः ॥ पव॑मान॒ःसोऽअ॒द्यन÷प॒वित्त्रे॑ण॒व्विच॑र्षणिः ॥ य॒ःपोता॒
सपु॑नातु॒मा ॥ ४२ ॥ उ॒भाब्भ्यां॑न्देव । सवितःप॒वित्त्रे॑णस॒वेन॑च॒मा
म्पु॑नीहि॒व्विश्श्वतः॑ ॥ ४३ ॥ वै॒श्श्व॒देवी॑पु॒नती॑ । दे॒व्व्यागा॒द्यस्यां॑
मि॒मा॒ब्ब॒ह्व्य॑स्त्त॒न्न्वो॒व्वी॒तपृ॑ष्ठाः तया॒मद॑न्तःसध॒मादे॑षु॒व्वयꣳस्यां॑म॒
पत॑योर॒यी॑णाम् ॥ ४४ ॥ येस॑मा॒नाःसम॑नसःपि॒तरो॑य॒मरा॒ज्ज्ये॑ ॥ ते
षाँ॑ल्लो॒कःस्स्व॒धानमो॑य॒ज्ञोदे॒वेषु॑कल्पताम् ॥ ४५ ॥ येस॑मा॒नाः ॥ येस॑
मा॒नाःसम॑नसोजी॒वाजी॒वेषु॑मा॒मकाः ॥ तेषा॒ꣳश्श्रीर्म्मयि॑कल्प्पता

मस्मिँल्लोकेशतꣳसमाः ॥ ४६ ॥ द्वेसृती । ऽअशृणवम्पितॄणामह
न्देवानामुतमर्त्त्यानाम् ॥ ताभ्यामिदम्विश्वमेजत्समेतियदन्त
रापितरम्मातरञ्च ॥ ४७ ॥ इदꣳहविः । प्रजननम्मेऽअस्तुदशवीर
ꣳसर्व्वगणꣳस्वस्तये ॥ आत्त्मसनिप्प्रजासनिपशुसनिलोकसन्य
भयसनि ॥ अग्निःप्प्रजाम्बहुलाम्मेकरोत्त्वन्नम्पयोरेतोऽअस्म्मासु
धत्त ॥ ४८ ॥ [१७] उदीरताम् ॥ उदीरतामवरऽउत्त्परासऽउन्म
द्ध्यमाःपितरःसोम्म्यासः ॥ असुंय्यऽईयुरवृकाऽऋतज्ञास्तेनोवन्तु
पितरोहवेषु ॥ ४९ ॥ आङ्गिरसोनः । पितरोनवग्ग्वाऽअथर्व्वाणो

भृगवःसोम्म्यासः ॥ तेषांव्वयꣳसुमतौयज्ञियानामपिभद्रेसौमनसे
स्याम ॥ ५० ॥ येनः ॥ येनःपूर्व्वेपितरःसोम्म्यासोनूहिरेसो
मपीथंव्वसिष्ठाः ॥ तेभिर्यमःसꣳरराणोहवीꣳष्युशन्नुशद्भिःप्र
तिकाममत्तु ॥ ५१ ॥ त्वꣳसोम ॥ त्वꣳसोमप्प्रचिकितोमनीषा
त्वꣳरजिष्ठमनुनेषिपन्थाम् ॥ तवप्रणीतीपितरोनऽइन्दोदेवेषुरत्न
मभजन्तधीराः ॥ ५२ ॥ त्वयाहि ॥ त्वयाहिनःपितरःसोमपूर्व्वे
कर्म्माणिचक्रुःपवमानधीराः ॥ व्वन्वन्नव्वातःपरिधीँ१ रपोर्णुव्वीरे
भिरश्वैर्म्मघवाभवानः ॥ ५३ ॥ त्वꣳसोम । पितृभिःसंविदानो

नुद्यावांपृथिवीऽआततन्थ ॥ तस्म्मैतऽइन्द्रोहविषांव्विधेमवयꣳस्यां
मुपतंयोरयीणाम् ॥ ५४ ॥ बर्हिषदꣳपितरꣳ ॥ बर्हिषदꣳपितरऽऊ
त्त्युर्व्वागिमावोहव्याचकृमाजुषद्ध्वम् ॥ तऽआगतावसाशन्तमेनाथा
नꣳशंय्योररपोदधात ॥ ५५ ॥ आहम् ॥ आहम्पितृन्त्सुविदत्राँ२ ॥
ऽअवित्सिनपातञ्चव्विक्रमणञ्चव्विष्ण्णोꣳ ॥ बर्हिषदोयेस्वधयासुत
स्यभजन्तपित्त्वस्तऽइहागमिष्ठाꣳ ॥ ५६ ॥ उपहूताꣳपितरं÷ । सो
म्म्यासोबर्हिष्ष्येषुनिधिषुप्प्रियेषु ॥ तऽआगमन्तुतऽइहश्श्रुवन्त्वधि
ब्ब्रुवन्तुतेवन्त्वस्म्मान् ॥ ५७ ॥ आयन्तु । नꣳपितरं÷सोम्म्यासो

ग्निष्ष्वात्ताःपथिभिर्द्देवयानैः ॥ अस्म्मिन्यज्ञेस्वधयामदन्तोधिब्रु
वन्तुतेवन्त्वस्म्मान् ॥ ५८ ॥ आग्निष्ष्वात्ताःपितरः ॥ आग्निष्ष्वा
त्ताःपितरऽएहगच्छतसदःसदःसदतसुप्प्रणीतयः ॥ अत्ताहवीꣳषि
प्प्रयतानिबर्हिष्ष्यथारयिꣳसर्व्ववीरन्दधातन ॥ ५९ ॥ येऽअग्नि
ष्ष्वात्ताः ॥ येऽअग्निष्ष्वात्तायेऽअनग्निष्ष्वात्तामद्ध्येदिवःस्वधया
मादयन्ते ॥ तेब्भ्यःस्वराडसुनीतिमेतांय्यथावशन्तन्वङ्कल्प्पया
ति ॥ ६० ॥ अग्निष्ष्वात्तानृतुमतः ॥ अग्निष्ष्वात्तानृतुमतोहवा
महेनाराशꣳसेसोमपीथंय्यऽआशुः ॥ तेनोव्विप्प्रासःसुहवाभवन्तुव

यꣳस्यामपतयोरयीणाम् ॥ ६१ ॥ [१३] आच्याजानु । दक्षिण
तोनिषद्येमंय्यज्ञमभिगृणीतव्विश्श्वे ॥ माहिꣳसिष्टपितरःकेनचिन्नो
यद्वऽआगःपुरुषताकराम ॥ ६२ ॥ आसीनासोऽअरुणीनाम् ॥
आसीनासोऽअरुणीनामुपस्त्थेरयिन्धत्तदाशुषेमर्त्त्याय ॥ पुत्रेभ्यः
पितरस्तस्यव्वस्वःप्प्रयच्छततऽइहोर्जन्दधात ॥ ६३ ॥ यमग्ने ।
कव्यवाहनत्त्वञ्चिन्मन्यसेरयिम् ॥ तन्नोगीर्भिःश्श्रवाय्यन्देवत्रा
पनयायुजम् ॥ ६४ ॥ योऽअग्निः । कव्यवाहनःपितॄन्यक्षदृतावृ
धः ॥ प्रेदुहव्यानिव्वोचतिदेवेभ्यश्चपितृभ्यऽआ ॥६५॥ त्वमग्ने ॥

त्वमग्नऽईडितःकव्यवाहनाव्वाड्ढव्यानिसुरभीणिकृत्त्वी ॥ प्रादाःपितृ
भ्यःस्वधयातेऽअक्षन्नद्धित्त्वन्देवप्प्रयताहवीꣳषि ॥ ६६ ॥ येच ॥
येचेहपितरोयेचनेहयाँश्चविद्मयाँ२ ॥ उचनप्प्रविद्म ॥ त्त्वंव्वेत्थयति
तेजातवेदःस्वधाभिर्य्यज्ञꣳसुकृतञ्जुषस्व ॥ ६७ ॥ इदम्पितृभ्यो
नमोऽअस्त्वद्ययेपूर्व्वासोयऽउपरासऽईयुः ॥ येपार्त्थिवेरजस्यानिष
त्तायेवानूनꣳसुवृजनासुविक्षु ॥ ६८ ॥ अधायथा । नःपितरःपरासः
प्प्रत्क्नासोऽअग्नऽऋतमाशुषाणाः ॥ शुचीदयन्दीधिमुक्थशासःक्षा
माभिन्दन्तोऽअरुणीरपव्व्रन् ॥ ६९ ॥ उशन्तस्त्वा ॥ उशन्तस्त्वानी

धीमह्युशन्तःसमिधीमहि ॥ उशन्नुशतऽआवहपितॄन्हविषेऽअत्त
वे ॥ ७० ॥ अपाम्फेनेन ॥ अपाम्फेनेननमुचेःशिरऽइन्द्रोदवर्त्तयः
विश्वायदजयस्पृधः ॥ ७१ ॥ [१०] सोमोराजा ॥ सोमोराजा
मृतꣳसुतऽऋजीषेणाजहान्मृत्युम् ॥ ऋतेनसत्त्यमिन्द्रियँविपानꣳ
शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥ ७२ ॥ अद्भ्यःक्षीर
म् ॥ अद्भ्यःक्षीरंव्यपिबत्क्रुङ्ङाङ्गिरसोधिया ॥ ऋतेनसत्त्यमिन्द्रि
यँविपानꣳशुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥ ७३ ॥
सोममद्भ्यः ॥ सोममद्भ्योव्यपिबच्छन्दसाहꣳसःशुचिषत् ॥ ऋते

न॑स॒त्त्यमि॑न्द्रि॒यंव्वि॒पान॑ꣳशु॒क्रमन्ध॑स॒इन्द्र॑स्येन्द्रि॒यमि॒दम्पयो॒मृत॒म्मधु॑
॥७४॥ शतं ११०० ॥ कण्डि ॥ ० ॥ अन्ना॑त्त्परि॒स्रु॒तः॑ ॥ अन्ना॑त्त्परि
स्रु॒तो॒रस॒म्ब्रह्म॑णा॒व्व्य॑पिबत्त्क्ष॒त्रम्पय॒ःसोम॑म्प्प्र॒जाप॑तिः ॥ ऋ॒तेन॑स॒त्त्य
मि॑न्द्रि॒यंव्वि॒पान॑ꣳशु॒क्रमन्ध॑स॒ऽइन्द्र॑स्येन्द्रि॒यमि॒दम्पयो॒मृत॒म्मधु॑ ॥
॥ ७५ ॥ रेतो॒मूत्र॑म् ॥ रेतो॒मूत्रं॒व्विज॑हाति॒योनि॑म्प्रवि॒शदि॑न्द्रि॒यम् ॥
गब्भो॑ज॒राय्॒णावृ॑त॒ऽउल्ब॑ञ्जहाति॒जन्म॑ना ॥ ऋ॒तेन॑स॒त्त्यमि॑न्द्रि॒यंव्वि
पान॑ꣳशु॒क्रमन्ध॑स॒ऽइन्द्र॑स्येन्द्रि॒यमि॒दम्पयो॒मृत॒म्मधु॑ ॥ ७६ ॥ दृ॒ष्ट्वा
रू॒प । व्याक॑रोत्त्सत्त्यानृ॒तेप्प्र॒जाप॑तिः ॥ अश्श्र॑द्धा॒मनृ॒तेद॑धाच्छ्र॒द्धा

ꣳसत्त्येप्प्रजापतिः ॥ ऋतेनसत्त्यमिन्द्रियंव्विपानꣳशुक्रमन्धसऽइन्द्र
स्येन्द्रियमिदम्पयोमृतम्मधु ॥ ७७ ॥ व्वेदेनरूपे । व्यपिबत्त्सुतासु
तौप्प्रजापतिः ॥ ऋतेनसत्त्यमिन्द्रियंव्विपानꣳशुक्रमन्धसऽइन्द्रस्ये
न्द्रियमिदम्पयोमृतम्मधु ॥ ७८ ॥ दृष्ट्वापरिस्रुतः ॥ दृष्ट्वापरिस्रुतो
रसꣳशुक्रेणशुक्रंव्यपिबत्त्पयःसोमम्प्रजापतिः ॥ ऋतेनसत्त्यमिन्द्रि
यंव्विपानꣳशुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥ ७९ ॥
[८] सीसेनतन्त्रम् ॥ सीसेनतन्त्रम्मनसामनीषिणऽऊर्णासूत्रेण
कवयोव्वयन्ति ॥ अश्विनायज्ञꣳसवितासरस्वतीन्द्रस्यरूपंव्वरुणो

भिषज्ज्यन् ॥ ८० ॥ तदस्य । रूपममृतꣳशचीभिस्तिस्रोदधुर्देव
ताꣳसꣳरराणाः ॥ लोमानिशष्पैर्बहुधानतोक्मभिस्त्वगस्यमाꣳस
मभवन्नलाजाः ॥ ८१ ॥ तदश्विना । भिषजारुद्रवर्तनीसरस्वती
व्वयतिपेशोऽअन्तरम् ॥ अस्थिमज्जानम्मासरैः कारोतरेणदधतो
गवान्त्वचि ॥ ८२ ॥ सरस्वतीमनसा । पेशलंव्वसुनासत्याभ्यांव्वय
तिदर्शतंव्वपुः ॥ रसम्परिस्रुतानरोहितन्नग्नहुर्द्धीरस्तसरन्नव्वेम ॥ ८३ ॥
पयसाशुक्रम् ॥ पयसाशुक्रममृतञ्जनित्रꣳसुरयामूत्राज्जनयन्तरेतः ॥
अपामतिन्दुर्म्मतिम्बाधमानाऽऊवध्यंव्वातꣳसब्वन्तदारात् ॥ ८४ ॥

इन्द्र॑÷सु॒त्रामा॒हृद॑येनस॒त्यम्पु॑रो॒डाशे॑नसवि॒ताज॑जान ॥ यकृ॑त्क्लो॒मा
न॑व्वरु॑णोभि॒षज्ज्य॒न्मत॑स्नेव्वाय॒व्यैर्न्न॑मिनातिपि॒त्तम् ॥ ८५ ॥ आ॒न्त्रा
णि॑स्था॒लीः ॥ आ॒न्त्राणि॑स्थालीर्म्मधु॒पिन्व॑माना॒गुदाऽपात्रा॑णि
सु॒दुघा॒नधे॒नुः ॥ श्ये॒नस्य॒पत्र॒न्नप्लीहा॒शची॑भिरासन्दीना॒भिरु॒दर॒न्न
मा॒ता ॥ ८६ ॥ कु॒म्भोव॑नि॒ष्ठुः ॥ कु॒म्भोव॑नि॒ष्ठुर्ज्ज॑नि॒ताशची॑भि॒र्य्य
स्मि॒न्नग्ग्रे॒योन्न्या॒ङ्गर्भो॑ऽअ॒न्तः ॥ प्ला॒शिर्व्य॑क्तः॑श॒तधा॑रऽउत्सो॑दु॒हे
न॒कुम्भी॒स्व॒धाम्पि॒तृभ्य॑÷ ॥ ८७ ॥ मुख॒ꣳसत् ॥ मुख॒ꣳसद॑स्य॒शिर॒
ऽइत्स॒तेन॒जि॒ह्वाप॒वित्र॑म॒श्विनास॒न्त्सर॑स्वती ॥ च॒प्प्यन्नापा॒युर्भि॑ष

Nepal Sanskrit University, Balmiki Campus, Kathmandu

गस्यवालोवस्तिर्नशेपोहरसातरस्वी ॥ ८८ ॥ अश्विभ्याञ्चक्षुः ॥
अश्विभ्याञ्चक्षुरमृतङ्ग्रहाभ्याञ्छागेनतेजोहविषाशृतेन ॥ पक्ष्मा
णिगोधूमैःकुवलैरुतानिपेशोनशुक्रमसितंवसाते ॥ ८९ ॥ अविर्न ॥
मेषोनसिवीर्यायप्प्राणस्यपन्थाऽअमृतोग्रहाभ्याम् ॥ सरस्वत्यु
पवाकैर्व्यानन्नस्यानिबर्हिर्बदरैर्जजान ॥ ९० ॥ इन्द्रस्यरूपम् ॥ इ
न्द्रस्यरूपमृषभोबलायकर्णाभ्याꣳश्रोत्त्रममृतङ्ग्रहाभ्याम् ॥ य
वानबर्हिर्भ्रुविकेसराणिकर्कन्धुयज्ञेमधुसारघम्मुखात् ॥ ९१ ॥ आ
त्त्मन्नुपस्त्थे ॥ आत्त्मन्नुपस्त्थेनवृकस्यलोममुखेश्मश्रूणिन

ह्यांग्ग्लोम ॥ केशुानशुीर्षन्न्यशसेश्श्रियैशिखासिुꣳहस्युलोमुत्त्विषि
रिन्द्रुयाणि ॥ ९२ ॥ अङ्गान्न्यात्त्मन् ॥ अङ्गान्न्युात्त्मन्न्भिुषजात
दुश्श्विनात्त्मानुमङ्गैꣳसमंधात्त्सरस्वती ॥ इन्द्रस्युरूपꣳशुतमानु
मायुश्च्चन्द्रेणुज्ज्योतिरुमृतुन्दधानाꣳ ॥ ९३ ॥ सरस्वतुीयोन्न्याम् ॥
सरस्वतुीयोन्न्युाङ्गर्ब्भमुन्तरुश्श्विब्भ्युाम्पत्त्नीसुकृतम्बिभर्त्ति ॥ अुपा
ꣳरसेनुवरुणोनसाम्म्नेन्द्रꣳश्श्रियैजुनयन्नुप्प्सुराजा ॥ ९४ ॥ तेज÷प
शूनाम् ॥ तेज÷पशूनाꣳहुविरिन्द्रियावत्त्परिस्रुतापयसासारुघम्मधु ॥
अुश्श्विब्भ्यान्दुग्ग्धम्भिुषजासरस्वत्त्यासुतासुताब्भ्यामुमृतुꣳसोमु

२८

ऽइन्दु÷ ॥ ९५ ॥ [१६] इति श्रीशुक्लयजुःसंहितापाठएकोनविंशतितमोऽध्यायः ॥ १९ ॥ क्षत्रस्ययोनिस्त्रयोदशयद्देवादशाभ्यादधाम्यष्टौयोभूतानांचतस्रः॥ समिद्धइंद्रएकादशायात्त्वष्टौसमिद्धोअग्निर्द्वादशाश्विनाहविस्त्रयोदशाश्विनातेजसैकादशनवनवातिः ॥ ॐक्षुत्रस्युयौनिं÷ ॥ क्षुत्रस्युयोनिरासिक्षुत्रस्युनाभिरासि ॥ मात्त्वांहिꣳसीन्मामांहिꣳसीः ॥ १ ॥ निषंसाद । धृतव्रंतोवरुणꣳपुस्त्यास्वा ॥ साम्म्राज्ज्यायसुक्रतु÷ ॥ मृत्त्योःपांहिविद्योत्त्पांहि ॥ २॥ देवस्यंत्त्वा । सवितुःप्प्रंसवेऽश्विनोर्बाहुभ्यांम्पूष्णोहस्त्ताभ्याम् ॥ अश्विनोर्भैष

ज्ज्येनुतेजंसेब्रह्मवर्च्चुसायुाभिषिंञ्चामिुसरंस्वत्त्यैुभैषंज्ज्येनव्वीुर्य्यां
युान्नाद्यांयुाभिषिंञ्चामीन्द्रंस्येन्द्रियेणुबलांयुश्श्रियैयशंसेुभिषिंञ्चामि
॥ ३ ॥ कोंसि । कतुमोंसिुकस्म्मैत्त्वाुकायंत्त्वा ॥ सुश्लोकुसुमंङ्गलु
सत्त्यंराजन् ॥ ४ ॥ शिरोंमे ॥ शिरोंमेुश्श्रीर्य्यशोुमुखन्त्त्विषिुङ्केशां
श्चुश्म्मश्श्रूणि ॥ राजांमेप्प्राणोऽअमृतंᳪसुम्म्राट्चक्षुर्व्विराट्श्रोत्त्रंम् ॥
॥ ५ ॥ जिह्वामें । भुद्रंव्वाङ्महोुमनोंमुन्न्युःस्वुराड्भामः ॥ मोदाःप्प्र
मोदाऽअुङ्गुलीरङ्गांनिमुत्रम्मेुसहः ॥ ६ ॥ बाहूमें ॥ बाहूमेुबलंमिन्द्रिुय
ᳪहस्तौंमेुकर्म्मंव्वीुर्य्यम् ॥ आुत्त्माक्षुत्त्रमुरोममं ॥ ७ ॥ पृष्ठीर्म्मे । रा

ष्ट्रमुदरमꣳसौग्ग्रीवाश्चःश्रोणी ॥ ऊरूऽअरत्त्नीजानुनीव्विशोमेङ्गानि
सर्व्वतः ॥८॥ नाभिर्म्मे । चित्तंव्विज्ञानम्पायुर्म्मेपचितिर्भसत् ॥ आ
नन्दनन्दावाण्डौमेभगꣳसौभाग्ग्यम्पसः ॥ जङ्घाभ्याम्पद्भ्यान्ध
र्म्मोस्म्मिव्विशिराजाप्प्रतिष्ठितः ॥ ९॥ प्रतिक्षत्रे । प्प्रतिष्ठामिराष्ट्रेप्प्र
त्यःश्वेषुप्प्रतिष्ठामिगोषु ॥ प्रत्यङ्गेषुप्प्रतितिष्ठाम्म्यात्त्मन्प्रतिम्प्रा
णेषुप्प्रतितिष्ठामिपुष्टेप्प्रतिद्यावापृथिव्व्योःप्प्रतितिष्ठामियज्ञे ॥१०॥ त्र
यादेवाः ॥ त्रयादेवाऽएकादशत्त्रयस्त्रिꣳशाःसुराधसः ॥ बृहस्प्पतिपु
रोहितादेवस्यंसवितुःसवे ॥ देवादेवैरवन्तुमा ॥ ११ ॥ प्रथमाद्विती

यैः ॥ प्र॒थ॒मा॒द्वि॒तीयै॒र्द्वि॒तीया॑स्तृ॒तीयै॑स्तृ॒तीया॑ःस॒त्त्येन॑स॒त्त्यँय॒ज्ञेन॑य॒
ज्ञो॒यजु॒र्भि॒र्य॒जूꣳ॑षि॒सामा॑भि॒ःसामा॑न्यृ॒ग्भि॒र्ऋच॑ःपु॒रो॒नु॒वा॒क्या॑भिः
पु॒रो॒नु॒वा॒क्या॒या॒ज्या॒भि॒र्या॒ज्या॑व॒षट्का॒रैर्व॑षट्का॒राऽआ॒हु॑तिभि॒राहु॑त
यो॒मे॒कामा॒न्त्सम॑र्द्धयन्तु॒भूः॒स्वाहा॑ ॥१२॥ लो॒मा॑नि॒प्रय॑तिः ॥ लो॒मा॑
नि॒प्रय॑ति॒र्म्मम॒त्वङ्म॒ऽआन॑ति॒रागा॑तिः ॥ मा॒ꣳसम्म॒ऽउप॑नाति॒र्वस्व
स्थि॒म॒ज्जाम॒ऽआन॑तिः ॥ १३ ॥ [१३] यद्दे॒वाः ॥ यद्दे॒वादे॑व॒हेड॑न॒
न्देवा॑सश्चकृ॒मा॒व॒यम् ॥ अ॒ग्निर्म्मा॒तस्मा॒देन॑सो॒विश्वा॑न्मु॒ञ्च॒त्वꣳ
ह॑सः ॥ १४ ॥ यदि॒दिवा॑ ॥ यदि॒दिवा॒यदि॒नक्त॒मेना॑ꣳसि॒चकृ॒मा॒व॒

यम् ॥ व्वायुर्म्मातस्म्मादेनसोव्विश्श्वान्न्मुञ्चत्वꣳहसः ॥ १५ ॥ य
दिजाग्ग्रत् ॥ यदिजाग्ग्रद्यदिस्वप्नऽएनाꣳसिचकृमाव्वयम् ॥ सूर्य्यो
मातस्म्मादेनसोव्विश्श्वान्न्मुञ्चत्वꣳहसः ॥ १६ ॥ यद्ग्रामे ॥ यद्ग्रामेयद
रण्ण्येयत्त्सभायांय्यदिन्द्रिये ॥ यच्छूद्द्रेयदर्य्येयदेनश्चकृमाव्वयंय्यदे
कस्याधिधर्म्मणितस्यावयजनमसि ॥ १७ ॥ यदापः ॥ यदापोऽअ
घ्न्याऽइतिव्वरुणेतिशपामहेततोव्वरुणनोमुञ्च ॥ अवभृथनिचुम्पुणनि
चेरुरसिनिचुम्पुणः ॥ अवदेवैर्द्देवकृतमेनोयक्ष्यवमर्त्त्यैर्म्मर्त्त्यकृत
म्पुरुराव्णोदेवरिषस्प्पाहि ॥ १८ ॥ समुद्रेते ॥ समुद्रेतेहृदयमप्स्व

न्तꣳसन्त्वा॑व्वि॒शन्त्वोष॑धीरु॒ताप॑ः ॥ सु॒मि॒त्रि॒या न॒ऽआप॒ऽओष॑धयः सन्तु
दु॒र्म्मि॒त्रि॒यास्तस्म्मै॑सन्तु॒योऽस्मान्द्वेष्टि॒यञ्च॑व॒यन्द्वि॒ष्म्मः ॥ १९ ॥ द्रु॒प॒
दादि॑वमुमुचा॒नः स्वि॒न्नःस्ना॒तोमला॑दिव ॥ पूतम्प॒वित्रे॑णे॒वाज्ज्य॒माप॑ः
शु॒न्धन्तु॒मैन॑सः ॥ २० ॥ उद्द्व॒यम् ॥ उद्द्व॒यन्तम॑स॒स्परि॒स्व॒ः प
श्य॑न्त॒ऽउत्त॑रम् ॥ दे॒वन्दे॑व॒त्रासूर्य्य॒मग॑न्म॒ज्ज्योति॑रुत्त॒मम् ॥ २१ ॥
अ॒पोऽअ॒द्य ॥ अ॒पोऽअ॒द्यान्व॑चारिष॒ꣳरसे॑न॒सम॑सृक्ष्महि ॥ पय॑स्वान
ग्न॒ऽआग॑मन्तम्मा॒सꣳसृ॑ज॒वर्च्च॑साप्प्र॒जया॑च॒धने॑नच ॥ २२ ॥ ए
धो॑सि ॥ ए॒धो॑स्येधिषी॒महि॑स॒मिद॑सि॒तेजो॑सि॒तेजो॒मयि॑धेहि ॥ सु

मावंवर्त्तिपृथिवीसमुषाःसमुसूर्य्य÷ समुविश्वंमिदञ्जगत् ॥ वैश्वा
नुरज्ज्योतिर्भूयासंविभून्कामान्व्यश्नवैभूःस्वाहा ॥ २३ ॥
[१०] अुभ्यादंधामि । सुमिधुमग्नेंव्रतपतुत्वयिं ॥ व्रतञ्चंश्श्रुद्धा
ञ्चोपैमीन्धेत्वांदीक्षितोऽअुहम् ॥ २४ ॥ यत्रुब्रह्मंच ॥ क्षत्रञ्चंसु
म्म्यञ्चौचरंतःसुह ॥ तँल्लोकम्पुण्ण्युम्प्रज्ञेंषंय्यत्रंदेवाःसुहाग्निना ॥
॥ २५ ॥ यत्रेन्द्र÷ ॥ यत्रेन्द्रश्चवायुश्चंसुम्म्यञ्चौचरंतःसुह ॥ तँ
ल्लोकम्पुण्ण्युम्प्रज्ञेंषुंय्यत्रंसेदिर्न्नंविद्यत ॥ २६ ॥ अंशुनाते ॥ ऽअंशु
शुःपृंच्च्यतुाम्परुंषापरु÷ ॥ गुन्धस्तेसोमंमवतुमदांयुरसोऽअच्च्यु

त॒ः ॥२७॥ सि॒ञ्चान्ति॒परि॑ । षि॒ञ्चन्त्यु॒त्सिञ्चान्ति पु॒नन्ति॑च ॥ सु॒रायै॑
ब॒भ्र्वै॑मदे॑कि॒न्त्वो॒व॑दतिकि॒न्त्वः ॥ २८ ॥ धा॒नाव॑न्तङ्क॒रम्भिण॑म् ॥
धा॒नाव॑न्तङ्क॒रम्भिण॑मपू॒पव॑न्तमु॒क्थिन॑म् ॥ इन्द्र॑प्प्रा॒तर्ज्जु॑षस्वनः ॥
॥ २९ ॥ बृ॒हदिन्द्रा॑य । गायत॒मरु॑तोवृत्र॒हन्त॑मम् ॥ येनु॒ज्ज्योति॒र
जन॑यन्नृ॒तावृ॒धो॑दे॒वन्दे॒वाय॒जागृ॑वि ॥ ३० ॥ अद्ध्व॒र्य्योऽआ॒द्रि॑भिः ॥
सु॒तꣳसोम॑म्पवि॒त्रऽआन॑य ॥ पु॒नाहीन्द्रा॑य॒पात॑वे ॥ ३१ ॥ [८] योभू॒
ताना॑म् ॥ योभू॒ताना॒मधि॑पति॒र्य्यस्मिँ॒ल्लो॒काऽआधि॑श्रि॒ताः ॥ यऽई॒
शे॑मह॒तोम॒हाँस्तेन॑गृह्णामि॒त्वाम॒हम्मयि॑गृह्णामि॒त्वाम॒हम् ॥ ३२ ॥

Nepal Sanskrit University, Balmiki Campus, Kathmandu

उ॒प॒या॒मगृ॑हीतोस्य॒श्श्विब्भ्या॑न्त्वा॒सर॑स्वत्त्यै॒त्त्वेन्द्रा॑यत्त्वासु॒त्त्राम्म्ण॑
ऽए॒षते॒योनि॑र॒श्श्विब्भ्या॑न्त्वा॒सर॑स्वत्त्यै॒त्त्वेन्द्रा॑यत्त्वासु॒त्त्राम्म्णे॑ ॥३३॥
प्रा॒ण॒पामे॑ । ऽअपा॒न॒पाश्च॑क्षु॒ष्पाः॑श्श्रोत्त्र॒पाश्च॑मे ॥ व्वा॒चोमे॑व्वि
श्वभे॑षजो॒मन॑सोसि॒व्विलाय॑कः ॥ ३४ ॥ अ॒श्विन॑ङ्कृतस्य॑ते ॥ अ॒
श्विन॑ङ्कृतस्य॒ते॒सर॑स्वतिकृ॒तस्ये॒न्द्रे॑णसु॒त्त्राम्म्णाकृ॑तस्य॑ ॥ उप॑हूत॒ऽ
उप॑हूतस्यभक्षयामि ॥ ३५ ॥ [४] समि॑द्ध॒ऽइन्द्र÷ ॥ समि॑द्ध॒ऽइन्द्र॒ऽउ
षसामनी॑केपुरोरु॒चापू॑र्व्व॒कृद्वा॑वृधा॒नः ॥ त्रि॒भिर्दे॒वैस्त्रि॒ꣳशता॒वज्र॑बाहु
र्ज्जघा॑नव्वृ॒त्रंव्वि॒दुरो॑ववार ॥ ३६ ॥ नरा॒शꣳस॒ःप्प्रति॑ ॥ नरा॒शꣳस॒ः

प्प्रतिशूरोमिमानस्तनूनपात्प्रतियज्ञस्यधाम ॥ गोभिर्व्वपावान्मधु
नासमञ्जन्हिरण्ण्यैश्चन्द्रीयजतिप्प्रचेताः ॥ ३७ ॥ ईडितोदेवैः ॥
ईडितोदेवैर्हरिवाँ२ऽअभिष्टिराजुह्वानोहविषाशर्द्धमानः ॥ पुरन्दरो
गोत्त्रभिद्वज्ज्रबाहुरायातुयज्ञमुपनोजुषाणः ॥ ३८ ॥ जुषाणोबर्हिः ॥
जुषाणोबर्हिर्हरिवान्नऽइन्द्रः प्प्राचीनꣳसीदत्प्रदिशापृथिव्याः ॥ उरु
प्प्रथाः प्प्रथमानꣳस्योनमादित्त्यैरक्तँवसुभिःसजोषाः ॥ ३९ ॥ इ
न्द्रन्दुरः ॥ कवष्ष्योधावमानावृषाणँयन्तुजनयःसुपत्त्नीः ॥ द्वारो
देवीरभितोविश्श्रयन्ताꣳसुवीरावीरम्प्रथमानामहोभिः ॥ ४० ॥ उ

षासानक्ता । बृहतीबृहन्तम्पयस्वतीसुदुघेशूरमिन्द्रम् ॥ तन्तु
न्ततम्पेशसासंवयन्तीदेवानान्देवंयजतःसुरुक्मे ॥ ४१ ॥ दैव्यामि
माना । मनुषःपुरुत्राहोताराविन्द्रम्प्रथमासुवाचा ॥ मूर्द्धन्यज्ञ
स्यमधुनादधानाप्प्राचीनञ्ज्योतिर्हविषावृधातः ॥ ४२ ॥ तिस्रोदे
वीः ॥ तिस्रोदेवीर्हविषावर्द्धमानाऽइन्द्रञ्जुषाणाजनयोनपत्नीः ॥ अ
च्छिन्नन्तन्तुम्पयसासरस्वतीडादेवीभारतीविश्वतूर्त्तिः ॥४३॥ त्वष्टा
दधत् ॥ त्वष्टादधच्छुष्ममिन्द्रायवृष्णेपाकोचिष्टुर्यशसेपुरूणि ॥
वृषायजन्वृषणम्भूरिरेतामूर्द्धन्यज्ञस्यसमनक्तुदेवान् ॥ ४४ ॥ वन

स्प्पतिरवंसृष्टः ॥ ब्बनुस्प्पतिरवंसृष्टोनपाशैस्त्मन्न्यांसमुञ्जःछांमिता
नदेवः ॥ इन्द्रंस्यहुव्यैर्ज्जुठरंम्पृणानःस्वदांतियज्ञम्मधुंनाघृतेनं ॥
॥ ४५ ॥ स्त्तोकानामिन्दुंम् ॥ स्त्तोकानामिन्दुम्प्रतिशूरऽइन्द्रोंब्बृषा
यमांणोब्बृषुभस्त्तुंराषाट् ॥ घृतप्प्रुषामनंसामोदंमानाःस्वाहांदेवाऽ
अमृतांमादयन्ताम् ॥ ४६ ॥ [११] आयांतु ॥ आयात्त्विन्द्रोवं
सऽउपंनऽइहस्त्तुतःसंधमादंस्त्तुशूरंः ॥ ब्बावृधानस्त्तविंषीर्य्यस्यंपूर्व्वी
द्यौर्न्नक्षत्त्रमभिभूंतिपुष्यांत् ॥ ४७ ॥ आनंः ॥ आनऽइन्द्रोंदूरादा
नंऽआसादंभिष्टिकृदवंसेयासदुग्ग्रः ॥ ओजिष्ठेभिर्न्नृपतिर्ब्बज्ज्रंबाहुःसु

ङ्गसुमत्त्सुंतुर्व्वाणिः÷पृतन्न्यून् ॥ ४८ ॥ आनं÷ ॥ आनऽइन्द्रोहरिंभिर्य्या
त्वच्छांर्व्वाचीनोवंसेराधंसेच ॥. तिष्ठांतिव्वज्ज्रीमघवांव्विरप्प्शीमँय्यज्ञ
मनुंनोव्वाजंसातौ ॥ ४९ ॥ त्रातारमिन्द्रंम् ॥ त्रातारमिन्द्रंमविता
रमिन्द्रङ्ँहवेंहवेसुहवङ्ँशूरमिन्द्रंम् ॥ ह्वयांमिशक्रम्पुरुहूतमिन्द्रङ्ँ
स्वस्तिनोंमघवांधात्विन्द्रंः ॥ ५० ॥ इन्द्रंःसुत्रामां ॥ इन्द्रंःसुत्रा
मास्ववाँ२ ॥ ऽअवोंभिंःसुमृडीकोभंवतुव्विश्वंवेदाः ॥ बाधंतान्द्वेषो
ऽअभंयङ्कृणोतुसुवीर्य्यंस्यपतंयःस्याम ॥ ५१ ॥ तस्यंव्वयम् ॥ त
स्यंव्वयङ्ँसुंमतौयज्ञियस्यापिंभद्रेसौंमनसेस्यांम॥ससुत्रामास्ववाँ२ ॥

ऽइन्द्रोऽअस्मेऽआराच्चिद्द्वेषः सनुतर्युयोतु ॥ ५२ ॥ आमन्द्रैः ॥
आमन्द्रैरिन्द्रहरिभिर्य्याहिमयूररोमभिः ॥ मात्त्वाकेचिन्नियमन्विन्न
पाशिनोतिधन्वेवताँ२ ॥ ऽइंहि ॥ ५३ ॥ एवेत् ॥ एवेदिन्द्रंवृषणंवज्ज्र
बाहुंवसिष्ठासोऽअभ्यर्च्चन्त्यर्कैः ॥ सनंस्तुतोवीरवद्धातुगोमद्यूयम्पा
तस्वस्तिभिःसदानः ॥ ५४ ॥ [८] समिद्धोऽअग्निः ॥ समिद्धो
ऽअग्निरश्विनातप्तोघर्म्मोव्विराट्सुतः ॥ दुहेधेनुःसरस्वतीसोमंशु
क्रमिहेन्द्रियम् ॥ ५५ ॥ तनूपाभिषजा । सुतेऽश्विनोभासरस्व
ती ॥ मध्वारजांसीन्द्रियमिन्द्रायपथिभिर्वहान् ॥ ५६ ॥ इन्द्रायेन्दु

म् ॥ इन्द्रायेन्दुꣳसरस्वतीनराशꣳसेननग्नहुम् ॥ अधातामश्विना
मधुभेषजम्भिषजासुते ॥ ५७ ॥ आजुह्वानासरस्वतीन्द्रायेन्द्रिया
णिवीर्य्यम् ॥ इडाभिरश्विनाविषꣳसमूर्ज्जꣳसꣳरयिन्दधुः ॥ ५८ ॥
अश्विनानमुचेः । सुतꣳसोमꣳशुक्रम्परिस्रुता ॥ सरस्वतीतमा
भरद्बर्हिषेन्द्रायपातवे ॥ ५९ ॥ कवष्योन । व्यचस्वतीरश्वि
ब्भ्यान्नदुरोदिशः ॥ इन्दोनरोदसीऽउभेदुहेकामान्त्सरस्वती ॥
॥ ६० ॥ उषासानक्तम् ॥ उषासानक्तमश्विनादिवेन्द्रꣳसायमिन्द्रि
यैः ॥ सञ्जानानेसुपेशसासमञ्जातेसरस्वत्त्या ॥ ६१ ॥ पातन्नः ॥

पा॒तन्नो॑ऽअश्विना॒दिवा॑पा॒हिनक्त॑ꣳसरस्वति ॥ दैव्या॑होताराभिषजा
पा॒तामिन्द्र॒ꣳसचा॑सु॒ते ॥ ६२ ॥ ति॒स्रस्त्रे॒धा । सर॑स्वत्त्य॒श्विना॒भा
र॒तीडा॑ ॥ ती॒व्रम्प॑रिस्रु॒तासोम॒मिन्द्रा॑यसुषु॒वु॒र्म्मद॑म् ॥ ६३ ॥ अ
श्विना॑भेष॒जम् ॥ अ॒श्विना॑भेष॒जम्मधु॑भेष॒जन्न॒ःसर॑स्वता ॥ इन्
त्त्वष्टा॒यश॒ःश्रिय॑ꣳरूपꣳरू॒पमधु॒ःसु॒ते ॥ ६४ ॥ ऋ॒तु॒थेन्द्र॑÷ ॥ ऋ॒तु॒थे
न्द्रो॒वन॒स्पति॑÷शशमा॒नःप॑रिस्रु॒ता॑ ॥ की॒लाल॑म॒श्विभ्या॒म्मधु॑दु॒हे॒धे॒
नुःसर॑स्वती ॥ ६५ ॥ गोभि॒र्न्न । सोम॑म॒श्विना॒मास॑रेणपरि॒स्रुता॑ ॥
सम॑धात॒ꣳसर॑स्वत्त्या॒स्वाहेन्द्रे॑सु॒तम्मधु॑ ॥ ६६ ॥ [१२] अश्वि

नाहविः ॥ अश्विनाहविरिन्द्रियन्नमुचेर्द्धियासरस्वती ॥ आशुक्र
मासुराद्वसुमघमिन्द्रायजभ्रिरे ॥ ६७ ॥ यमश्विना ॥ यमश्वि
नासरस्वतीहविषेन्द्रमवर्द्धयन् ॥ सबिभेदव्वलम्मघन्नमुचावासुरेस
चा ॥ ६८ ॥ तमिन्द्रम् ॥ तमिन्द्रम्पशवःसचाश्विनोभासरस्वती ॥
दधानाऽअभ्यनूषतहविषायज्ञऽइन्द्रियैः ॥ ६९ ॥ यऽइन्द्रे ॥
यऽइन्द्रऽइन्द्रियन्दधुःसविताव्वरुणोभगः ॥ ससुत्रामाहविष्पतिर्य
जमानायसश्चत ॥ ७० ॥ सविताव्वरुणः ॥ सविताव्वरुणोदधद्यज
मानायदाशुषे ॥ आदत्तनमुचेर्व्वसुसुत्रामाबलमिन्द्रियम् ॥ ७१ ॥

व्वरुणꣳक्षत्रम् ॥ व्वरुणꣳक्षत्रमिन्द्रियम्भगेनसविताश्रियम् ॥ सुत्रामायशसाबलन्दधानायज्ञमाशत ॥ ७२ ॥ अश्विनागोभिः ॥ अश्विनागोभिरिन्द्रियमश्वेभिर्व्वीर्य्यम्बलम् ॥ हविषेन्द्रꣳसरस्वतीयजमानमवर्द्धयन् ॥ ७३ ॥ तानासत्त्या । सुपेशसाहिरण्यवर्त्तनीनरा ॥ सरस्वतीहविष्मतीन्द्रकर्म्मसुनोवत ॥ ७४ ॥ ताभिषजा । सुकर्म्मणासासुदुघासरस्वती ॥ सवृत्रहाशतक्रतुरिन्द्रायदधुरिन्द्रियम् ॥ ७५ ॥ युवꣳसुरामम् ॥ युवꣳसुराममश्विनानमुचावासुरेसचा ॥ व्विपिपानाःसरस्वतीन्द्रङ्कर्म्मस्वावत ॥ ७६ ॥ पुत्रमिवपितरौ ॥

पुत्रमिवपितरावश्विनोभेन्द्रावथुःकाव्यैर्द्दꣳसनाभिः ॥ यत्सुरामं
व्यपिबꣳशचीभिꣳसरस्वतीत्वामघवन्नभिष्णक ॥ ७७ ॥ यस्मिन्न
श्वासः ॥ यस्मिन्नश्वासऽऋषभासऽउक्षणोवशामेषाऽअवसृष्टासु
ऽआहुताः ॥ कीलालपेसोमपृष्ठायवेधसेहृदामतिञ्जनयचारुमग्नये ॥
॥ ७८ ॥ अहाव्यग्ने । हविरास्येतेस्रुचीवघृतञ्चम्वीवसोमः ॥ वा
जसनिꣳरयिमस्मेसुवीरम्प्रशस्तन्धेहियशसम्बृहन्तम् ॥ ७९ ॥
[१३] ॥ शतम् ॥ १२०० ॥ अश्विनातेजसाचक्षुःप्राणेनसरस्वती
वीर्य्यम् ॥ वाचेन्द्रोबलेनेन्द्रायदधुरिन्द्रियम् ॥ ८० ॥ गोमदूषुणास

त्त्या ॥ गोमदूषुणासत्त्याश्वावद्यातमश्विना ॥ वर्त्तीरुद्रानृपाय्यम्
॥ ८१ ॥ नयत् ॥ नयत्त्परोनान्तरऽआदधर्षद्वृषण्वसू॥दुःशंसोम
र्त्योरिपुः ॥ ८२ ॥ तानः ॥ तानऽआवोढमश्विनारयिम्पिशङ्गसन्दृ
शम् ॥ धिष्ण्यांवरिवोविदम् ॥ ८३ ॥ पावकानः ॥ पावकानःसर
स्वतीवाजेभिर्वाजिनीवती ॥ यज्ञंवष्टुधियावसुः ॥ ८४ ॥ चोदयित्री
सूनृतानाम् ॥ चोदयित्रीसूनृतानाञ्चेतन्तीसुमतीनाम् ॥ यज्ञन्दधे
सरस्वती ॥ ८५ ॥ महोऽअर्णः ॥ महोऽअर्णःसरस्वतीप्रचेतय
तिकेतुना ॥ धियोविश्वाविराजति ॥ ८६ ॥ इन्द्रायाहि । चित्रभा

नोसुताऽइमेत्त्वायवंः ॥ अण्वींभिस्त्तनांपूतासंः ॥ ८७ ॥ इन्द्रायां
हि । धियेषितोव्विप्प्रंजूतꣳसुतावंतꣳ ॥ उपुब्ब्रह्मांणिव्वाघतंः ॥ ८८ ॥
इन्द्रायांहि॥इन्द्रायांहितूतुंजानुऽउपुब्ब्रह्मांणिहारिवः ॥ सुतेदंधिष्व
नुश्च्चनंः ॥८९॥ अश्श्विनांपिब्बताम् ॥ अश्श्विनांपिबताम्मधुसरंस्व
त्यासुजोषंसा ॥ इन्द्रःसुत्त्रामांवृत्रहाजुषन्तांꣳसोम्म्यम्मधुं ॥९०॥
[११] इति वाजसनेयशुक्लयजुस्संहितापाठेविंशोऽध्यायः ॥ २० ॥

इयं वाजसनेयसंहितापूर्वार्द्धं मुम्बय्यां क्षेमराज-श्रीकृष्णदास
श्रेष्ठिना स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्)-मुद्रणालये
मुद्रयित्वा प्रकाशितम्। संवत् २०४७, शके १९१२

॥ इति वाजसनेयसंहितापूर्वविंशतिः समाप्ता ॥

॥ अथ वाजसनेयसंहितोत्तरविंशतिप्रारंभः ॥

श्रीगणेशाय नमः ॥ हरिं÷ॐम् ॥ इमम्मेसमिद्धोअग्निरेकादशकौ
वसंतेनऋतुनाषड्ढोतायक्षत्त्समीधाग्निंद्धादशाश्विनौछागस्ययसत्तद्देवंब
हिँश्चतुर्द्दशषडेकषाष्टिः ॥ ॐ इमम्मेंव्वरुणश्श्रुधीहवंमुद्याचंमृडय ॥
त्त्वामंवुस्स्युराचंके ॥ १ ॥ तत्त्वां । यामिब्रह्मंणाव्वन्दंमानुस्त्तदाशा
स्त्तेयजंमानोहुविर्ब्भिः÷ ॥ अहेडमानोवरुणेहबोद्ध्युरुंशꣳसुमानुऽआ
युःप्प्रमोंषीः ॥ २ ॥ त्त्वन्न÷ ॥ त्त्वन्नोंऽअग्ग्नेव्वरुणस्याविद्वान्देवस्युहे
डोऽअवंयासिसीष्ठाः ॥ यजिष्ठोवह्नितमुःशोशुंचानोविश्वाद्वेषांꣳसि
प्प्रमुंमुग्ध्युस्म्मत् ॥ ३ ॥ सत्त्वम् ॥ सत्त्वन्नोंऽअग्ग्नेवुमोभंवोतीने

दिष्टोऽअस्याऽउषसोव्व्युष्टौ ॥अवयक्ष्वनोव्वरुणꣳरराणोव्वीहिमृडीक
ꣳसुहवोनऽएधि ॥ ४ ॥ महीमूषु । मातरꣳसुव्व्रतानामतस्यपत्नी
मवसेहुवम ॥ तुविक्षत्रामजरन्तीमुरूचीꣳसुशर्म्माणमदितिꣳसुप्र
णीतिम् ॥ ५ ॥ सुत्त्रामाणम्पृथिवीम् ॥ सुत्त्रामाणम्पृथिवीन्द्यामने
हसꣳसुशर्म्माणमदितिꣳसुप्रणीतिम् ॥ दैवीन्नावꣳस्वरित्त्रामनाग
समस्रवन्तीमारुहेमास्वस्तये ॥ ६ ॥ सुनावमारुहेयम् ॥ सुनावमा
रुहेयमस्रवन्तीमनागसम् ॥ शतारित्त्राꣳस्वस्तये ॥ ७ ॥ आनः ॥
आनोमित्रावरुणाघृतैर्ग्गव्यूतिमुक्षतम् ॥ मद्ध्वारजाꣳसिसुक्रतू ॥

॥ ८ ॥ प्रबाहवा॑ । सिसृतञ्जीवसे॑नुऽआनोगव्यू॑तिमुक्षतङ्घृतेन॑ ॥ आ
मुाजनैश्श्रवयतंयुवानाश्श्रुतम्मैमित्रावरुणाहवेमा ॥ ९ ॥ शन्नः॑ ॥
शन्नोभवन्तुवाजिनोहवेषुदेवतातामितद्रवःस्वर्काः ॥ जम्भयन्तोहिंवृ
कंरक्षांꣳसिसनेम्म्यस्मद्युयवन्नमीवाः ॥ १० ॥ वाजेवाजेवत ॥ वा
जिनोनोधनेषुविप्राऽअमृताऽऋतज्ञाः ॥ अस्यमद्ध्वः पिबतमादयद्ध्वं
न्तृप्तायातपथिभिर्देवयानैः ॥ ११ ॥ समिद्धोऽअग्निः । समिधासुसं
मिद्धोवरेण्यः ॥ गायत्रीच्छन्दऽइन्द्रियन्त्र्यविर्गौर्वयोदधुः ॥ १२ ॥
तनूनपाच्छुचिव्रतः ॥ तनूनपाच्छुचिव्रतस्तनूपाश्चसरस्वती ॥ उ

ष्णिहाच्छन्दंऽइन्द्रियन्दित्त्यवाड्गौर्व्वयोदधुः ॥ १३ ॥ इडाभिरग्निः ॥ इडाभिरग्निरीड्यःसोमोदेवोऽअमर्त्त्यः ॥ अनुष्टुप्छन्दऽइन्द्रियम्पञ्चाविर्ग्गौर्व्वयोदधुः ॥ १४ ॥ सुबर्हिरग्निः । पूषण्वान्त्स्तीर्ण्णबर्हिरमर्त्त्यः ॥ बृहतीच्छन्दंऽइन्द्रियन्त्रिवत्सोगौर्व्वयोदधुः ॥ १५ ॥ दुरोदेवीः ॥ दुरोदेवीर्दिशोमहीर्ब्रह्मादेवोबृहस्पतिः ॥ पङ्क्तिश्छन्दऽइहेन्द्रियन्तुर्य्यवाड्गौर्व्वयोदधुः ॥ १६ ॥ उषेयह्वीसुपेशसाविश्वेदेवाऽअमर्त्त्याः ॥ त्रिष्टुप्छन्दंऽइहेन्द्रियम्पष्ठवाड्गौर्व्वयोदधुः ॥ १७ ॥ देव्याहोतारा । भिषजेन्द्रेणसयुजायुजा ॥ जगतीच्छन्दंऽइन्द्रियमनड्वा

ङ्गौर्व्वयोदधुꣳ ॥ १८ ॥ तिस्रऽइडा ॥ तिस्रऽइडासरस्वतीभारतीमरु
तोव्विशः ॥ विराट्छन्दऽइहेन्द्रियन्धेनुर्ग्गौर्न्नव्वयोदधुꣳ ॥ १९ ॥ त्वष्टा
तुरीपः ॥ त्वष्टातुरीपोऽअद्भुतऽइन्द्राग्नीपुष्टिवर्द्धना ॥ द्विपदाच्छन्द
ऽइन्द्रियमुक्षाग्गौर्न्नव्वयोदधुꣳ ॥२०॥ शमितानः ॥ शमितानोव्वनस्प
तिःसविताप्प्रसुवन्भगम् ॥ ककुप्छन्दऽइहेन्द्रियंव्वशाव्वेहद्व्वयोदधुꣳ ॥
॥२१॥ स्वाहायज्ञम् ॥ स्वाहायज्ञंव्वरुणꣳसुक्षत्रोभेषजङ्करत् ॥ अति
च्छन्दाऽइन्द्रियम्बृहदृषभोग्गौर्व्वयोदधुꣳ ॥२२॥ [२२] व्वसन्तेनऽऋ
तुना । देवाव्वसवस्त्रिवृतास्तुताः ॥ रथन्तरेणतेजसाहविरिन्द्रेव्वयोदधुꣳ

॥ २३ ॥ ग्रीष्मेणऽऋतुना । देवा रुद्राः पञ्चदशे स्तुताः ॥ बृहता यशसा बलꣳ हविरिन्द्रे वयो दधुः ॥ २४ ॥ वर्षाभिर्ऋतुनादित्त्या स्तोमे सप्तदशे स्तुताः ॥ वैरूपेण विशौजसा हविरिन्द्रे वयो दधुः ॥ २५ ॥ शारदेनऽऋतुना ॥ देवाऽएकविꣳशऽऋभव स्तुताः ॥ वैराजेन श्रिया श्रियꣳ हविरिन्द्रे वयो दधुः ॥ २६ ॥ हेमन्तेनऽऋतुना ॥ देवास्त्रिणवे मरुत स्तुताः ॥ बलेन शक्वरीः सहो हविरिन्द्रे वयो दधुः ॥ २७ ॥ शैशिरेणऽऋतुना । देवास्त्रयस्त्रिꣳशेऽमृता स्तुताः ॥ सत्त्येन रेवतीः क्षत्रꣳ हविरिन्द्रे वयो दधुः ॥ २८ ॥ [६] होता यक्षत् ॥ होता यक्षत्समिधा

ग्निमिडस्पदेऽश्विनेन्द्रꣳसरस्वतीमजोधूम्रोनगोधूमैꣳकुवलैर्भेषज
म्मधुशष्पैर्न्नतेजंऽइन्द्रियम्पयꣳसोम÷परिस्रुताघृतम्मधुव्यन्त्वाज्ज्य
स्यस्यहोतर्य्यज ॥ २९ ॥ होतायक्षत्तनूनपात्सरस्वतीम् ॥ होता
यक्षत्तनूनपात्सरस्वतीमविर्म्मेषोनभेषजम्पथामधुमताभरन्नश्विने
न्द्रायवीर्य्यम्बदरैरुपवाकाभिर्भेषजन्तोक्मभिःपयꣳसोम÷परिस्रुता
घृतम्मधुव्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ३० ॥ होतायक्षन्नराश
सन्ननग्नहुम्पतिꣳसुरयाभेषजम्मेषꣳसरस्वतीभिषग्रथोनचन्द्र्य
श्विनोर्व्वपाऽइन्द्रस्यवीर्य्यम्बदरैरुपवाकाभिर्भेषजन्तोक्मभिःपयꣳ

सोमं÷ परिस्रुतांघृतम्मधुव्यन्त्वाज्ज्यंस्युहोतुर्य्यजं ॥ ३१ ॥ होता
यक्षदिडेडितं ॥ होतायक्षदिडेडितऽआजुह्वानुंऽसरंस्वतीमिन्द्रम्ब
लैनवर्द्धयंन्नृषभेणगवैन्द्रियमश्श्विनेन्द्रांयभेषजंय्यवैः÷कर्क्कन्धुंभिर्म्म
धुंलाजैर्न्नमासंरम्पयुंऽसोमं÷परिस्रुतांघृतम्मधुव्यन्त्वाज्ज्यंस्युहोतुर्य्य
जं ॥ ३२ ॥ होतायक्षद्बर्हिरूर्णम्म्रदाऽ ॥ होतायक्षद्बर्हिरू
र्णम्म्रदाभिषङ्नासंत्त्याभिषजाश्श्विनाश्श्वाशिशुंमतीभिषग्ग्धेनुःसर
स्वतीभिषग्ग्दुहऽइन्द्रांयभेषजम्पयुंऽसोमं÷परिस्रुतांघृतम्मधुव्यन्त्वा
ज्ज्यंस्युहोतुर्य्यजं ॥ ३३ ॥ होतांयक्षद्दुरोदिशः । कवष्य्यो

नव्यचंस्वतीरुश्विब्भ्यान्नदुरोदिशुऽइन्द्रोनरोदंसीदुघेंदूहेधेनुःसरंस्व
त्युश्विनेन्द्रायभेषुजꣳशुक्रन्नज्ज्योतिरिन्द्रियम्पयुꣳसोमं÷परिस्रुतांघृ
तम्मधुव्यन्त्वाज्ज्यंस्युहोतुर्य्यंज ॥ ३४ ॥ होतायक्षत्सुपेशंसोषे ।
नक्तन्दिवाऽश्विनासमंञ्जातेसरंस्वत्त्यात्त्विषिमिन्द्रेनभेषुजꣳश्येनो
नरजंसाहृदाश्रियानुमासंरम्पयुꣳसोमं÷परिस्रुतांघृतम्मधुव्यन्त्वा
ज्ज्यंस्युहोतुर्य्यंज ॥ ३५ ॥ होतायक्षुद्दैव्याहोतारा । भिषजाश्वि
नेन्द्रन्नजागृविदिवानक्तन्नभेषुजैःशूषꣳसरंस्वतीभिषक्कसीसेनदुहऽइ
न्द्रियम्पयुꣳसोमं÷परिस्रुतांघृतम्मधुव्यन्त्वाज्ज्यंस्युहोतुर्य्यंज ॥३६॥

होता॑यक्षत्ति॒स्रोदे॒वीः ॥ होता॑यक्षत्ति॒स्रोदे॒वीर्न्नभे॑ष॒जन्त्रय॑स्त्रि॒धात॑वो॒पसो॑रू॒पमिन्द्रे॑हिर॒ण्ण्यय॑म॒श्विनेडा॒भार॑तीव्वा॒चासर॑स्वती॒मह॒ऽइन्द्रा॑यदु॒हऽइन्द्रि॒यम्पय॒ꣳसोम॑ः ॥ परि॒स्रुता॑घृ॒तम्मधु॒व्यन्त्वा॒ज्ज्य॑स्य॒होत॒र्य्यज॑ ॥ ३७ ॥ होता॑यक्ष॒त्सुरेत॑समृष॒भम् ॥ होता॑यक्ष॒त्सुरेत॑समृष॒भन्नर्य्या॑पसन्त्वष्टा॑र॒मिन्द्र॑म॒श्विना॑भि॒षज॒न्नसर॑स्वती॒मोजो॒नजू॒तिरि॑न्द्रि॒यंव्वृको॒नर॑भ॒सोभि॒षग्ग्यश॒ꣳसुर॑याभेष॒जꣳश्रि॒यानमास॑र॒म्पय॒ꣳसोम॑ःपरि॒स्रुता॑घृ॒तम्मधु॒व्यन्त्वाज्ज्य॑स्य॒होत॒र्य्यज॑ ॥ ३८ ॥ होता॑यक्ष॒द्वन॒स्प्पति॑ꣳशमि॒तार॑म् ॥ होता॑यक्ष॒द्वन॒स्प्पति॑ꣳशमि॒ता

संहि.
॥१८०॥

र्ꣳशतक्रतुम्भीममन्युꣳराजानंव्याघ्रन्नमसाश्विनाभामꣳसरस्व
तीभिषगिन्द्रायदुहऽइन्द्रियम्पयꣳसोमः परिस्रुताघृतम्मधुव्यन्त्वा
ज्ज्यस्यहोतर्यज ॥ ३९ ॥ होतायक्षदग्निꣳस्वाहा ॥ होतायक्षद
ग्निꣳस्वाहाज्ज्यस्यस्तोकानाꣳस्वाहामेदसाम्पृथक्स्वाहागच्छाग
मश्विभ्याꣳस्वाहामेषꣳसरस्वत्यैस्वाहाऽऋषभमिन्द्रायसिꣳहाय
सहसऽइन्द्रियꣳस्वाहाग्निन्नभेषजꣳस्वाहासोममिन्द्रियꣳस्वाहेन्द्र
ꣳसुत्रामाणꣳसवितारंवरुणम्भिषजाम्पतिꣳस्वाहावनस्पतिम्प्रिय
म्पाथोनभेषजꣳस्वाहादेवाऽआज्ज्यपाजुषाणोऽअग्निर्भेषजम्पयꣳसो

उ अ

मं॑ःपरि॑स्रुतां॑घृ॒तम्मधु॒व्यन्त्वाज्य॑स्य॒होतु॒र्य्यज॑ ॥ ४० ॥ [१२] हो
ता॑यक्षद॒श्विनौ॒च्छाग॑स्य । व॒पाया॒मेद॑सो॒जुषे॒ताᳫं॑ह॒विर्होतु॒र्य्यज॑ ॥
होता॑यक्ष॒त्सर॑स्वतीम्मे॒षस्य॑व॒पाया॒ मेद॑सो॒जुष॒ताᳫं॑ह॒विर्होतु॒र्य्यज॑ ॥
होता॑यक्ष॒दिन्द्र॑मृष॒भस्य॑व॒पाया॒मेद॑सो॒जुष॒ताᳫं॑ह॒विर्होतु॒र्य्यज॑ ॥४१॥
होता॑यक्षद॒श्विनौ॒सर॑स्वतीम् ॥ होता॑यक्षद॒श्विनौ॒सर॑स्वती॒मिन्द्र॑ᳫं
सु॒त्रामा॑णमि॒मेसोमाः॑सु॒रामा॑ण॒श्छागै॒र्न्नमे॒षैर्ऋ॑ष॒भैः सु॒ताः शष्पै॒र्न्नतो
क्मभि॒र्ल्लाजै॒र्म्मह॑स्वन्तो॒मदा॒मास॑रेण॒परि॑ष्कृताः शु॒क्राः पय॑स्वन्तो॒मृ
ताः प्रस्थि॑तावो॒मधु॒श्चुत॒स्तान॒श्विना॒सर॑स्व॒तीन्द्रः॑सु॒त्रामा॑वृत्र॒हाजु॒ष

न्ता॑ꣳसोम्म्यम्मधु॒पिब॑न्तु॒मद॑न्तु॒व्यन्तु॒होत॒र्य्य॑ज ॥४२॥ होता॑यक्षद॒
श्विनौ॒च्छाग॑स्य । ह॒विष॒ऽआत्ता॑म॒द्यम॑द्ध्य॒तोमेद॒ऽउद्भृ॑तम्पु॒राद्द्वेषो॑
भ्यःपु॒रापौरु॑षेय्या॒गृ॒भो॒घस्ता॑न्नू॒नङ्घा॒सेऽअ॑ज्ज्राणां॒यव॑सप्प्रथमाना
ꣳसु॒मत्क्ष॑राणाꣳशतरु॒द्रिया॑णामग्निष्वात्तानां॒पीवो॑पवसनानाम्पा
र्श्व॒तःश्रो॑णि॒तःशि॑तामत॒ऽउ॑त्साद॒तोऽङ्गा॑दङ्गा॒दव॑त्तानाङ्कर॑त॒ऽएवाश्वि
ना॑जु॒षेता॒ꣳह॒विर्हो॑त॒र्य्य॑ज ॥ ४३ ॥ होता॑यक्ष॒त्सर॑स्वती॒म्मे॒षस्य॑ह॒वि
ष॒ऽआव॑य॒द॒द्यम॑द्ध्य॒तोमेद॒ऽउद्भृ॑तम्पु॒राद्द्वेषो॑भ्यःपु॒रापौरु॑षेय्या॒गृभो
घस॑न्नू॒नङ्घा॒सेऽअ॑ज्ज्राणां॒यव॑सप्प्रथमानाꣳसु॒मत्क्ष॑राणाꣳशतरु॒द्रि

या॑णामग्निष्ष्वा॒त्ताना॒म्पीवो॑पवसनाना॒म्पार्श्व॒तःश्रोणि॒तःशि॒ताम॒
त॒ऽउ॑त्त्सा॒द॒तो॒ऽङ्गा॑दङ्गा॒दव॑त्ताना॒ङ्कर॑द्दे॒वꣳसर॑स्वतीजुषता॒ꣳहविर्हो॑त॒र्य्य॑
ज ॥ ४४ ॥ होता॑यक्ष॒दिन्द्र॑मृष॒भस्य॑ह॒विष॒ऽआव॑यदु॒द्यम॑द्ध्य॒तोमेद॒ऽ
उद्धृ॑त॒म्पु॒राद्वेषो॑भ्यऽपु॒रापौरु॑षेय्यागृ॒भोघस॑न्नू॒नङ्घा॒सेऽअ॑ज्ज्रा॒णां॑यव॑
सप्प्रथमानाꣳसु॒मत्क्ष॑राणाꣳशतरु॒द्रिया॑णामग्निष्ष्वा॒त्ताना॒म्पीवो॑प
वसनाना॒म्पार्श्व॒तःश्रोणि॒तःशि॒ताम॒तउ॑त्त्सा॒द॒तो॒ऽङ्गा॑दङ्गा॒दव॑त्ताना॒
ङ्कर॑द्दे॒वमिन्द्रो॑जु॒षता॒ꣳहविर्हो॑त॒र्य्य॑ज ॥ ४५ ॥ होता॑यक्ष॒द्वन॒स्प॑तिम॒
भि । हिपि॒ष्ट॑तमया॒रभि॑ष्ठयारश॒नया॑धित ॥ यत्रा॒श्विनो॒श्छाग॑स्य

हुविषं÷प्प्रियाधामांनियत्रसरंस्वत्त्यामेषस्यंहुविषं÷प्प्रियाधामांनिय
त्रेन्द्रंस्यऽऋषुभस्यंहुविषं÷प्प्रियाधामांनियत्राग्ग्नेः प्प्रियाधामांनियत्र
सोमंस्यप्प्रियाधामांनियत्रेन्द्रंस्यसुत्राम्म्णं÷प्प्रियाधामांनियत्रंसवि
तुःप्प्रियाधांमानियत्रव्वरुंणस्यप्प्रियाधामांनियत्रव्वनस्प्पतें÷प्प्रियापा
थांᳫंसियत्रंदेवानांमाज्ज्युपानांप्प्रियाधामांनियत्राग्ग्नेहोंतुं÷प्प्रिया
धामांनितत्रैतान्प्प्रस्तुत्त्यैवोपस्तुत्त्यैवोपावंस्स्रक्षद्रभींयसऽइवकृत्त्वीकरं
देवन्देवोव्वनस्प्पतिंर्ज्जुषतांᳫंहुविर्होंतुर्य्यंज ॥४६॥ होतांयक्षदुग्ग्निᳫं
स्विष्टकृतम् ॥ होतांयक्षदुग्निᳫंस्विष्टकृतमयांडुग्ग्निरुश्श्विनोच्छागंस्य

ह॒विष॑÷प्प्रि॒याधामा॒न्यया॒ट्स॑रस्व॒त्त्यामे॒षस्य॑ह॒विष॑÷प्प्रि॒याधामा॒न्यया॒
डिन्द्र॑स्यऽऋ॒ष॒भस्य॑ह॒विष॑÷ प्प्रि॒याधामा॒न्यया॑ड॒ग्ग्नेः॒प्प्रि॒याधामा॒न्य
या॒ट्सोम॑स्यप्प्रि॒याधामा॒न्यया॒डिन्द्र॑स्यसु॒त्राम्म्ण॑÷प्प्रि॒याधामा॒न्यया॑ट्स
वि॒तुः॒प्प्रि॒याधामा॒न्यया॒ड्व॒रु॑णस्यप्प्रि॒याधामा॒न्यया॒ड्व॒नस्प्पते॑÷प्प्रि॒या
पाथा॒ꣳस्यया॑ड्दे॒वाना॑माज्ज्य॒पाना॑म्प्प्रि॒याधामा॑नियक्ष॑द॒ग्ग्नेर्हो॑तु॒÷प्प्रि॒
याधामा॑नियक्ष॒त्त्स्वम्म॑हि॒मान॒माय॑जता॒मेज्ज्या॒ऽइष॑÷कृणोतु॒सोऽअ॑द्ध्व
राजा॒तवे॑दाजु॒षता॒ꣳह॒विर्हो॑तु॒र्य्यज॑ ॥४७॥ [७] दे॒वम्ब॒र्हि॑ꣳसर॑स्वतीसु॒
दे॒वमिन्द्रे॒ऽअ॒श्श्विना॑ ॥ तेजो॒नच॑क्षु॒रक्ष्यो॑र्ब्ब॒र्हिषा॑दधु॒रिन्द्रि॒यव्व॑सु॒वने॑व्व

सु॒धेय॑स्यव्व्यन्तु॒यज॑ ॥ ४८ ॥ दे॒वीर्द्वार÷ ॥ दे॒वीर्द्वारो॑ऽअ॒श्विना॑भि॒षजे
न्द्रे॒सर॑स्वती ॥ प्रा॒णन्नवी॒र्य॑न्न॒सिद्वारो॑दधु॒रिन्द्रि॒यं॑व्वसु॒वने॑व्वसु॒धेय॑स्य
व्व्यन्तु॒यज॑ ॥४९॥ दे॒वीऽउ॒षासौ॑ ॥ दे॒वीऽउ॒षासा॑व॒श्विना॑सु॒त्रामे॒न्द्रे॒सर
स्वती ॥ बल॒न्नवाच॑मा॒स्य॑ऽउ॒षाभ्यां॑न्दधु॒रिन्द्रि॒यं॑व्वसु॒वने॑व्वसु॒धेय॑स्य
व्व्यन्तु॒यज ॥ ५० ॥ दे॒वीजोष्ट्री॑ ॥ दे॒वीजोष्ट्री॒सर॑स्वत्य॒श्विनेन्द्र॑मवर्द्धँ
यन् ॥ श्रो॒त्रन्नकर्ण्ण॑यो॒र्य॑शो॒जोष्ट्री॑भ्या॒न्दधु॒रिन्द्रि॒यं॑व्वसु॒वने॑व्वसु॒धेय॑
स्यव्व्यन्तु॒यज ॥ ५१ ॥ दे॒वीऽऊ॒र्जाहु॑ती ॥ दे॒वीऽऊ॒र्जाहु॑ती॒दुघे॑सु॒दुघे॒न्द्रे
सर॑स्वत्य॒श्विना॑भि॒षजा॑वतꣳ ॥ शु॒क्रन्नज्ज्योति॒स्तन॑यो॒राहु॑तीधत्तऽ

इ॒न्द्रि॒यंव्व॑सु॒वने॑व्वसु॒धेय॑स्यव्व्यन्तु॒यज॑ ॥५२॥ दे॒वादे॒वाना॑म् ॥ दे॒वादे॒वा
ना॑म्भि॒षजा॒होता॑रा॒विन्द्र॑म॒श्विना॑ । व॒ष॒ट्का॒रैःसर॑स्वती॒त्त्विषि॒न्नहृद॑
ये म॒तिꣳहोतृ॑ब्भ्यान्दधु॒रिन्द्रि॒यंव्व॑सु॒वने॑व्वसु॒धेय॑स्यव्व्यन्तु॒यज॑ ॥ ५३ ॥
दे॒वीस्ति॒स्रः॥दे॒वीस्ति॒स्रस्ति॒स्रोदे॒वीर॒श्विनेडा॒सर॑स्वती॥शूष॒न्नमद्ध्ये॒
नाब्भ्या॒मिन्द्रा॑यदधु॒रिन्द्रि॒यंव्व॑सु॒वने॑व्वसु॒धेय॑स्यव्व्यन्तु॒यज॑ ॥ ५४ ॥
दे॒वऽइन्द्रः॑ ॥ दे॒वऽइन्द्रो॑नरा॒शꣳसं॑स्त्रिवरू॒थःसर॑स्वत्त्या॒श्विब्भ्या॑मी
यते॒रथः॑ ॥ रेतो॒नरू॒पम॒मृतं॑ज॒नित्त्र॒मिन्द्रा॑य॒त्वष्टा॒दध॑दिन्द्रि॒याणि॑व्व
सु॒वने॑व्वसु॒धेय॑स्यव्व्यन्तु॒यज॑ ॥ ५५ ॥ दे॒वोदे॒वैः ॥ दे॒वोदे॒वैर्व्वन॒स्प्पति॒

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

हिरण्ण्यपर्णाऽअश्श्विब्भ्याꣳसरस्वत्त्यासुपिप्पलऽइन्द्रायपच्च्यतेम
धु ॥ ओजोनजूतिर्ऋषभोनभामंव्वनस्प्पतिर्न्नोदधदिन्द्रियाणिव्वसु
वनेव्वसुधेयस्यव्व्यन्तुयज ॥ ५६ ॥ देवम्बर्हिः ॥ देवम्बर्हिर्व्वारितीना
मद्ध्वरेस्त्तीर्ण्णमश्श्विब्भ्यामूर्ण्णम्म्रदाꣳसरस्वत्त्यास्योनमिन्द्रतेसदः
ईशायैमन्न्युꣳराजानम्बर्हिषादधुरिन्द्रियंव्वसुवनेव्वसुधेयस्यव्व्यन्तुयज
॥ ५७ ॥ देवोऽअग्निः । स्विष्टकृद्देवान्न्यक्षद्यथायथꣳहोताराविन्द्र
मश्श्विनाव्वाचाव्वाचꣳसरस्वतीमग्निꣳसोमꣳस्विष्टकृत्स्विष्टऽइन्द्रः
सुत्रामासविताव्वरुणोभिषगिष्टोदेवोव्वनस्प्पतिःस्विष्टादेवाऽआज्ज्य

पाःस्विष्टोऽअग्निरग्निनाहोताहोत्रेस्विष्टकृद्यशोनदधदिन्द्रियमूर्ज्ज
मपचितिꣳस्वधांवसुवनेवसुधेयस्यव्यन्तुयज ॥ ५८ ॥ अग्निमद्य ।
होतारमवृणीतायꣳयजमानःपचन्पक्तीःपचन्पुरोडाशान्बध्नन्नश्वि
भ्यांछागꣳसरस्वत्यैमेषमिन्द्रायऽऋषभꣳसुन्वन्नश्विभ्याꣳसर
स्वत्याऽइन्द्रायसुत्राम्णेसुरासोमान्त्सूपस्थाऽअद्य ॥५९॥ सूपस्थाऽ
अद्यदेवोवनस्पतिरभवदश्विभ्यांछागेनसरस्वत्यैमेषेणेन्द्रायऽ
ऋषभेणाक्षँस्तान्मेदस्तःप्रतिपचताग्रभीषतावीवृधन्तपुरोडाशैरपुर
श्विनासरस्वतीन्द्रःसुत्रामासुरासोमाँस्त्वामद्य ॥ ६० ॥ त्वामु

ह्यऽऋषऽआर्षेयऽऋषीणान्नपादवृणीतुयंयजमानोबुहुभ्युऽआसङ्ग
तेभ्यऽएषमेंदुवेषुवसुवार्यायंवक्ष्यतुऽइतितायादुवादेवुदानान्यदु
स्तान्यस्म्मुऽआचुशास्वाचंगुरस्वेषितश्चंहोतुरासिभद्रवाच्यायुप्रेषि
तुमानुषःसूक्तवाकायसूक्ताब्रूहि ॥ ६१ ॥ इतिवाजसनेयशुक्लयजुःसं
हितायामेकविंशोऽध्यायः ॥ २१ ॥ तेजोसिपञ्चाग्नयएकाहिंकारायद्व
तत्सवितुर्दशविभूर्मात्रैकाकायद्व आब्रह्मंस्त्रयोदश शेषादेकैकोन्नावि
ꣳशतिश्चतुस्त्रिꣳशत् ॥ ओम् तेजोसि॥तेजोसिशुक्रमुमृतंमायुष्पा
ऽआयुम्मेंपाहि ॥ देवस्यंत्वासवितुःप्रसुवेश्विनोर्बाहुभ्यांम्पूष्णोह

स्ताभ्युमादंदे ॥१॥ इमामंगृभ्णन् ॥ इमामंगृभ्णन्रशुनामृतस्यु
पूर्व्वुऽआयुंषिविदथेषुकव्या ॥ सानोऽअस्मिन्त्सुतऽआबंभूवऽऋतस्यु
सामंन्त्सुरमारपन्ती ॥२॥ अभिधाऽअंसि ॥ अभिधाऽअसिभुवंनमसि
युन्तासिधुर्ता ॥ सत्त्वमुग्निंवैश्वानुरꣳसप्रंथसङ्गच्छुस्वाहांकृतः ॥३॥
स्वुगात्त्वा ॥ देवेभ्यंः प्रजापंतयेब्रह्मन्नश्वंम्भन्त्स्यामि देवेभ्यंः
प्रजापंतयेनंराध्यासम् । तम्बंधानदेवेभ्यंः प्रजापंतयेतेनंराध्नुहि
॥४॥ प्रजापंतयेत्त्वा ॥ प्रजापंतयेत्वाजुष्टम्प्रोक्षामीन्द्राग्निभ्यान्त्वा
जुष्टम्प्रोक्षामिवायवेत्त्वाजुष्टम्प्रोक्षामिविश्वेभ्यस्त्वादेवेभ्योजुष्ट

म्प्रोक्षामिसर्व्वेभ्यस्त्वादेवेभ्योजुष्टम्प्रोक्षामि ॥ योऽअर्व्वन्तञ्जिघाꣳ
सतितमभ्यमीतिव्वरुणःपरोमर्त्तःपरःश्वा ॥५॥[५] अग्नयेस्वाहा ॥
अग्नयेस्वाहासोमायस्वाहापाम्मोदायस्वाहासवित्रेस्वाहाव्वायवेस्वा
हाव्विष्णवेस्वाहेन्द्रायस्वाहाबृहस्पतयेस्वाहामित्रायस्वाहाव्वरुणा
यस्वाहा॥६॥[१] हिङ्कारायस्वाहा ॥ हिङ्कारायस्वाहाहिङ्कृतायस्वाहा
क्रन्दतेस्वाहावक्रन्दायस्वाहाप्प्रोथतेस्वाहाप्प्रप्रोथायस्वाहागन्धा
यस्वाहाघ्घ्रातायस्वाहानिविष्टायस्वाहोपविष्टाय स्वाहासन्दिताय
स्वाहाव्वल्गतेस्वाहासीनायस्वाहाशयानायस्वाहास्वपतेस्वाहाजा

ग्ग्र॑ते॒स्वाहा॒कूज॑ते॒स्वाहा॒प्प्रबु॑द्धाय॒स्वाहा॑व्वि॒जृम्भ॑माणाय॒स्वाहा॒व्विचृ
त्ताय॒स्वाहा॒सꣳहा॑नाय॒स्वाहो॑प॑स्थिताय॒स्वाहा॒य॑नाय॒स्वाहा॒प्प्राय॑णा
य॒स्वाहा॑ ॥ ७ ॥ य॒ते॒स्वाहा॑ ॥ य॒ते॒स्वाहा॒धाव॑ते॒स्वाहो॑द्द्रावाय॒स्वाहो॒द्द्रु॑
ताय॒स्वाहा॒शूका॒राय॒स्वाहा॒शूकृ॑ताय॒स्वाहा॒निष॑ण्णाय॒स्वाहोत्त्थि॑ताय॒
स्वाहा॑जवाय॒स्वाहा॒बला॑य॒स्वाहा॑व्वि॒वर्त॑मानाय॒स्वाहा॒व्विवृ॑त्ताय॒स्वाहा॑
व्विधू॑न्न्वा॒नाय॒स्वाहा॒व्विधू॑ताय॒स्वाहा॒शुःश्रू॑षमाणाय॒स्वाहा॑शृण्व॒ते॑स्वा
हेक्ष॑माणाय॒स्वाहेक्षि॑ताय॒स्वाहा॒व्वी॑क्षिताय॒स्वाहा॑निमे॒षाय॒स्वाहा॒यद
त्ति॒तस्म्मै॒स्वाहा॒यत्त्पिब॑ति॒तस्म्मै॒स्वाहा॒यन्न्मूत्त्रङ्क॑रो॒ति॒तस्म्मै॒स्वाहा॑

कुर्व्वुतेस्वाहांकृतायुस्वाहां ॥ ८ ॥ [२] तत्त्संवितुर्व्वरेँण्ण्यम्भर्गोँदेव
स्यंधीमहि ॥ धियोयोनंःप्प्रचोदयांत् ॥ ९ ॥ हिरंण्यपाणिमूतयें ।
सवितारमुपंह्वये ॥ सचेंत्तांदेवतांपदम् ॥ १०॥ देवस्युचेतंतः ॥ देव
स्युचेतंतोमुहीम्प्रसवितुहँवामहे ॥ सुमतिँसुत्त्यराधसम् ॥ ११ ॥
सुष्टुतिँसुंमतीवृधः॥ सुष्टुतिँसुंमतीवृधोंरातिँसंवितुरींमहे ॥ प्रदे
वायंमतीविदें ॥ १२ ॥ रातिँसत्त्पंतिम् ॥ रातिँसत्त्पंतिम्मुहेसंवि
तारमुपंह्वये ॥ आसुवन्देववींतये ॥१३॥ देवस्यंसवितुः ॥ देवस्यंस
वितुर्म्मुतिमासुवंव्विश्श्वदेंव्व्यम् ॥ धियाभर्गम्मनामहे ॥ १४ ॥

अ॒ग्निꣳस्तोमे॑न । बो॑धयसमि॒धा॒नोऽअम॑र्त्त्य॒म् ॥ ह॒व्यादे॒वेषु॑नोद
धत् ॥ १५ ॥ सह॑व्य॒वाट् ॥ सह॑व्य॒वाडम॑र्त्त्यऽउ॒शिग्दू॒तश्च॒नो॑हितः ॥
अ॒ग्निर्धि॒यास॒मृ॑ण्वति ॥ १६ ॥ अ॒ग्निन्दू॒तम् ॥ अ॒ग्निन्दू॒तम्पु॒रोद॑धे
ह॒व्य॒वाह॒मुप॑ब्रुवे ॥ दे॒वाँ२ ॥ ऽआसा॑दयादि॒ह ॥ १७ ॥ अजी॑जनो
हि । पव॑मान॒सूर्य्य॑ꣳवि॒धारे॒शक्म॑ना॒पयः॑ ॥ गो॒जीर॑या॒रꣳह॑माणः॒पुर
न्ध्या ॥ १८ ॥ [९] वि॒भूर्म्मा॒त्रा । प्र॒भूःपि॒त्राश्वो॑सि॒हयो॒स्यत्त्यो॑
सि॒मयो॒स्यर्वा॑सि॒सप्ति॑रसिवा॒ज्य॒सि॒वृषा॑सिनृ॒मणा॑ऽअसि॒ययु॒र्नामा॑
सि॒शिशु॒र्नामा॑स्यादि॒त्त्याना॒म्पत्त्वान्वि॑हि॒दे॒वा॑ऽआशापालाऽएतन्दे॒वे

ब्भ्योऽश्वम्मेधायप्प्रोक्षितꣳरक्षतेहरन्तिरिहरमतामिहधृतिरिहस्वधृ
तिःस्वाहा ॥१९॥ [२] कायस्वाहा ॥ कायस्वाहाकस्मैस्वाहाकत
मस्मैस्वाहास्वाहाधिमाधीतायस्वाहामनःप्प्रजापतयेस्वाहाचित्तं
व्विज्ञातायादित्त्यैस्वाहादित्त्यैमह्यैस्वाहादित्त्यैसुमृडीकायैस्वाहास
रस्वत्त्यैस्वाहासरस्वत्त्यैपावकायैस्वाहासरस्वत्त्यैबृहत्त्यैस्वाहापू
ष्णेस्वाहापूष्णेप्प्रपत्थ्यायस्वाहापूष्णेनरन्धिषायस्वाहात्त्वष्ट्रेस्वा
हात्त्वष्ट्रेतुरीयायस्वाहात्त्वष्ट्रेपुरुरूपायस्वाहाव्विष्णवेस्वाहाव्विष्णवे
निभूयपायस्वाहाव्विष्णवेशिपिविष्टायस्वाहा ॥ २० ॥ विश्श्वेदेव

स्य॑ं । ने॒तुर्म्मर्त्तो॑वुरीतस॒ख्यम् ॥ विश्श्वो॑रा॒यऽइ॑षुध्यतिद्यु॒म्नंवृ॑णी
तपु॒ष्यसे॒स्वाहा॑२१[१]आब्र॒ह्म॑न् ॥ आब्रह्म॑न्ब्राह्म॒णोब्र॑ह्मवर्च्च॒सी
जा॑यता॒माराष्ट्रेरा॑ज॒न्य॒ꣳशूर॑ऽइष॒व्योतिव्या॒धीम॑हार॒थोजा॑यता॒न्दो
ग्ध्रीधे॒नुर्वोढा॑न॒ड्वाना॒शुःसप्ति॒ꣳपुर॑न्धि॒र्य्योषा॑जि॒ष्णूर॑थे॒ष्ठाःस॒भेयो॒यु
वा॑स्य॒यज॑मानस्यवी॒रोजा॑यतान्निका॒मेनि॑कामेनꣳप॒र्ज्जन्न्यो॑वर्षतु॒फल॑व
त्यो॒नऽओऽष॑धयꣳपच्च्यन्तां॑य्योगक्षे॒मोनः॑कल्प्पताम् ॥ २२ ॥
[१] प्रा॒णाय॒स्वाहा॑ । पा॒नाय॒स्वाहा॑व्व्या॒नाय॒स्वाहा॒चक्षु॑षे॒स्वाहा॒श्श्रो
त्रा॑य॒स्वाहा॑व्वा॒चेस्वाहा॒मन॑से॒स्वाहा ॥ २३ ॥ [१] ॥ प्राच्च्यैदि॒शे ।

स्वाहार्वाच्च्यैदिशेस्वाहादक्षिणायैदिशेस्वाहार्वाच्यैदिशेस्वाहांप्प्रती
च्यैदिशेस्वाहार्वाच्यैदिशेस्वाहोदीच्यैदिशेस्वाहार्वाच्च्यैदिशेस्वाहो
र्द्ध्वायैदिशेस्वाहार्वाच्च्यैदिशेस्वाहावाँच्च्यैदिशेस्वाहार्वाच्च्यैदिशेस्वा
हां ॥ २४ ॥ [१] अद्भ्यःस्वाहां ॥ व्वार्भ्यःस्वाहोंदकायस्वाहातिष्ठ
न्तीब्भ्यःस्वाहास्रवंन्तीब्भ्यःस्वाहास्यन्दमानाब्भ्यःस्वाहाकूप्प्या
ब्भ्यःस्वाहासूद्याब्भ्यःस्वाहाधार्ष्याँब्भ्यःस्वाहांर्ण्णवायस्वाहांसमुद्रा
यस्वाहांसरिरायस्वाहां ॥ २५ ॥ [१] व्वातायस्वाहां ॥ धूमायस्वाहा
ब्भ्रायस्वाहांमेघायस्वाहांव्विद्योतमानायस्वाहांस्तनयतेस्वाहांवस्फू

ज्जंतेस्वाहाव्वर्षतेस्वाहांवव्वर्षतेस्वाहोग्ग्रंव्वर्षतेस्वाहांशीग्घ्रंव्वर्षतेस्वाहो
द्गृह्णतेस्वाहोद्गृहीतायस्वाहांप्रुष्णतेस्वाहांशीकायतेस्वाहाप्रुष्वा
भ्यःस्वाहांह्रादुनीभ्यःस्वाहांनीहारायस्वाहां ॥ २६ ॥ [१] अग्न
येस्वाहां ॥ अग्नयेस्वाहासोमायस्वाहेन्द्रायस्वाहांपृथिव्व्यैस्वाहान्त
रिक्षायस्वाहांदिवेस्वाहांदिग्ग्भ्यःस्वाहाशांभ्यःस्वाहोर्व्व्यैंदिशेस्वा
हार्व्वाच्च्यैदिशेस्वाहां ॥ २७ ॥ [१] नक्षत्त्रेभ्यःस्वाहां । नक्षत्रि
यैभ्यःस्वाहांहोरात्त्रेभ्यःस्वाहांर्द्धमासेभ्यःस्वाहामासेभ्यःस्वाहाऽ
ऋतुभ्यःस्वाहांर्त्तवेभ्यःस्वाहांसंव्वत्सरायस्वाहाद्यावापृथिवीभ्या

संहि. भ्यःस्वाहाचन्द्रायस्वाहासूर्य्यायस्वाहारश्मिभ्यःस्वाहावसुभ्यः
॥११०॥ स्वाहारुद्रेभ्यःस्वाहादित्येभ्यःस्वाहामरुद्भ्यःस्वाहाविश्वेभ्योदे
वेभ्यःस्वाहामूलेभ्यःस्वाहाशाखाभ्यःस्वाहावनस्पतिभ्यःस्वा
हापुष्पेभ्यःस्वाहाफलेभ्यःस्वाहौषधीभ्यःस्वाहा ॥ २८ ॥ [१]
शतम् ॥ १३०० ॥ पृथिव्यैस्वाहा ॥ पृथिव्यैस्वाहान्तरिक्षायस्वाहादिवे
स्वाहासूर्य्यायस्वाहाचन्द्रायस्वाहानक्षत्रेभ्यःस्वाहाद्भ्यःस्वाहौषधी
उ.अ. भ्यःस्वाहावनस्पतिभ्यःस्वाहापरिप्लवेभ्यःस्वाहाचराचरेभ्यः
२२ स्वाहासरीसृपेभ्यःस्वाहा ॥ २९ ॥ [१] असवेस्वाहा ॥ अस

वे॒स्वाहा॒व्वस॑वे॒स्वाहा॑व्वि॒भुवे॒स्वाहा॒व्वि॒व॑स्वते॒स्वाहा॑ग॒ण॒श्रि॑ये॒स्वाहा॒ग॒ण
प॑तये॒स्वाहा॑भि॒भुवे॒स्वाहा॒धि॑पतये॒स्वाहा॑शू॒षाय॒स्वाहा॑स॑ꣳस॒र्प्पाय॒स्वा
हा॑च॒न्द्राय॒स्वाहा॒ज्ज्योति॑षे॒स्वाहा॑मलि॒म्लुचाय॒स्वाहा॒दिवा॑पतयते॒
स्वाहा॑ ॥ ३० ॥ [१] मध॑वे॒स्वाहा॑ ॥ मध॑वे॒स्वाहा॒माध॑वाय॒स्वाहा॑
शु॒क्राय॒स्वाहा॒शुच॑ये॒स्वाहा॒नभ॑से॒स्वाहा॑नभ॒स्या॒य॒स्वाहे॒षाय॒स्वाहो॒
र्ज्जा॑य॒स्वाहा॒सह॑से॒स्वाहा॑सह॒स्या॒य॒स्वाहा॒तप॑से॒स्वाहा॑तप॒स्या॒य॒स्वा
हा॑ꣳसहस्प॒तये॒स्वाहा॑ ॥ ३१ ॥ [१] व्वाजा॑य॒स्वाहा॑ । प्प्रस॒वाय॒
स्वाहा॑पि॒जाय॒स्वाहा॒क्क्रत॑वे॒स्वाहा॒स्व॒ःस्वाहा॑मू॒र्ध्ने॒स्वाहा॑व्व्यश्नु॒विने॒स्वा

हान्त्यायस्वाहान्त्यायभौवनायस्वाहाभुवनस्यपतयेस्वाहाधिपत
येस्वाहाप्प्रजापतयेस्वाहा ॥ ३२ ॥ [१] आयुर्यज्ञेन । कल्पता
ꣳस्वाहाप्प्राणोयज्ञेनकल्पताꣳस्वाहापानोयज्ञेनकल्पताꣳस्वाहा
व्यानोयज्ञेनकल्पताꣳस्वाहोदानोयज्ञेनकल्पताꣳस्वाहासमानो
यज्ञेनकल्पताꣳस्वाहाचक्षुर्यज्ञेनकल्पताꣳस्वाहाश्श्रोत्रंयज्ञेन
कल्पताꣳस्वाहाव्वाग्यज्ञेनकल्पताꣳस्वाहामनोयज्ञेनकल्पताꣳ
स्वाहात्त्मायज्ञेनकल्पताꣳस्वाहाब्ब्रह्मायज्ञेनकल्पताꣳस्वाहा
ज्ज्योतिर्यज्ञेनकल्पताꣳस्वाहास्वर्यज्ञेनकल्पताꣳस्वाहापृष्ठंय

ज्ञेनकल्पताꣳस्वाहायज्ञोयज्ञेनकल्पताꣳस्वाहा ॥ ३३॥ एकस्म्मै
स्वाहाद्वाभ्याꣳस्वाहाशतायस्वाहैकशतायस्वाहाव्युष्ट्यैस्वाहास्व
र्ग्गायस्वाहा ॥ ३४ ॥ [१] इति श्रीवाजसनेयशुक्लयजुःसंहितायांदी
र्घपाठेद्वाविंशोऽध्यायः ॥ २२ ॥ हिरण्यगर्भोयःप्राणतोद्विकौयुञ्जन्त्य
ष्टौवायष्ट्वापञ्चप्राणायतिस्त्रउत्तसक्थ्याद्वादशगायत्रीकस्त्वाषट्कौकः
स्विदष्टौकास्विद्दशसुभुःस्वयंभूस्तिस्त्रएकादशपंचषष्टिः॥ ॐहिरण्य
गर्भःसम्॥ हिरण्यगर्भःसमवर्त्तताग्ग्रेभूतस्यजातःपतिरेकऽआसी
त्॥सदाधारपृथिवीन्द्यामुतेमाङ्कस्म्मैदेवायहविषाविधेम॥१॥उपया

मगृहीतोसि॥प्प्रजापतयेत्त्वाजुष्टङ्गृह्णाम्म्येषतेयोनिꣳसूर्य्यस्तेमहिमा॥
यस्तेहन्त्संव्वत्त्सरेमहिमासम्बभूवयस्तेव्वायावन्तरिक्षेमहिमासम्ब
भूवयस्तेदिविसूर्य्येँमहिमासम्बभूवतस्म्मैतेमहिम्न्नेप्प्रजापतयेस्वा
हादेवेब्भ्यः ॥२॥ [२] यःप्प्राणतोनिमिषतोमहित्त्वैकऽइद्राजाजग
तोबभूव ॥ यऽईशेऽअस्यद्द्विपदश्च्चतुष्प्पदःकस्म्मैदेवायहविषाव्विधे
मँ ॥ ३ ॥ उपयामगृहीतोसि । प्प्रजापतयेत्त्वाजुष्टङ्गृह्णाम्म्येषतेयो
निश्च्चन्द्रमास्तेमहिमा ॥ यस्तेरात्त्रौसंव्वत्त्सरेमहिमासम्बभूवयस्ते
पृथिव्व्यामग्ग्नौमहिमासम्बभूवयस्तेनक्षत्त्रेषुचन्द्रमसिमहिमासम्ब

भूवतस्म्मैतेमाहिम्म्नेप्प्रजापतयेदेवेब्भ्युꣳस्वाहा ॥ ४ ॥ [२] युञ्ज
न्तिब्रध्नमरुषश्च्चरन्तम्परितस्त्थुषः ॥ रोचन्तेरोचनादिवि ॥ ५ ॥
युञ्जन्त्यस्य ॥ युजन्त्यस्यकाम्म्याहरीव्विपक्षसारथे ॥ शोणाधृष्णू
नृवाहसा ॥ ६ ॥ यद्वातः ॥ यद्वातोऽअपोऽअगनीगन्प्प्रियामिन्द्रस्य
तन्वम् ॥ एतꣳस्तोतरनेनपथापुनरश्वमावर्त्तयासिनः ॥ ७ ॥ व
सवस्त्त्वा । अञ्जन्तुगायत्त्रेणच्छन्दसारुद्द्रास्त्त्वाञ्जन्तुत्त्रैष्टुभेनच्छन्द
सादित्त्यास्त्त्वाञ्जन्तुजागतेनच्छन्दसा ॥ भूर्ब्भुवꣳस्वर्ल्लाजी३ञ्छाची३
न्यद्युगव्यंऽएतदन्नमत्तदेवाऽएतदन्नमद्धिप्प्रजापते ॥८॥ कꣳस्वित् ॥

कःस्विदेकाकीचरतिकऽउस्विज्जायतेपुनः ॥ किंस्विद्धिमस्यभेषज
ङ्किम्म्वावपनम्महत् ॥ ९ ॥ सूर्य्यऽएकाकी । चरतिचन्द्रमाजायते
पुनः॥अग्निर्हिमस्यभेषजम्भूमिरावपनम्महत् ॥ १०॥ कास्वित् ॥
कास्विदासीत्त्पूर्व्वचित्तिःकिंस्विदासीद्बृहद्वयः ॥ कास्विदासीत्त्पि
लिप्पिलाकास्विदासीत्त्पिशङ्गिला ॥ ११ ॥ द्यौरासीत् ॥ द्यौरासी
त्त्पूर्व्वचित्तिरश्वऽआसीद्बृहद्वयः ॥ अविरासीत्त्पिलिप्पिलारात्रिरासी
त्त्पिशङ्गिला ॥ १२ ॥ [८] वायुष्ट्वा । पचतैरवत्त्वासितग्रीवश्छा
गैर्न्यग्रोधश्चमसैःशल्मलिर्वृद्ध्या ॥ एषस्यरात्थ्योवृषापड्भिश्च

तुर्भिर्भुरेदंगन्त्ब्रह्माकृण्णश्चनोवतुनमोग्नये ॥ १३ ॥ सꣳशितोर
श्मिनारथꣳसꣳशितोरश्मिनाहयः ॥ सꣳशितोऽअप्स्वप्सुजाब्र
ह्मासोमंपुरोगवः ॥ १४ ॥ स्वयंवाजिन् ॥ स्वयंवाजिँस्तन्वङ्कल्प
यस्वस्वयंयजस्वस्वयञ्जुषस्व ॥ महिमातेन्येननसन्नशे ॥ १५ ॥
नवै ॥ नवाऽउऽएतन्म्रियसेनरिष्यसिदेवाँ ऽइदेषिपथिभिःसुगे
भिः ॥ यत्रासतेसुकृतोयत्रतेययुस्तत्रत्वादेवःसवितादधातु ॥ १६ ॥
अग्निःपशुः ॥ अग्निःपशुरासीत्तेनायन्तसऽएतँल्लोकमजयद्यस्मि
न्नग्निःसतेलोकोभविष्यतितञ्जेष्यसिपिबैताऽअपः ॥ वायुःपशुरा

सीत्तेनायजन्तसऽएतँल्लोकमजयद्यस्मिन्वायुःसतेलोकोभविष्यति
तञ्जेष्यसिपिबैताऽअपः ॥ सूर्य्यःपशुरासीत्तेनायजन्तसऽएतँल्लोक
मजयद्यस्मिन्त्सूर्य्यःसतेलोकोभविष्यतितञ्जेष्यसिपिबैताऽअपः
॥ १७ ॥ प्राणायस्वाहा । पानायस्वाहाव्यानायस्वाहा ॥ अम्बेऽअ
म्बिकेम्बालिकेनमानयतिकश्चन ॥ ससस्त्यश्वकःसुभद्रिकाङ्का
म्पीलवासिनीम् ॥ १८॥ गणानान्त्वा । गणपतिꣳहवामहेप्प्रियाणां
न्त्वाप्प्रियपतिꣳहवामहेनिधीनान्त्वानिधिपतिꣳहवामहेव्वसोमम ॥
आहमजानिगर्ब्भधमात्त्वमजासिगर्ब्भधम् ॥ १९ ॥ ताऽउभौ । चतु

र॑ःप॒दःस॒म्प्रसा॑रयावस्व॒र्ग्गे॑लो॒के॑प्प्रोर्ण्णु॑वा॒थां॑वृषा॑वा॒जीरे॑तो॒धारे॑तो॑द
धातु ॥ २० ॥ [३] उत्त्स॑क्थ्या॒ऽअव॑ । गु॒दन्धे॑हि॒सम॒ञ्जिश्चा॑रया॒वृ
षन् ॥ य॒स्त्री॒णाञ्जी॑व॒भोज॑नः ॥ २१ ॥ य॒क्का॒स॒कौ । श॑कु॒न्ति॒काह
ल॒गिति॒व्वञ्च॑ति ॥ आह॑न्तिग॒भेप॒सो॒निग॑ल्गली॑ति॒धार॑का ॥ २२ ॥ य॒
को॒स॒कौ । श॑कु॒न्त॒कऽआ॒ह॒ल॒गिति॒व्वञ्च॑ति ॥ व्वि॒व॑क्षतऽइवते॒मु॒ख॒मद्ध्व॑
र्य्यो॑मा॒नस्त्वम॒भिभा॑षथाः ॥ २३ ॥ मा॒ताच॑ । ते॒पि॒ताच॒तेऽग्रं॑वृक्ष
स्य॑रो॑हतः ॥ प्रति॑ला॒मीति॑ते॒पि॒ताग॒भेमु॒ष्टिम॑तꣳसयत् ॥ २४ ॥ मा॒
ताच॑ । ते॒पि॒ताच॒तेऽग्रे॑वृक्षस्य॑क्रीडतः ॥ व्वि॒व॑क्षतऽइवते॒मु॒खम्ब्र॑ह्म॒

ह्मात्त्वंव्वदोबहु ।। २५ ।। ऊर्द्ध्वामेनाम् ।। ऊर्द्ध्वामेनामुच्छ्रापयगिरौ
भारꣳहरन्निव ।। अथास्यैमद्ध्यमेधताꣳशीतेव्वातेपुनन्निव ।। २६ ।।
ऊर्द्ध्वमेनम् ।। ऊर्द्ध्वमेनमुच्छ्रयताद्गिरौभारꣳहरन्निव ।। अथास्यमद्ध्यं
मेजतुशीतेव्वातेपुनन्निव ।। २७ ।। यदस्याः ।। यदस्याऽअꣳहुभेद्याःकृ
धुस्थूलमुपातसत् ।।मुष्काविदस्याऽएजतोगोशफेशकुलाविव ।। २८ ।।
यद्देवासः ।।यद्देवासोललामगुम्प्रविष्टीमिनमाविषुः ।। सक्थ्नादेदिश्य
तेनारीसत्त्यस्याक्षिभुवोयथा ।।२९।। यद्धरिणः ।।यद्धरिणोयवमत्तिनपु
ष्टम्पशुमन्न्यते ।।शूद्रायदर्य्यजारानपोषायधनायति ।।३०।।यद्धरिणोय

वमत्तिनपुष्टम्बहुमन्न्यंते॥शूद्द्रोयदर्य्यायैजारोनपोषमनुंमन्न्यते॥३१॥
दधिक्क्राव्णोऽअकारिषञ्जिष्ण्णोऽरश्श्वस्यव्वाजिनः ॥ सुरभिनोमुखा
करत्त्प्रणऽआयूꣳषितारिषत् ॥ ३२ ॥ [२२] गायत्त्रीत्त्रिष्टुब्जगत्त्य
नुष्टुप्पङ्क्त्यासह ॥ बृहत्त्युष्ण्णिहाककुप्पसूचीभिःशम्म्यन्तुत्त्वा ॥
॥ ३३ ॥ द्विपदायाः ॥ द्विपदायाश्च्चतुष्प्पदास्त्रिपदायाश्च्चषट्पदाः ॥
व्विच्छंन्दायाश्च्चसच्छंन्दाःसूचीभिःशम्म्यन्तुत्त्वा ॥ ३४ ॥ महाना
म्न्योरेवत्त्यः ॥ महानाम्न्योरेवत्त्योव्विश्श्वाऽआशाःप्प्रभूवरीः ॥ मै
घीर्व्विद्युतोव्वाचःसूचीभिःशम्म्यन्तुत्त्वा ॥ ३५ ॥ नार्य्यस्त्तेपत्न्यो

लोमव्विचिन्वन्तुमनीषया ॥ देवानाम्पत्न्योदिशःसूचीभिःशम्म्य
न्तुत्त्वा ॥ ३६ ॥ रजताहरिणीःसीसायुजोयुज्ज्यन्तेकर्म्मभिः ॥ अ
श्वस्यव्वाजिनस्त्वचिसिमाःशम्म्यन्तुशम्म्यन्तीः ॥ ३७ ॥ कुविद
ङ्ग ॥ यवमन्तोयवञ्चिद्यथादान्त्यनुपूर्व्वंव्वियूय ॥ इहेहैषाङ्कृणुहिभोज
नानियेबर्हिषोनमऽउक्तिंय्यजन्ति ॥ ३८ ॥ [८] कस्त्वा ॥ कस्त्वा
च्छ्यतिकस्त्वाव्विशास्तिकस्तेगात्राणिशम्म्यति ॥ कऽउतेशमिता
कविः ॥३९॥ ऋतवस्त्ते ॥ ऋतवस्त्तऽऋतुथापर्व्वंशमितारोव्विशासतु॥
संव्वत्सरस्यतेजसाशमीभिःशम्म्यन्तुत्त्वा ॥ ४० ॥ अर्द्धमासाःप

ऋथ्ठंषितेमासाऽआच्छ्यन्तुशम्म्यन्तः ॥ अहोरात्राणिमरुतोवि
लिष्टँसूदयन्तुते ॥ ४१ ॥ दैव्याऽअद्ध्वर्य्यवस्त्वाच्छ्यन्तुविचशा
सतु॥गात्राणिपर्व्वशस्तेसिमाःकृण्ण्वन्तुशम्म्यन्तीः ॥ ४२ ॥ द्यौस्ते ।
पृथिव्यन्तरिक्षंवायुश्छिद्रम्पृणातुते ॥ सूर्य्यस्तेनक्षत्रैःसहलोकङ्कृणो
तुसाधुया ॥ ४३ ॥ शन्ते ॥ शन्तेपरेभ्योगात्रेभ्यःशमस्त्ववरे
भ्यः ॥ शमस्थभ्योमज्जभ्यःशम्वस्तुतन्वैतव ॥४४॥ [६] कः
स्वित् ॥ कःस्विदेकाकीचरतिकऽउस्विज्जायतेपुनः ॥ किंथ्ठंस्विद्धिम
स्यभेषजङ्किम्वावपनम्महत् ॥ ४५ ॥ सूर्य्यऽएकाकी । चरतिचन्द्र

मांजायतेपुनः ॥ अग्निर्हिमस्यंभेषजम्भूमिरावपनम्महत् ॥ ४६ ॥
किꣳस्वित् ॥ किꣳस्वित्सूर्य्यꣳसमञ्ज्योतिःकिꣳसमुद्रसमꣳसरः ॥
किꣳस्वित्पृथिव्यैवर्षीयःकस्यमात्रानविद्यते ॥ ४७ ॥ ब्रह्मसूर्य्यꣳस
मम् ॥ ब्रह्मसूर्य्यꣳसमञ्ज्योतिर्द्यौःसमुद्रसमꣳसरः ॥ इन्द्रःपृथिव्यैव
र्षीयान्गोस्तुमात्रानविद्यते ॥ ४८ ॥ पृच्छामित्वा । चितयेदेवसख
यदित्वमत्रमनसाजगन्थ ॥ येषुविष्णुस्त्रिषुपदेष्वेष्टस्तेषुविश्व
म्भुवनमाविवेश ॥ ४९ ॥ अपितेषु । त्रिषुपदेष्वंस्मियेषुविश्व
म्भुवनमाविवेशं ॥ सद्यःपर्य्येमिपृथिवीमुतद्यामेकेनाङ्गेनदिवोऽअस्य

पृष्टम् ॥ ५० ॥ केष्वन्तः । पुरुषऽआविवेशकान्यन्तःपुरुषेऽअर्प्पि
तानि ॥ एतद्ब्रह्मन्नुपंवल्हामसित्त्वाकिंस्विन्नःप्प्रतिंवोचास्यत्रं ॥
॥ ५१ ॥ पञ्चस्वन्तः । पुरुषऽआविवेशतान्यन्तःपुरुषेऽअर्प्पितानि ॥
एतत्त्वात्रप्प्रतिमन्वानोऽअस्म्मिनमाययाभवस्युत्तरोमत् ॥ ५२ ॥
[८] कास्वित् ॥ कास्विदासीत्त्पूर्व्वचित्तिःकिंस्विदासीद्बृहद्वयः ॥
कास्विदासीत्त्पिलिप्पिलाकास्विदासीत्त्पिशङ्गिला ॥ ५३ ॥ द्यौरासी
त् ॥ द्यौरासीत्त्पूर्व्वचित्तिरश्वऽआसीद्बृहद्वयः ॥ अविरासीत्त्पिलिप्पि
लारात्त्रिरासीत्त्पिशङ्गिला ॥ ५४ ॥ काऽईम् ॥ काऽईमरेपिशङ्गिला

काऽईङ्कुरुपिशाङ्गिला ॥ कऽईंमुास्कन्देमर्षतिकऽईंम्पन्थुांव्विसर्प्पति ॥
॥ ५५ ॥ अुजारे । पिशाङ्गिलाश्श्वाुवित्त्कुंरुपिशाङ्गिला ॥ शुशऽअुास्क
न्दंमर्षुत्त्यहिुंऽपन्थुांव्विसर्प्पति ॥ ५६ ॥ कत्त्यंस्य । व्विष्ठाःकत्त्युक्षरा
णिकतिुहोमांसऽंकातिुधासमिद्धःऽ ॥ युज्ञस्यंत्त्वाव्विुदथांपृच्छुमत्त्रकातिु
होतांरऽऋतुशोयंजन्ति ॥ ५७ ॥ षडस्य । व्विष्ठाःशुतमुक्षराण्ण्यशीु
तिर्होमाःसुमिधोहतिुस्त्रः ॥ युज्ञस्यंतेव्विुदथुाप्प्रब्र्ववीमिसुप्तहोतारऽ
ऋतुशोयंजन्ति ॥ ५८ ॥ कोऽअुस्य । व्वेदुभुवंनस्युनाभिुङ्कोद्यावापृ
थिुवीऽअुन्तरिक्षम् ॥ कःसूर्य्यस्यव्वेदबृहुतोजुनित्त्रङ्कोव्वेदचुन्द्रमसंस्य

तोजाः ॥ ५९ ॥ व्वेदाहम् ॥ व्वेदाहमस्यभुवंनस्यनाभिंव्वेदद्यावांपृथि
वीऽअन्तरिक्षम् ॥ व्वेदसूर्य्यस्यबृहतोजनित्रमथोव्वेदचन्द्रमसंय्यतो
जाः ॥ ६० ॥ पृच्छामित्त्वा ॥ पृच्छामित्त्वापरमन्तम्पृथिव्याः पृ
च्छामियत्रभुवनस्यनाभिः ॥ पृच्छामित्त्वावृष्ण्णोऽअश्वस्यरेतः पृ
च्छामिव्वाचः परमंव्योम ॥ ६१ ॥ इयंव्वेदिः ॥ इयंव्वेदिः परोऽअन्तः
पृथिव्याऽअयंय्यज्ञोभुवनस्यनाभिः ॥ अयꣳसोमोवृष्ण्णोऽअश्वस्यरे
तोब्रह्मायंव्वाचः परमंव्योम ॥ ६२ ॥ [१०] सुभूः स्वयम्भूः । प्प्रथ
मोन्तम्महत्यर्ण्णवे ॥ दधेहगर्ब्भमृत्त्वियंय्यतोजातः प्प्रजापतिः ॥

॥ ६३ ॥ होता॑यक्षत् ॥ होता॑यक्षत्प्र॒जाप॑ति॒ꣳसोम॑स्यमहि॒म्नः ॥ जु॒षता॒म्पिब॑तु॒सोम॒ꣳहोत॒र्यज॑ ॥ ६४ ॥ प्रजा॑पते॒न । त्वदे॒तान्य॒न्योविश्वा॑रू॒पाणि॒परि॒ताब॑भूव ॥ यत्का॑मास्तेजुहु॒मस्तन्नो॑ऽअस्तु॒व॒यꣳस्या॑मप॒त॑योर॒यी॒णाम् ॥ ६५ ॥ [३] इति॑ श्रीवाजसनेयशुक्लयजुस्संहितायांदीर्घपाठेत्रयोविंशोऽध्यायः ॥ ॥ २३ ॥ अश्वस्तूपरोधूम्रान्वसंतायसमुद्रायशिशुमारान्मयुःप्राजापत्त्योदशकाश्चत्त्वारश्चत्वारिꣳशत् ॥ ॐ अश्व॑स्तूप॒रः ॥ अश्व॑स्तूप॒रोगो॑मृ॒गस्ते॑प्रा॑जाप॒त्त्याःकृ॒ष्णग्री॑वऽआग्ने॒योर॒राटे॑पु॒रस्ता॑त्सारस्व॒तीमे॒ष्य॒धस्ता॒द्ध

न्वोराश्विनावधोरामौबाह्वोःसौमापौष्णःश्यामोनाभ्यांꣳसौर्य
यामौश्वेतश्च्चकृष्णश्च्चपार्श्वयोस्त्वाष्ट्रौलोमशसक्क्थौसक्थ्योर्व्वायु
व्यःश्वेतःपुच्छऽइन्द्रायस्वपस्यायव्वेहद्वैष्णवोव्वामनः ॥१॥ रोहितो
धूम्म्ररोहितः । कर्क्कन्धुरोहितस्त्तेसौम्म्याबभ्रुररुणबभ्रुःशुकबभ्रु
स्त्तेव्वारुणाःशितिरन्ध्रोऽन्यतःशितिरन्ध्रःसमन्तशितिरन्ध्रस्त्तेसावित्त्रा
ःशितिबाहुरन्यतःशितिबाहुःसमन्तशितिबाहुस्त्तेबार्हस्पत्त्याःपृष
तीक्षुद्रपृषतीस्त्थूलपृषतीतामैत्त्रावरुण्ण्यः ॥ २ ॥ शुद्धबालःसर्व्वशु
द्धबालोमणिबालस्त्तऽआश्विनाःश्येतःश्येताक्षोरुणस्त्तेरुद्रायपशुपत

येकर्ण्णायामाऽअवलिप्तारौद्रानभोरूपाःपार्ज्जन्न्याः ॥ ३ ॥ पृ
श्निस्तिरश्चीनपृश्निः ॥ पृश्निस्तिरश्चीनपृश्निरूर्द्ध्वपृश्निस्तेमारु
ताःफल्गूर्ल्लोहितोर्ण्णीपलक्षीताःसारस्वत्यःप्लीहाकर्ण्णःशुण्ठाकर्ण्णो
ऽद्ध्यालोहकर्ण्णस्तेत्वाष्ट्राःकृष्णग्रीवःशितिकक्षोऽञ्जिसक्थस्तऽऐन्द्रा
ग्नाःकृष्णाञ्जिरल्पाञ्जिर्म्महाञ्जिस्तऽउषस्याः ॥ ४ ॥ शिल्पावै
श्वदेव्यः ॥ शिल्पावैश्वदेव्योरोहिण्यस्त्र्यवयोवाचेविज्ञाताऽअदि
त्यैसरूपाधात्रेवत्सतर्य्योदेवानाम्पत्नीभ्यः ॥ ५ ॥ कृष्णग्रीवा
आग्नेयाः । शितिभ्रवोवसूनाꣳरोहितारुद्राणाꣳश्वेताऽअवरोकि

ण॑ऽआदि॒त्याना॒न्नभो॑रूपाःपा॒र्ज्ज॒न्याः ॥ ६ ॥ उ॒न्न॒तऽऋ॑ष॒भः ॥ उ॒न्न॒तऽऋ॑ष॒भोवा॑म॒नस्त्तऽऐ॑न्द्रावै॒ष्ण्ण॒वाऽउ॑न्न॒तःशि॑तिबा॒हुःशि॑तिपृष्ठस्त्तऽऐन्द्राबार्हस्प॒त्त्याःशु॒क॑रूपावाजि॒नाःक॒ल्म्माषा॑ऽआग्निमारु॒ताःश्या॒माःपौ॒ष्ण्णाः ॥ ७ ॥ एता॑ऽऐन्द्रा॒ग्नाः ॥ एता॑ऽऐन्द्रा॒ग्नाद्वि॑रू॒पाऽअ॑ग्नीषो॒मीया॑वाम॒नाऽअ॑न॒ड्वाह॑ऽआग्नावैष्ण्ण॒वाव॒शामै॑त्रावरुण्यो॒न्यत॑ऽएन्यो मै॒त्र्यः ॥ ८ ॥ कृष्ण्णग्री॑वाऽआग्ने॒याः ॥ कृष्ण्णग्री॑वाऽआग्ने॒याब॒भ्रवःसौ॒म्म्याःश्वे॒तावा॑य॒व्या॒ऽअवि॑ज्ञाता॒ऽअदि॑त्यै॒सरू॑पाधा॒त्रेव॑त्स॒तर्यो॒दे॒वाना॒म्पत्नी॑भ्यः ॥ ९ ॥ कृ॒ष्ण्णाभौ॒माः ॥ कृष्ण्णा

भौमाधूम्म्राऽआन्तरिक्षाबृहन्तोदिव्याःशबलावैद्युताःसिध्मास्तार
काः ॥ १० ॥ [१०] धूम्म्रान्वसन्ताय ॥ धूम्म्रान्वसन्तायालभते
श्वेतान्ग्रीष्म्मायकृष्णान्वर्षाभ्योऽरुणाञ्छरदेपृषतोहेमन्तायपिश
ङ्गाञ्छिशिराय ॥ ११ ॥ त्र्यवयोगायत्र्यै । पञ्चावयस्त्रिष्टुभेदित्यवाहोज
गत्यैत्रिवत्साऽअनुष्टुभेतुर्य्यवाहऽउष्णिणहे ॥ १२ ॥ पष्ठवाहोविराजे ॥
पष्ठवाहोविराजऽउक्षाणोबृहत्त्याऽऋषभाःककुभेनड्वाहःपङ्क्त्यैधेन
वोतिच्छन्दसे ॥ १३ ॥ कृष्णग्ग्रीवाऽआग्नेयाः ॥ कृष्णग्ग्रीवाऽआग्नेयाब
भ्रवःसौम्याऽउपध्वस्ताःसावित्रावत्सतर्य्यःसारस्वत्त्यःश्यामाःपौ

ष्णाःपृश्न्नयोमारुताबहुरूपावैश्वदेवावशाद्यावापृथिवीयाः ॥ १४ ॥
उक्ताःसंश्चराः ॥ उक्ताःसंश्चराऽएताऽऐन्द्राग्नाःकृष्णावारुणाःपृश्न्न
योमारुताःकायास्तूपराः ॥ १५ ॥ अग्नयेनीकवते । प्रथमजानाल
भतेमरुद्भ्यःसान्तपनेभ्यःसवात्यान्मरुद्भ्योगृहमेधिभ्योबष्किहा
न्मरुद्भ्यःक्रीडिभ्यःसंसृष्टान्मरुद्भ्यःस्वतवद्भ्योनुसृष्टान् ॥ १६ ॥
उक्ताःसंश्चराः ॥ उक्ताःसंश्चराऽएताऽऐन्द्राग्नाःप्राशृङ्गामाहेन्द्राबहु
रूपावैश्वकर्म्मणाः ॥ १७ ॥ धूम्म्राबभ्रुनीकाशाः । पितृणांसोमवता
म्बभ्रवोधूम्म्रनीकाशाः ॥ पितृणांबर्हिषदाङ्कृष्णाबभ्रुनीकाशाःपितृ

णामग्निष्वात्तानाङ्कृष्णाः पृषन्तस्त्रैयम्बकाः ॥१८॥ उक्ताःसञ्चरा ॥
उक्ताःसञ्चराऽएताःशुनासीरीयाःश्वेतावायव्याःश्वेताःसौर्याः॥१९॥
वसन्तायकपिञ्जलान्॥वसन्तायकपिञ्जलानालभतेग्रीष्मायकलवि
ङ्कान्वर्षाभ्यस्तित्तिरीञ्छरदेवर्त्तिकाहेमन्तायककराञ्छिशिरायविक
करान् ॥२०॥ [१०] समुद्रायशिशुमारान् ॥ समुद्रायशिशुमाराना
लभतेपर्ज्जन्यायमण्डूकानद्भ्योमत्स्यान्मित्रायकुलीपयान्वरुणाय
नाक्रान् ॥ २१ ॥ सोमायहꣳसान् ॥ सोमायहꣳसानालभतेवायवे
बलाकाऽइन्द्राग्निभ्याङ्क्रुञ्चान्मित्रायमद्गून्वरुणायचक्रवाकान्॥

॥ २२ ॥ अग्नयेकुटरून् ॥ अग्नयेकुटरूनालंभतेवनस्पतिभ्यऽ
उलूकानग्नीषोमाभ्याञ्चाषानश्विभ्याम्मयूरान्मित्रावरुणाभ्या
ङ्कपोतान् ॥ २३ ॥ सोमायलबानालंभतेत्वष्ट्रेकौलीकान्गोषादीर्देवा
नाम्पत्नीभ्यऽकुलीकादेवजामिभ्योग्नयेगृहपतयेपारुष्णान् २४॥
अह्नेपारावतान् ॥ अह्नेपारावतानालंभतेरात्र्यैसीचापूरहोरात्रयोः
सन्धिभ्योजतूम्मासेभ्योदात्यौहान्त्संवत्सरायमहतःसुपर्णान् ॥
॥ २५ ॥ भूम्म्याऽआखून् ॥ भूम्म्याऽआखूनालंभतेन्तरिक्षायपाङ्क्त्रा
न्दिवेकशान्दिग्भ्योनकुलान्बभ्रुकानवान्तरदिशाभ्यः ॥ २६ ॥

व॒सभ्य॒ऽऋश्या॑न् ॥ व॒सु॑भ्य॒ऽऋश्या॒नाल॑भतेरु॒द्रेभ्यो॑रु॒रू॑नादि॒त्ये
भ्यो॒न्यङ्कू॒न्विश्वे॑भ्योदे॒वेभ्यः॑पृष॒तान्त्साध्ये॒भ्यःकुलु॒ङ्गान्॥२७॥
ईशा॑नाय॒पर॑स्वतऽ ॥ ईशा॑नाय॒पर॑स्वत॒ऽआल॑भतेमि॒त्राय॑गौ॒रान्वरु॑
णायमहि॒षान्बृह॒स्पत॑येगव॒याँस्त्वष्ट्र॒ऽउष्ट्रा॑न् ॥ २८ ॥ प्र॒जाप॑तय॒
पुरु॑षान् ॥ प्र॒जाप॑तये॒पुरु॑षान्ह॒स्तिन॒ऽआल॑भतेवा॒चेप्लु॒षीँश्च॒क्षु॑षे
म॒शका॒न्छ्रोत्रा॑य॒भृङ्गा॑ऽ॥२९॥शतम् ॥ १४०० ॥ प्र॒जाप॑तयेच । वा॒य
वे॑चगोमृ॒गोवरु॑णायार॒ण्योमे॒षोय॒माय॒कृष्णो॑मनु॒ष्य॒राजाय॑म॒र्कटः॑
शार्दू॒लाय॑रो॒हिदृ॑ष॒भाय॑गव॒यीक्षि॑प्रश्ये॒नाय॒वार्त्ति॑कानील॑ङ्गोऽक्रि॒मि॑ःस

मुद्रायशिंशुमारोहिमवतेहस्ती ॥ ३० ॥ [१०] मयुःप्राजापत्त्यः ॥ मयुःप्राजापत्त्यऽउलोहलिक्ष्णोवृषदंशस्तेधात्रेदिशाङ्कुङ्क्षो धुङ्क्षाग्नेयीकलविङ्कोलोहिताहिःपुष्करसादस्तेत्वाष्ट्रायवाचेक्रुञ्चः ॥ ॥ ३१ ॥ सोमायकुलुङ्गः ॥ सोमायकुलुङ्गऽआरण्योजोनकुलःशकातेपौष्ण्णाःक्रोष्टामायोरिन्द्रस्यगौरमृगःपिद्वोन्यङ्कुःकक्कुटस्तेनुमत्त्यैप्रतिश्रुत्कायैचक्रवाकः ॥ ३२ ॥ सौरीबलाका । शार्गःसृजयःशयाण्डकस्तेमैत्राःसरस्वत्त्यैशारिःपुरुषवाक्श्वाविद्भौमीशार्दूलोवृकःपृदाकुस्तेमन्यवेसरस्वतेशुकःपुरुषवाक् ॥ ३३ ॥ सुप

र्ण्णःपार्ज्जन्यः ॥ सुपर्ण्णःपार्ज्जन्यऽआतिर्व्वाहसोदर्व्विदातेव्वायवेबृह
स्प्पतयेव्वाचस्प्पतयेपैङ्गराजोलजऽआन्तरिक्षःप्लवोमद्गुर्म्मत्त्स्यस्त्तेन
दीपतयेद्यावापृथिवीयःकूर्म्मः ॥ ३४ ॥ पुरुषमृगश्चन्द्रमसः ॥
पुरुषमृगश्चन्द्रमसोगोधाकालकादार्व्वाघाटस्त्तेव्वनस्पतीनाङ्कृकवाकुः
सावित्त्रोहꣳसोव्वातस्यनाक्क्रोमकरःकुलीपयस्त्तेकूपारस्यह्रियैशल्य
कः ॥ ३५ ॥ एण्यह्नः ॥ एण्यह्नोमण्डूकोमूषिकातित्तिरिस्त्तेस
र्प्पाणांल्लोपाशऽआश्विनःकृष्णोरात्र्याऽऋक्षोजतूःसुषिलीकातऽइतर
जनानाञ्जहकाव्वैष्णवी ॥ ३६ ॥ अन्न्यवापोर्द्धमासानामृश्यो

मयूरः सुपर्ण्णस्तेगन्धर्व्वाणामपामुद्द्रोमासाङ्कश्यपोरोहित्त्कुण्डृणाची
गोलत्तिकातेप्प्सरसाम्मृत्त्यवेसितः ॥३७॥ वर्षाहूर्ऋतूनाम् ॥ वर्षाहू
र्ऋतूनामाखुःकशोमान्थालस्तेपितृणाम्बलायाजगरोवसूनाङ्कपिञ्ज
लःकपोतऽउलूकःशशस्तेनिर्ऋत्त्यैवरुणायारण्योमेषः ॥३८॥ श्वित्रऽ
आदित्त्यानाम् ॥ श्वित्रऽआदित्त्यानामुष्ट्रोघृणीवान्वार्ध्रीनसस्तेम
त्त्याऽअरण्यायसृमरोरुरूरौद्रःक्वयिःकुटरुर्द्दात्त्यौहस्तेवाजिनाङ्कामा
यपिकः ॥ ३९ ॥ खड्गोवैश्वदेवः । श्वाकृष्ण्णःकर्ण्णोगर्द्दभस्तरक्षुस्तेर
क्षसामिन्द्रायसूकरःसिꣳहोमारुतःकृकलासःपिप्पकाशकुनिस्तेशर

व्यायैव्विश्वैषान्देवानाम्पृषुतः ॥ ४० ॥ [४] इतिश्रीवाजसनेयशुक्लयजुःसंहितायांदीर्घपाठेचतुर्विंशोऽध्यायः ॥ २४ ॥ शादंदद्भिर्नवैकैकाहिरण्यगर्भश्चतस्रआनोदशमानोमित्रोयदश्श्वस्याष्टकौयत्तेषाडिमानुकंद्वेपंचदशसप्तचत्त्वारिꣳशत् ॥ ॐम् ॥ शादंन्दद्भिः ॥ शादंन्दद्भिरवकान्दन्तमूलैर्म्मृदम्बर्स्वैस्तेगान्दꣳष्ट्राभ्याꣳसरस्वत्त्याऽअग्रजिह्वञ्जिह्वायाऽउत्त्सादमवक्क्रन्देनतालुवाजꣳहनुभ्यामपऽआस्येऽनुवृषणमाण्डाभ्यामादित्त्याँश्मश्श्रुभिःपन्थानम्भ्रूभ्यान्द्यावापृथिवीव्वर्त्तोभ्यांव्विद्युतङ्कनीनकाभ्याꣳशुक्लायस्वाहाकृष्णायस्वा

हापार्य्यांणिपक्ष्मांण्यवार्य्याऽइक्षवोव्वार्य्याणिपक्ष्मांणिपार्य्याऽइक्षवः
१॥ [१] व्वातंम्प्राणेनं ॥ व्वातंम्प्राणेनापानेननासिकेऽउपयाममध
रेणौष्ठेंनसदुत्तरेणप्प्रकाशेनान्तंरमनूकाशेनबाह्यंन्निवेष्ष्यम्मूर्द्ध्नास्तंन
यित्नुन्निर्ब्बाधेनाशनिंम्मस्तिष्क्केणव्विद्युतंङ्कनीनंकाभ्याङ्कर्णाभ्याꣳ
श्रोत्रꣳश्रोत्राभ्याङ्कर्णौतेदनीमंधरकण्ठेनापःशुंष्क्ककण्ठेनंचित्तम्म
न्यांभिरदिंतिꣳशीर्ष्णानिर्ऋतिन्निर्ज्जर्ज्जल्प्येनशीर्ष्णासंङ्क्रोशैः
प्प्राणान्रेष्ष्माणंꣳस्तुपेनं॥२॥ [१] मशकान्केशैः॥ मशकान्केशैरि
न्द्रꣳस्वपंसाव्वहेनबृहस्प्पतिꣳशकुनिसादेनंकूर्म्मांञ्छफैराक्क्रमंणꣳ

स्थू॒राभ्या॑मृ॒क्षला॑भिः क॒पिञ्ज॑लाञ्ज॒वञ्जङ्घा॑भ्याम॒ध्वान॑म्बा॒हुभ्या॒ञ्जा
म्बी॑लेनार॑ण्यम॒ग्निम॑तिरु॒ग्भ्याम्पू॒षण॑न्दो॒र्भ्याम॒श्विना॑व॒ꣳसाभ्या॑
ꣳरु॒द्रꣳरोरा॑भ्याम्॥३॥[१]अ॒ग्नेः प॑क्ष॒तिः।अ॒ग्नेः प॑क्ष॒तिर्वा॒योर्निप॑क्ष
ति॒रिन्द्र॑स्य तृ॒तीया॒ सोम॑स्य चतु॒त्थ्यर्दि॑त्त्यै पञ्च॒मीन्द्रा॒ण्यै ष॒ष्ठी म॒रुता॒ꣳ
सप्त॒मी बृह॒स्पते॑रष्ट॒म्यर्य॒म्णो न॑व॒मी धा॒तुर्द॑श॒मीन्द्र॑स्यैकाद॒शी व
रु॑णस्य द्वाद॒शी य॒मस्य॑ त्रयोद॒शी ॥४॥ [१] इ॒न्द्रा॒ग्न्योः प॑क्ष॒तिः सर॑स्व
त्यै निप॑क्ष॒तिर्मि॒त्रस्य॑ तृ॒तीया॒पां च॑तु॒र्थी निर्ऋ॑त्यै पञ्च॒म्य॒ग्नीषोम॑
योः ष॒ष्ठी स॒र्पाणा॒ꣳ सप्त॒मी विष्णो॑रष्ट॒मी पू॒ष्णो न॑व॒मी त्वष्टु॒र्द॑श॒मीन्द्र॑

स्यैकादशीव्वरुणस्यद्वादशीयम्म्यैत्रयोदशीद्यावापृथिव्योर्द्दक्षिणम्पा
र्श्वँव्विश्श्वेषान्देवानामुत्तरम् ॥ ५ ॥ [१] मरुताꣳस्कन्धाः ॥ मरुताꣳ
ꣳस्कन्धाव्विश्श्वेषान्देवानाम्प्रथमाकीकसारुद्राणान्द्वितीयादित्याना
न्तृतीयाव्वायोः पुच्छमग्नीषोमयोर्भासदौ क्रुञ्चौ श्श्रोणिभ्यामिन्द्रा
बृहस्पतीऽउरुभ्याम्मित्रावरुणावल्गाभ्यामाक्रमणꣳस्त्थूराभ्या
म्बलङ्कुष्ठाभ्याम् ॥ ६ ॥ [१] पूषणव्वनिष्ठुनान्धाहीन्त्स्थूलगुद
यासर्प्पान्गुदाभिर्व्विह्रुतऽआन्त्रैरपोव्वस्तिनाव्वृषणमाण्डाभ्यांव्वाजिन
ꣳशेपेनप्प्रजाꣳरेतसाचाषान्पित्तेनप्प्रदरान्पायुनाकूश्माञ्छकपि

संहि. ण्डैः ॥ ७ ॥ [१] इन्द्र॑स्यक्क्रो॒डः ॥ इन्द्र॑स्यक्क्रो॒डोदि॑त्त्यैपाज॒
॥२०७॥ स्यन्दि॒शां॑जत्र॒वोदि॑त्त्यैभ॒सज्जी॒मूता॑न्हृदयौप॒शेना॒न्तरि॑क्षम्पुरी॒तता॒न
भ॑ऽउद॒र्य्ये॑णंचक्रवा॒कौमत॑स्न्नाभ्या॒न्दिवं॑वृक्काभ्यां॑ङ्गि॒रीन्प्ला॒शिभि॒रु
पं॑लान्प्ली॒न्हाव्व॒ल्म्मीका॑न्क्लो॒मभि॑र्ग्ग्लौ॒भि॑र्ग्गु॑ल्म्मा॑न्हि॒राभि॒ः स्त्रवं॑न्तीर्ह्र॒
दान्कु॒क्षिभ्यां॑ᳲसमु॒द्रमु॒दरे॑णव्वैᳲश्वानरम्भस्म्म॑ना ॥ ८ ॥ [१]
व्विधृं॑तिन्नाभ्यां॑ । घृतᳲरसे॑नापोयू॒ष्णणामरी॑चीर्व्विप्प्रु॒ड्भिर्न्नी॑हा॒रमू॒ष्म्म
उ.अ. णांशी॒नंव्वसं॑याप्प्रु॒ष्व्वाऽअश्श्रु॑भिर्ह्रा॑द॒नीर्द्दू॑षीका॑भिरस्न्नारक्षां॑ᳲसिचि॒
२५ त्राण्यङ्गै॒र्न्नक्ष॑त्त्राणिरू॒पेणंपृथि॒वीन्त्वचाजु॑म्ब॒कायस्वाहा॑ ॥ ९ ॥ [१]

हिरुण्युगुर्ब्भःसम् ॥ हिरुण्युगुर्ब्भःसमंवर्त्तुताग्ग्रेभूतस्यंजुातःपतिुरेक
ऽआसीत् ॥ सदांधारपृथिुवीन्द्यामुतेमाङ्कस्मैंदुवायंहुविषांव्विधेम ॥
॥ १० ॥ यःप्प्राणुतः ॥ यःप्प्राणुतोनिमिषुतोमंहिुत्त्वैकुऽइद्द्राजुाजग
तोबुभूवं ॥ यऽईशेंऽअुस्याद्विपदुश्चतुंष्पदुःकस्म्मैंदुवायंहुविषांव्विधेम॥
॥ ११ ॥ यस्येुमे । हिुमवंन्तोमहिुत्त्वायस्यंसमुद्द्रꣳरुसयांसुहाहुः ॥
यस्येुमाःप्प्रुदिशुोयस्यंबुाहूकस्म्मैंदुवायंहुविषांव्विधेम ॥ १२ ॥ यऽ
आंत्त्मुदाः ॥ यऽआंत्त्मुदाबंलुदायस्युव्विश्श्वंऽउुपासंतेप्प्रुशिषुंय्य
स्यंदुवाः ॥ यस्यंच्छुायामृतुंय्यस्यंमृत्त्युःकस्म्मैंदुवायंहुविषांव्विधेम॥

॥ १३ ॥ [४] आनं÷ ॥ आनोभुद्राःक्रतवोयन्तुविश्वतोदब्धासोऽअप
रीतासऽउद्भिदं÷ ॥ देवानोयथासदमिद्वृधेऽअसन्नप्प्रायुवोरक्षितारोदि
वेदिवे ॥ १४ ॥ देवानाम्भद्रा । सुमतिर्ऋजूयतान्देवानाꣳरातिरभि
नोनिवर्त्तताम् ॥ देवानाꣳसख्यमुपसेदिमाव्वयन्देवानऽआयुःप्प्र
तिरन्तुजीवसे ॥ १५ ॥ तान्पूर्व्वयानिविदाहूमहेव्वयम्भगम्मित्रमदि
तिन्दक्षमस्रिधम् ॥ अर्य्यमणंव्वरुणꣳसोममश्विनासरस्वतीनःसुभ
गामयस्करत् ॥१६॥ तन्न÷ ॥ तन्नोव्वातोमयोभुव्वातुभेषजन्तन्मातापृ
थिवीतत्पिताद्यौः ॥ तद्ग्रावाणःसोमसुतोमयोभुवस्तदश्विनाशृणत

न्धि॒षण्ण्यायुवम् ॥१७॥ तमीशा॑नम् ॥ तमीशा॑न॒ञ्जग॑तस्त॒स्थुष॒स्प
तिं॑न्धियञ्जि॒न्वमव॑सेहूमहेव्व॒यम्॥पू॒षानो॒यथा॒व्वेद॑सा॒मस॑द्वृ॒धेर॑क्षि॒तापा॒
युरद॑ब्धः स्व॒स्तये॑ ॥१८॥ स्व॒स्तिन॑÷॥ स्व॒स्तिन॒ऽइन्द्रो॑वृ॒द्धश्र॑वाऽस्व॒
स्तिन॑÷पूषाव्वि॒श्ववे॑दाऽ ॥ स्व॒स्तिन॒स्तार्क्ष्यो॒ऽअरि॑ष्टनेमिऽस्व॒स्तिनो॒
बृह॒स्पति॑र्द्दधातु ॥ १९ ॥ पृष॑दश्वाम॒रुत॑÷ ॥ पृष॑दश्वाम॒रुत॒ऽपृश्नि॑
मातरऽशु॒भं॑य्यावा॑नोव्वि॒दथे॑षु॒जग्म॑यऽ॥ अ॒ग्नि॒जि॒ह्वामन॑व॒ऽसूर॑चक्षसो॒
व्विश्वे॑नोदे॒वाऽअव॒सागम॑न्नि॒ह ॥ २० ॥ भ॒द्रङ्कण्णे॑भिऽशृणुयामदेवाभ॒द्र
म्पश्ये॑मा॒क्षभि॒र्य्यज॑त्राऽ ॥ स्थि॒रैरङ्गै॑स्तुष्टु॒वाꣳस॑स्त॒नूभि॒र्व्य॑शेमहि

देवहितंय्यदायुः ॥ २१ ॥ शतमित् ॥ शतमिन्नुशरदोऽअन्तिदे
वायत्रानश्चक्राजरसन्तनूनाम् ॥ पुत्रासोयत्रपितरोभवन्तिमानोमु
द्ध्यारीरिषतायुर्ग्गन्तोः ॥ २२ ॥ अदितिर्द्यौरदितिरन्तरिक्षमदिति
र्म्मातासपितासपुत्रः ॥ व्विश्वेदेवाऽअदितिᳶपञ्चजनाऽअदितिर्ज्जात
मदितिर्ज्जनित्वम् ॥ २३ ॥ [१०] मानः ॥ मानोमित्रोव्वरुणोऽअ
र्य्यमायुरिन्द्रऽऋभुक्षामरुतᳶपरिक्ख्यन् ॥ यद्वाजिनोदेवजातस्यसप्तेः
ᳶप्रवक्ष्यामोव्विदथेव्वीर्य्याणि ॥ २४ ॥ यन्निर्णिजा । यन्निर्णिजारेक्ण
साप्प्रावृतस्यरातिङ्गृभीताम्मुखतोनयन्ति ॥ सुप्प्राङजोमेम्म्यद्वि

श्वरूपऽइन्द्रापूष्णोःप्प्रियमप्प्येतिपाथः ॥२५॥ एषच्छागः। पुरोऽ
अश्वेनव्वाजिनापूष्णोभागोनीयतेव्विश्वदेव्यः ॥ अभिप्प्रियंयत्पु
रोडाशमर्व्वतात्वष्टेदेनꣳसौश्रवसायजिन्वति ॥२६॥ यद्धविष्यम् ॥
यद्धविष्यमृतुशोदेवयानन्त्रिर्म्मानुषाःपर्य्यश्वन्नयन्ति॥ अत्रापूष्णः
प्प्रथमोभागऽएतियज्ञन्देवेभ्यःप्प्रतिवेदयन्नजः॥२७॥होताध्वर्युः।
होताध्वर्युरावयाऽअग्निमिन्धोग्रावग्राभऽउतशꣳस्तासुविप्प्रः ॥
तेनयज्ञेनस्वरङ्कृतेनस्विष्टेनवक्षणाऽआपृणध्वम् ॥ २८ ॥ यूपव्रस्काऽ
उत ॥ येयूपवाहाश्चषालंयेऽअश्वयूपायतक्षति ॥ येचार्व्वतेपचनꣳ

सम्भरन्त्युतोतेषामभिगूर्तिर्न्नऽइन्वतु ॥ २९ ॥ उपप्र ॥ उपप्रागा
त्सुमन्मेधायिमन्मदेवानामाशाऽउपवीतपृष्ठः ॥ अन्वेनंविप्राऽऋ
षयोमदन्तिदेवानाम्पुष्टेचकृमासुबन्धम् ॥ ३० ॥ यद्वाजिनं÷॥ यद्वा
जिनोदामसन्दानमर्व्वतोयाशीर्षण्यारशनारज्जुरस्य ॥ यद्वाघास्य
प्रभृतमास्येतृणꣳसर्व्वातातेऽअपिदेवेष्वस्तु ॥ ३१ ॥ [८] यदश्व
स्यक्रविषोमक्षिकाशयद्वास्वरौस्वधितौरिप्तमस्ति ॥ यद्धस्तयोः
शमितुर्य्यन्नखेषुसर्व्वातातेऽअपिदेवेष्वस्तु ॥ ३२ ॥ यदूवध्यम् ॥
यदूवध्यमुदरस्यापवातियऽआमस्यक्रविषोगन्धोऽअस्तिसुकृतात

च्छिमितारः कृण्वन्तुतमेधꣳशृतपाकम्पचन्तु ॥३३॥ षत्ते ॥ षत्तेगात्रा
दग्निनापच्यमानादभिशूलन्निहतस्यावधावति ॥ मातद्भूम्म्यामा
ऽश्रिषन्मातृणेषुदेवेब्भ्यस्तदुशद्भ्योरातमस्तु ॥३४॥ षेवाजिनम् ॥ षे
वाजिनम्परिपश्यन्तिपक्वꣳषऽईमाहुःसुरभिर्न्निर्हरेति ॥षेचार्वतोमाꣳ
सभिक्षामुपासतऽउतोतेषामभिगूर्त्तिर्न्नऽइन्वतु ॥३५॥ षन्नीक्षणम् ॥
षन्नीक्षणम्माꣳस्पचन्न्याऽउखायाषापात्त्राणिषूष्णऽआसेचनानि ॥
ऊष्म्मण्यापिधानाचरूणामङ्काःसूनाःपरिभूषन्त्यश्श्वम् ॥ ३६ ॥
मात्वा ॥ मात्वाग्निर्द्ध्वनयीद्धूमगन्धिर्म्मोखाब्भ्राजन्त्यभिविक्तज

घ्रिः ॥ इष्टंवीतमभिगूर्तंवषट्कृतन्तन्देवासःप्प्रतिगृभ्णन्त्यश्श्वम् ॥
॥ ३७ ॥ निक्रमंणान्निषदंनम् ॥ निक्रमंणान्निषदंनांविवर्तंनंयच्चपड्वीं
शमर्व्वंतः ॥ यच्चंपपौयच्चंघासिञ्जघाससर्व्वातातेऽअपिंदेवेष्ष्वंस्तु ॥
॥ ३८ ॥ यदश्श्वांय ॥ यदश्श्वांयव्वासंऽउपस्तृणन्त्यंधीवासंय्याहिरं
ण्यान्यस्म्मै॥सन्दानमर्व्वन्तम्पड्वींशम्प्प्रियादेवेष्ष्वायामयन्ति ॥३९॥
[८]यत्ते॥सादेमहसाशूकृतस्यपाष्ष्ण्यांवाकशंयावातुतोदं ॥ स्रुचेवता
हविषोऽअध्वरेषुसर्व्वाताते ब्ब्रह्मणासूदयामि॥४०॥चतुंस्त्रिꣳशद्वाजि
नः ॥ चतुंस्त्रिꣳशद्वाजिनोदेवबन्धोर्व्वङ्क्रीरश्श्वस्यस्वधितिःसमेति॥अ

च्छिद्द्रागात्त्रांव्युयुनांकृणोतुपरुंष्षपरुरनुघुष्ष्युाव्विशंस्त ॥४१॥ एकुस्त्व
ष्टुं÷ ॥ एकुस्त्वष्टुरश्श्वंस्याव्विशुस्त्ताद्द्वायुन्तारांभवतुस्त्तथंऽऋतुः ॥ याते
गात्त्रांणामृतथाकृणोमितातापिण्डांनुाम्प्रजुंह्होम्म्युग्ग्नौ ॥४२॥ मात्त्वां
तपात्त्प्रियऽ आत्त्माप्प्रियन्तुम्मास्वधितिस्त्तन्न्वु ऽआतिष्ठिपत्ते ॥ मातै
गृद्ध्रुरंविशुस्त्तातिहायंच्छिद्द्रागात्त्रांण्युसिनामिथूंकः ॥४३॥ नवै ॥ न
वाऽउंऽएतन्म्म्रियसुेनारिंष्ष्यासिदेवाँ इदेंषिपुथिभिं÷सुगेभिं÷ ॥ हरीं
तेयुञ्जापृषंतीऽअभूतामुपांस्त्थाद्द्वाजीधुरिरासंभस्य ॥४४॥ सुगव्यं
न्नः ॥ सुगव्यंन्नोव्वाजीस्वश्श्व्यंम्पुंसः पुत्त्राँ२उतव्विश्श्वापुषंरयिम् ॥

अ॒ना॒गा॒स्त्त्वन्नो॒ऽअदि॑तिःकृणोतुक्ष॒त्रन्नो॒ऽअश्श्वो॑व्वनताꣳह॒विष्म्मा॑न् ।
॥ ४५ ॥ [६] इ॒मानु॒ । क॒म्भुव॑नासी॒षधा॒मेन्द्र॑श्श्च॒व्विश्श्वे॑चदे॒वाः ॥
आ॒दि॒त्त्यैरिन्द्र॒ꣳसग॑णोम॒रु॒द्भिर॒स्म्मभ्य॑म्भेष॒जाक॑रत् ॥ य॒ज्ञश्च॑नस्त॒
न्न्व॒श्च॑प्प्र॒जाश्चा॑दि॒त्त्यैरिन्द्र॑ःस॒हसी॑षधाति ॥ ४६ ॥ अग्ने॒त्त्वन्नो॒ऽअन्त॑
म॒ऽउ॒तत्त्रा॒ता॒शि॒वोभ॑वाव्व॒रू॒त्थ्यः॑ ॥ व्वसु॑र॒ग्निर्व्वसु॑श्श्र॒वा॒ऽअच्छा॑नक्षि
द्यु॒मत्त॑मꣳर॒यिन्दाः ॥ तन्त्वा॑शोचिष्ठदीदि॒वꣳसु॒म्म्नाय॑नू॒नमी॑महे॒सखि॑
भ्यः ॥४७॥ [२] इतिवाजसनेयशुक्लयजुःसंहितायांपंचविंशोऽध्या
यः ॥ २५ ॥ [१५] अग्निश्चपंचदशोच्चातएकादशद्वौषड्विंशतिः ।

ॐ अ॒ग्निश्च॑ । पृ॒थि॒वीच॒सन्न॑ते॒तेमे॒सन्न॑मताम॒दोवा॒युश्चा॒न्तरि॑क्षञ्च॒स
न्न॑ते॒तेमे॒सन्न॑मताम॒दऽआ॑दि॒त्यश्च॒द्यौश्च॒सन्न॑ते॒तेमे॒सन्न॑मताम॒दऽआप
श्च॒वरु॑णश्च॒सन्न॑ते॒तेमे॒सन्न॑मताम॒दः ॥ स॒प्तस॒ꣳसदो॑ऽअ॒ष्टमी॑भू॒तसा
ध॑नी ॥ सका॑मा॒ः ॥ अद्ध्व॑नस्कुरु॒सञ्ज्ञान॑मस्तुमे॒मुना॑ ॥ १ ॥ यथे॒मा
म् ॥ यथे॒मांवाच॑ङ्कल्या॒णीमा॒वदा॑नि॒जने॑भ्यः ॥ ब्र॒ह्मरा॒जन्या॒भ्या
ꣳशू॒द्राय॒चार्या॑यच॒स्वाय॒चार॑णायच ॥ प्रि॒यो दे॒वाना॒न्दक्षि॑णायैदा॒
तु॒रि॒हभू॑यासम॒यम्मे॒काम॒ꣳसमृ॑द्ध्यता॒मुप॑मादो॒नम॑तु ॥ २ ॥ बृह॑स्प
ते॒ऽअति॑ ॥ बृह॑स्पते॒ऽअति॒यद॒र्य्यो॒ऽअर्हा॑द्द्यु॒मद्वि॒भाति॒क्रतु॑म॒ज्जने॑षु ॥

यद्दीदयच्छवसऽऋतप्प्रजाततदस्म्मासुद्द्रविणन्धेहिचित्त्रम् ॥ उपया
मगृहीतोसिबृहस्प्पतयेत्त्वैषतेयोनिर्ब्बृहस्प्पतयेत्त्वा ॥ ३ ॥ इन्द्रगो
मन् ॥ इन्द्रगोमन्निहायाहिपिबासोमꣳशतक्रतो ॥ विद्यद्भिर्ग्रावभिः
सुतम् ॥ उपयामगृहीतोसीन्द्रायत्त्वागोमतऽएषतेयोनिरिन्द्रायत्त्वा
गोमते ॥ ४ ॥ इन्द्रायाहि ॥ इन्द्रायाहिवृत्त्रहन्पिबासोमꣳशतक्रतो ॥
गोमद्भिर्ग्रावभिःसुतम् ॥ उपयामगृहीतोसीन्द्रायत्त्वागोमतऽएषते
योनिरिन्द्रायत्त्वागोमते ॥ ५ ॥ ऋतावानंवैश्वानरम् ॥ ऋतावानंवै
श्वानरमृतस्यज्ज्योतिषस्प्पतिम् ॥ अजस्रङ्घर्म्ममीमहे ॥ उपयामगृ

हीतोसिव्वैश्श्वान॒राय॑त्त्वै॒षते॒योनिर्व्वैश्श्वान॒राय॑त्त्वा ॥ ६ ॥ व्वै॒श्श्वान॒र
स्य॑सु॒म॒तौ । स्या॑म॒राजा॒हिक॒म्भुव॑नानामभि॒श्श्रीः ॥ इ॒तोजा॒तोव्वि
श्श्व॑मि॒दंव्विच॑ष्टेव्वैश्श्वान॒रोय॑तते॒सूर्य्ये॑ण ॥ उ॒प॒या॒मगृ॑हीतोसिव्वैश्श्वान॒रा
य॑त्त्वै॒षते॒योनिर्व्वैश्श्वान॒राय॑त्त्वा ॥ ७ ॥ व्वै॒श्श्वा॒न॒रोन॑÷ ॥ व्वै॒श्श्वा॒न॒रो
न॑ऽऊ॒तय॒ऽआप्प्रया॑तुपरा॒वत॑÷ ॥ अ॒ग्निरुक्क्थेन॒व्वाह॑सा ॥ उप॒या॒मगृ॑ही
तोसिव्वैश्श्वान॒राय॑त्त्वै॒षते॒योनिर्व्वैश्श्वान॒राय॑त्त्वा ॥ ८ ॥ अ॒ग्निर्ऋषि॑÷ ॥
अ॒ग्निर्ऋषि॒ःपव॑मान॒ःपाञ्च॑जन्न्यःपु॒रोहि॑तः ॥ तमी॑महेमहाग॒यम् ॥ उ॒
प॒या॒मगृ॑हीतोस्य॒ग्ग्नये॑त्त्वा॒व्वर्च्च॑सऽए॒षते॒योनिर॒ग्ग्नये॑त्त्वा॒व्वर्च्च॑से ॥ ९ ॥

मुहाँ३ इन्द्रः ॥ मुहाँ२ इन्द्रोवज्ज्रहस्तःषोडशीशर्म्मयच्छतु ॥
हन्तुम्पाप्मानंय्योस्म्मान्द्वेष्टि ॥ उपयामगृहीतोसिमहेन्द्रायत्त्वैषतेयो
निर्म्महेन्द्रायत्त्वा ॥ १० ॥ तंवः ॥ तंवोदस्ममृतीषहंवसोर्म्मन्दान
मन्धसः ॥ अभिवत्सन्नस्वसरेषुधेनवऽइन्द्रंङ्गीर्भिर्न्नवामहे ॥ ११ ॥
यद्वाहिष्ठम् ॥ यद्वाहिष्ठन्तदग्ग्नयेबृहदर्च्चविभावसो ॥ महिषीवत्त्वद्रयि
स्त्वद्वाजाऽउदीरते ॥ १२ ॥ एहि ॥ एह्यूषुब्रवाणितेग्ग्नऽइत्थेतरा
गिरः ॥ एभिर्वर्द्धासऽइन्दुभिः ॥ १३ ॥ ऋतवस्ते ॥ ऋतवस्तेयज्ञं
वितन्वन्तुमासारक्षन्तुतेहविः ॥ संवत्सरस्तेयज्ञन्दधातुनःप्रजाञ्च

परिपातुनः ॥ १४ ॥ उपह्वरेगिरीणाम् ॥ उपह्वरेगिरीणाꣳसङ्गमेच
नदीनाम् ॥ धियाव्विप्प्रोऽअजायत ॥ १५ ॥ [१५] उच्चाते ॥ उच्चा
तेजातमन्धसोदिविसद्भूम्म्याददे ॥ उग्रꣳशर्म्ममहिश्श्रवः ॥ १६ ॥
सनः ॥ सनऽइन्द्राययज्ज्यवेव्वरुणायमरुद्भ्यः ॥ व्वरिवोवित्त्परिस्रव ॥
॥ १७ ॥ एनाव्विश्श्वानि ॥ एनाव्विश्श्वान्न्यर्य्यऽआद्युम्म्नानिमानु
षाणाम् ॥ सिषासन्तोव्वनामहे ॥ १८ ॥ अनुवीरैः ॥ अनुवीरैरनुपु
ष्ष्यास्म्मगोभिरन्न्वश्श्वैरनुसर्व्वेणपुष्टैः ॥ अनुद्विपदानुचतुष्ष्पदाव्वय
न्देवानोयज्ञमृतुथानयन्तु ॥ १९ ॥ अग्ग्नेपत्त्नीः ॥ अग्ग्नेपत्त्नीरि

हावहदेवानामुशतीरुप ॥ त्वष्टारꣳसोमपीतये ॥ २० ॥ अभियज्ञ
म् ॥ अभियज्ञङ्गृणीहिनोग्नावोनेष्टःपिबऽऋतुना ॥ त्वꣳहिरत्नधाऽ
असि ॥ २१ ॥ द्रविणोदाःपिपीषति । जुहोतप्रचतिष्ठत ॥ नेष्ट्रादृतु
भिरिष्यत ॥ २२ ॥ तवायम् ॥ तवायꣳसोमस्त्वमेह्यर्वाङ्शश्व
त्तमꣳसुमनाऽअस्यपाहि ॥ अस्मिन्यज्ञेबर्हिष्यानिषद्यादधिष्वे
मञ्जठरऽइन्दुमिन्द्र ॥ २३ ॥ अमेवनः ॥ अमेवनःसुहवाऽआहिग
न्तननिबर्हिषिसदतनारणिष्टन ॥ अथामन्दस्वजुजुषाणोऽअन्धस
स्त्वष्टर्देवेभिर्जनिभिःसुमद्गणः ॥ २४ ॥ स्वादिष्ठया ॥ स्वादिष्ठया

मदि॑ष्ठयापव॑स्वसोमधार॑या ॥ इन्द्रायपात॑वेसुतः ॥ २५ ॥ रक्षोहा
विश्वच॑र्षणिरभियोनिमयो॑हते ॥ द्रोणे॑सधस्थमास॑दत् ॥ २६ ॥
[११] ॥ २ ॥ इतिशुक्लयजुःसंहितायांषड्विंशतितमोऽध्यायः ॥२६॥
समास्त्वादशोद्वौअस्यपीवोअन्नाद्द्वादशकावभित्त्वैकादशचत्वारःपं
चचत्त्वारिंशत् ॥ ॐसमास्त्वा ॥ समा॑स्त्वाग्नऽऋतवो॑वर्द्धयन्तुसंव
त्सराऽऋषयोयानि॑सत्त्या ॥ सन्दिव्येन॑दीदिहिरो॑चनेनविश्वाऽआ
भा॑हिप्रदिशश्चत॑स्रः ॥ १ ॥ सञ्च॑ ॥ सञ्चेद्ध्यस्वा॑ग्नेप्रच॑बोधयैनमुच्च॑
तिष्ठमहतेसौभ॑गाय ॥ माच॑रिषदुपसत्तातेऽअग्नेब्रह्माण॑स्तेयशसःस

न्तुमान्ये ॥ २ ॥ त्वामग्ने ॥ त्वामग्नेवृणतेब्राह्मणाऽइमेशिवोऽअग्ने
संवरणेभवानः ॥ सपत्नहानोऽअभिमातिजिच्चस्वेगयेजागृह्यप्र
युच्छन् ॥ ३ ॥ इहैव ॥ इहैवाग्नेऽअधिधारयारयिम्मात्वानिक्रन्पू
र्वचितोनिकारिणः ॥ क्षत्त्रमग्नेसुयममस्तुतुभ्यमुपसत्तावर्द्धतान्तेऽ
अनिष्टृतः ॥ ४ ॥ क्षत्त्रेणाग्ने ॥ क्षत्त्रेणाग्नेस्वायुःसꣳरभस्वमित्त्रेणा
ग्नेमित्त्रधेयेयतस्व ॥ सजातानाम्मद्ध्यमस्त्थाऽएधिराज्ञामग्नेविह
व्योदीदिहीह ॥ ५ ॥ अतिनिहः ॥ अतिनिहोऽअतिस्रिधोत्यचित्ति
मत्त्यरातिमग्ने ॥ विश्वाह्यग्नेदुरितासहस्वाथास्म्मभ्यꣳसहवी

राꣳरयिन्दाः ॥ ६ ॥ अनाधृष्योजातवेदाः ॥ अनाधृष्योजातवेदाऽअनिष्टृतोव्विराडग्नेक्षत्रभृद्दीदिहीह ॥ व्विश्वाऽआशाःप्प्रमुञ्चन्मानुषीर्भियःशिवेभिरद्यपरिपाहिनोव्वृधे ॥ ७ ॥ बृहस्प्पतेसवितः ॥ बृहस्प्पतेसवितर्ब्बोधयैनꣳसꣳशितञ्चित्सन्तराꣳसꣳशिशाधि ॥ व्वर्द्धयैनम्महतेसौभगायव्विश्वऽएनमनुमदन्तुदेवाः ॥ ८ ॥ अमुत्रभूयादध ॥ अमुत्रभूयादधयद्यमस्यबृहस्प्पतेऽअभिशस्तेरमुञ्चः ॥ प्रत्यौहतामश्विनामृत्युमस्म्माद्देवानामग्नेभिषजाशचीभिः ॥ ९ ॥ उद्वयम् ॥ उद्वयन्तमसस्प्परिस्वः÷पश्यन्तऽउत्तरम् ॥ देवन्देवत्रासू

स्वर्मगन्मुज्ज्योतिरुत्तमम् ॥ १० ॥ [१०] ऊर्द्ध्वाऽअस्यसुमिधोभव
न्त्यूर्द्ध्वाशुक्राशोचीꣳष्युग्नेः ॥ द्युमत्तमासुप्प्रतीकस्यसूनोः ॥११॥
तनूनपादसुरः ॥ तनूनपादसुरोविश्ववेदादेवोदेवेषुदेवः ॥ पथोऽअ
नक्तुमद्ध्वाघृतेन ॥१२॥ मद्ध्वायुज्ञम् ॥ मद्ध्वायुज्ञन्नक्षसेप्प्रीणानोनरा
शꣳसोऽअग्ने ॥ सुकृद्देवꣳसविताविश्श्ववारः ॥ १३ ॥ अच्छायम् ॥
अच्छायमेति शवसाघृतेनेडानोवह्निर्न्नमसा ॥ अग्निꣳस्स्रुचोऽअ
द्ध्वरेषुप्प्रयत्सु ॥ १४ ॥ सयक्षत् ॥ सयक्षदस्यमहिमानमग्नेःसऽईं
म्मन्द्रासुप्प्रयसः ॥ वसुश्चेतिष्ठोवसुधातमश्च ॥१५॥ द्वारोदेवीः ॥

द्वारोदेवीरन्वस्यव्विश्वेव्रताददन्तेऽअग्नेः ॥ उरुव्यचसोधाम्म्नापत्त्यमानाः॥१६॥ शतम् १५०० ॥ तेऽअस्य ॥ तेऽअस्ययोषणेदिव्येनयोनाऽउषासानक्ता ॥ इमंयज्ञमवतामध्वरन्नः ॥ १७॥ दैव्याहोताराऽऊर्द्ध्वमध्वरन्नोग्ग्नेर्ज्जिह्वामभिगृणीतम् ॥ कृणुतन्नःस्विष्टिम् ॥ १८ ॥ तिस्रोदेवीः ॥ तिस्रोदेवीर्बर्हिरेदꣳसदन्त्विडासरस्वतीभारती ॥ महीगृणाना ॥ १९ ॥ तन्नः॥तन्नस्तुरीपमद्भुतम्पुरुक्षुत्त्वष्टासुवीर्य्यम् ॥ रायस्प्पोषंव्विष्ष्यतुनाभिमस्म्मे ॥ २० ॥ वनस्प्पतेवसृजाररराणस्त्मनादेवेषु ॥ अग्ग्निर्हव्यꣳशमितासूदयाति ॥ २१ ॥ अग्ग्नेस्वा

संहि. हा । कृणुहिजातवेदइऽन्द्रायहव्यम् ॥ व्विश्वेदेवाहविरिदञ्जुषन्ताम् ॥
॥२१८॥ ॥ २२ ॥ [१२] पीवोऽअन्नारयिवृधः । सुमेधाःश्श्वेतःसिषक्ति
नियुतामभिश्श्रीः ॥ तेव्वायवेसमनसोव्वितस्थुर्व्विश्श्वेन्नरःस्वपत्त्या
निचक्रुः ॥२३॥ रायेनु । यञ्जज्ञतूरोदसीमेरायेदेवीधिषणाधातिदे
वम् ॥ अधव्वायुन्नियुतःसश्चतस्वाऽउतश्श्वेतंव्वसुधितिन्निरेके ॥ २४ ॥
आपोह॥आपोहयद्बृहतीर्व्विश्श्वमायन्गर्भन्दधानाजनयन्तीरग्निम् ॥
उ.अ. ततोदेवानाꣳसमवर्त्ततासुरेकःकस्मैदेवायहविषाव्विधेम ॥ २५ ॥ य
२७ श्चित् ॥ यश्चिदापोमहिनापर्य्यपश्यद्दक्षन्दधानाजनयन्तीर्य्यज्ञम् ॥

योदेवेष्वधिदेवऽएकऽआसीत्कस्मैदेवायहविषाविधेम ॥२६॥ प्रयाभिः ॥ प्रयाभिर्यासिदाश्वाꣳसमच्छानियुद्भिर्वायविष्टयेदुरोणे ॥ निनोरयिꣳसुभोजसंय्युवस्वनिवीरङ्गव्यमश्व्यञ्चराधः ॥ २७ ॥ आनः ॥ आनोनियुद्भिःशतिनीभिरध्वरꣳसहस्रिणीभिरुपयाहियज्ञम् ॥ वायोऽअस्मिन्त्सवनेमादयस्वयूयम्पातस्वस्तिभिःसदानः ॥ ॥ २८ ॥ नियुत्वान्वायो ॥ नियुत्वान्वायवागह्ययꣳशुक्रोऽअयामिते ॥ गन्तासिसुन्वतोगृहम् ॥ २९ ॥ वायोशुक्रः ॥ वायोशुक्रोऽअयामितेमध्वोऽअग्रन्दिविष्टिषु ॥ आयाहिसोमपीतयेस्पार्होदेवनि

युत्वंता ॥ ३० ॥ व्वायुरंग्ग्रेगाः ॥ व्वायुरंग्ग्रेगायंज्ञप्प्रीःसा॒कङ्गन्मनं
सा॒यज्ञम् ॥ शि॒वोनि॒यु॒द्भि÷ शि॒वाभि÷ ॥ ३१ ॥ व्वायो॒ये । तेंसहस्त्रिणो॒रथा
स॒स्तेभि॒रागंहि ॥ नि॒यु॒त्वान्त्सोमंपीतये ॥ ३२ ॥ एकंयाच । द॒श
भिश्चस्वभूते॒द्वाभ्यामि॒ष्टयेव्विꣳश॒तीच ॥ ति॒सृभिश्च॒वहसेत्त्रिꣳ
शतांचनि॒यु॒द्भिर्व्वायवि॒हता॒विमु॑ञ्च ॥ ३३ ॥ तवंव्वायो ॥ तवंव्वायवृत
स्प्पते॒त्त्वष्टुर्ज्जामातरद्भुत ॥ अवा॒ꣳस्यावृंणीमहे ॥ ३४ ॥ [१२] ॥ अ॒भि
त्वां । शू॒रनो॒नुमो॒दु॒ग्धाऽइवधे॒नवं÷ ॥ ईशानम॒स्यजगंतःस्व॒र्दृश॒मी
शानमिन्द्रत॒स्थुषं÷ ॥ ३५ ॥ नत्त्वावान् ॥ नत्त्वावाँ २ अ॒न्योदि

व्योनपार्थिवोनजातोनजांनिष्यते ॥ अश्वायन्तोमघवन्निन्द्रवा
जिनौगव्यन्तंस्त्वाहवामहे ॥ ३६ ॥ त्वामित् ॥ त्वामिद्धिहवांमहे
सातौवाजंस्यकारवंः ॥ त्वांवृत्रेष्विन्द्रसत्पंतिन्नरस्त्वाङ्काष्ठास्वर्व
तः ॥ ३७ ॥ सत्त्वम् ॥ सत्त्वन्नंश्चित्रवज्रहस्तधृष्णुयामहस्तवा
नोऽअंद्रिवः ॥ गामश्वंरथ्यमिन्द्रसङ्किरसत्रावाजन्नजिग्युषे ॥
॥३८॥ कयांनः ॥ कयांनश्चित्रऽआभुंवदूतीसदावृंधःसखा ॥ कया
शचिष्ठयावृता ॥ ३९ ॥ कस्त्वां । सत्योमदांनाम्मंहिष्ठोमत्सदन्धं
सः ॥ दृढाचिदारुजेवसु ॥ ४० ॥ अभीषुणः ॥ अभीषुणःसखीना

मविताजरितॄणाम् ॥ शतम्भवास्यूतये ॥ ४१ ॥ यज्ञायज्ञावः ॥ यज्ञायज्ञावोऽअग्नयेगिरागिराचदक्षसे ॥ प्रप्रवयममृतञ्जातवेदसम्प्रियम्मित्रन्नशꣳसिषम् ॥ ४२ ॥ पाहिनः ॥ पाहिनोऽअग्नऽएकयापाह्युताद्वितीयया ॥ पाहिगीर्भिस्तिसृभिरूर्जाम्पतेपाहिचतसृभिर्वसो ॥ ४३ ॥ ऊर्जोनपातम् ॥ ऊर्जोनपातꣳसहिनायमस्मयुर्दाशेमहव्यदातये ॥ भुवद्वाजेष्ववितामुवद्वृधऽउतत्रातातनूनाम् ॥ ४४ ॥ संवत्सरोसि ॥ परिवत्सरोसीदावत्सरोसीद्वत्सरोसिवत्सरोसि ॥ उषसस्तेकल्पन्तामहोरात्रास्तेकल्पन्तामर्द्धमासास्तेकल्पन्ता

म्मासा॑स्त्तेकल्प्पन्तामृतव॑स्त्तेकल्प्पन्ताꣳसंव्वत्त्स॒रस्त्ते॑कल्प्पताम् ॥
प्रेत्त्या॒ऽएत्त्यै॒सञ्चाञ्च॒प्प्रच॑सारय ॥ सु॒प॒र्णचिद॑सि॒तया॑दे॒वत॑याङ्गिर॒स्व
द्ध्रु॒वःसी॑द॥४५॥[११]इतिशुक्लयजुःसंहितायांसप्तविंशोध्यायः॥२७॥
होतायक्षदेकादशदेवंबर्हिर्द्वादशपुनरप्प्येवंचत्त्वारःषट्चत्त्वारिꣳशत् ॥
ॐ होता॑यक्षत्॥होता॑यक्षत्स॒मिधेन्द्र॑मि॒डस्प॒देनाभा॑पृथि॒व्व्या॒ऽअधि॑॥
दि॒वोव्वर्ष्म॒न्त्स॒मि॑द्ध्यत॒ऽओजि॑ष्ठश्चर्षणी॒स॒हां॑व्वेत्त्वाज्ज्य॑स्य॒होत॒र्य्यज॑
॥ १ ॥ होता॑यक्ष॒त्तनू॒नपा॑तमू॒तिभि॑÷ ॥ होता॑यक्ष॒त्तनू॒नपा॑तमू॒तिभि॒र्ज्जे॑
ता॑र॒मप॑राजितम् ॥ इन्द्र॑न्दे॒वꣳस्व॒र्व्विदं॑म्प॒थिभि॒र्म्मधु॑मत्तमै॒र्न्नरा॒शꣳसे॑

संहि.

॥२२१॥

नुतेजंसाव्वेत्त्वाज्ज्यंस्युहोतुर्य्यंजं॥२॥होतांयक्षुदिडांभिरिन्द्रंम्॥होतां
यक्षुदिडांभिरिन्द्रंमीडितमाजुह्वांनममंर्त्त्यम्॥देवोदेवैꣳसवींर्य्योंव्वज्ज्रं
हस्तꣳपुरन्दरोव्वेत्त्वाज्ज्यंस्युहोतुर्य्यंज ॥ ३ ॥ होतांयक्षद्बुर्हिषीन्द्रंम्॥
होतांयक्षद्बुर्हिषीन्द्रंन्निषद्दुरंवृंषुभन्नर्य्यांपसम् ॥ व्वसुंभीरुद्द्रैरांदित्त्यैꣳ
सयुग्गिभर्ब्बुर्हिरासंदुद्द्वेत्त्वाज्ज्यंस्युहोतुर्य्यंज ॥४॥ होतांयक्षुदोजोनव्वी
र्य्यꣳसहोद्द्वारऽइन्द्रंमवर्द्धयन्॥ सुप्प्रायुणाऽअुस्मिन्यज्ञेव्विश्श्रंयन्तु
मृतावृधोद्द्वारऽइन्द्रांयमीढुषेव्व्यन्त्वाज्ज्यंस्युहोतुर्य्यंजं ॥५॥ होतांय

उ.अ.

क्षदुषेऽइन्द्रंस्य । धेनूसुदुघेमातरांमुही ॥ सुवातरौनतेजंसावुत्त्सामि

२८

न्द्रंमवर्द्धतांवी॒तामाज्ज्यंस्य॒होत॒र्यजं ॥ ६ ॥ होतांयक्ष॒द्दैव्या॒होतांरा
भि॒षजा॒सखांया॒ह॒विषेन्द्रंम्भि॒षज्ज्यतः ॥ क॒वीदे॒वौप्प्रचैतसा॒विन्द्रांय
धत्तऽइन्द्रि॒यंवी॒तामाज्ज्यंस्य॒होत॒र्यजं ॥७॥ होतांयक्ष॒त्ति॒स्रोदे॒वीः ॥
होतांयक्ष॒त्ति॒स्रोदे॒वीर्न्नभैष॒जन्त्रयंस्त्रि॒धातंवो॒पस॒ऽइडा॒सरंस्वती॒भारं
तीम॒हीः ॥ इन्द्रंपत्त्नीर्ह॒विष्मंती॒र्व्यन्त्वाज्ज्यंस्य॒होत॒र्यजं ॥८॥ हो
तांयक्ष॒त्त्वष्टांर॒मिन्द्रंम् ॥ होतांयक्ष॒त्त्वष्टांर॒मिन्द्रंन्दे॒वम्भि॒षजंꣳसु॒यजं
ङ्घृत॒श्श्रियंम् ॥ पु॒रु॒रूपंꣳसु॒रेतंसम्म॒घोन॒मिन्द्रांय॒त्त्वष्टा॒दधंदिन्द्रि॒या
णि॒वेत्त्वाज्ज्यंस्य॒होत॒र्यजं ॥ ९ ॥ होतांयक्ष॒द्वन॒स्पतिंꣳश॒मि॒तारंम् ॥

होता॑यक्ष॒द्वन॒स्पति॑ꣳशमि॒तार॑ꣳश॒तक्र॑तुन्धि॒योजो॒ष्टार॑मिन्द्रि॒यम् ॥
मध्वा॑सम॒ञ्जन्प॒थिभिः॑सु॒गेभिः॒स्वदा॑तिय॒ज्ञम्मधु॑नाघृ॒तेन॒व्वेत्त्वाज्ज्य॑
स्य॒होत॒र्य्यज॑ ॥ १० ॥ होता॑यक्ष॒दिन्द्र॒ꣳस्वाहा॑ ॥ होता॑यक्ष॒दिन्द्र॒ꣳ
स्वाहाज्ज्य॑स्य॒स्वाहा॒मेद॑सः॒स्वाहा॑स्तो॒काना॒ꣳस्वाहा॒स्वाहा॑कृतीना॒
ꣳस्वाहा॑ह॒व्यसू॑क्तीनाम् ॥ स्वाहा॑दे॒वाऽआ॑ज्ज्य॒पाजु॑षा॒णाऽइन्द्र॒ऽआ
ज्ज्य॑स्यव्यन्तु॒होत॒र्य्यज॑ ॥ ११ ॥ [११] दे॒वम्ब॒र्हिरिन्द्र॑ꣳसुदे॒वन्दे॒वै
र्व्वी॒रव॑त्स्ती॒र्णंवेद्या॑मवर्द्धयत् ॥ व॒स्तोर्वृ॒तम्प्राक्तो॑र्भृ॒तꣳरा॒याब॒र्हिष्म॑
तोऽत्य॑गाद्वसु॒वने॑वसु॒धेय॑स्यवेतु॒यज॑ ॥ १२ ॥ दे॒वीर्द्वार॑ः ॥ दे॒वीर्द्वार॒ऽइन्द्र

ꣳसङ्घातेवीड्वीर्य्यामंन्नवर्द्धयन् ॥ आवत्सेनतरुणेनकुमारेणंचमीवता
पार्व्वाणꣳरेणुकंकाटन्नुदन्तांव्वसुवनेव्वसुधेयंस्यव्व्यन्तुयज ॥ १३ ॥ देवी
ऽउषासानक्ता ॥ देवीऽउषासानक्तेन्द्रंय्यज्ञेप्प्रयत्यह्वेताम् ॥ दैवीर्व्वि
शःप्प्रायासिष्टाꣳसुप्प्रीतेसुधितेव्वसुव्वनेव्वसुधेयंस्यव्वीतांय्यज ॥१४॥
देवीजोष्ट्री ॥ देवीजोष्ट्रीवसुधितीदेवमिन्द्रमवर्द्धताम् ॥ अयांव्व्यन्न्या
घाद्वेषाꣳस्यान्न्यावक्षद्वसुव्वार्य्याणियजमानायशिक्षितेव्वसुवनेव्वसुधेयं
स्यव्वीतांय्यज ॥ १५ ॥ देवीऽऊर्ज्जाहुती ॥ देवीऽऊर्ज्जाहुतीदुघेसुदु
घेपयसेन्द्रमवर्द्धताम् ॥ इषमूर्ज्जमन्न्यावक्षत्सग्ग्धिꣳसपीतिमन्न्या

नवेनपूर्व्वन्दयमानेपुराणेननवमधातामूर्जमूर्जाहुतीऽऊर्जयमानेव्वसु
व्वार्य्याणियजमानायशिक्षितेव्वसुवनेव्वसुधेयस्यव्वीतांयज ॥ १६ ॥
देवादैव्या ॥ देवादैव्याहोतारादेवमिन्द्रमवर्द्धताम् ॥ हताघशꣳसा
वाभार्ष्टांव्वसुव्वार्य्याणियजमानायशिक्षितौव्वसुवनेव्वसुधेयस्यव्वीतांय
जं ॥ १७ ॥ देवीस्तिस्रः ॥ देवीस्तिस्रस्तिस्रोदेवीःपतिमिन्द्रम
वर्द्धयन् ॥ अस्पृक्षद्भारतीदिवꣳरुद्रैर्य्यज्ञꣳसरस्वतीडावसुमतीगृहा
न्वसुवनेव्वसुधेयस्यव्यन्तुयजं ॥ १८ ॥ देवऽइन्द्रः ॥ देवऽइन्द्रोन
राशꣳसस्त्रिवरूथस्त्रिबन्धुरोदेवमिन्द्रमवर्द्धयत् ॥ शतेनशितिपृष्ठा

नामाहितꣳसहस्त्रेणप्प्रवर्त्ततेमित्रावरुणेदंश्यहोत्त्रमर्हतोबृहस्प्पतिस्तो
त्रमश्विनाद्ध्वर्य्यवंव्वसुवनेव्वसुधेयंस्यव्वेतुयजं ॥ १९ ॥ देवोदेवैः ॥ देवो
देवैर्व्वनस्प्पतिर्हिरण्यपर्णोमधुशाखꣳसुपिप्पलोदेवमिन्द्रमवर्द्धयत् ॥ दि
वमग्ग्रेणास्पृक्षदान्तरिक्षम्पृथिवीमदृꣳहीद्वसुवनेव्वसुधेयंस्यव्वेतुयजं ॥
॥ २० ॥ देवम्बर्हिः ॥ देवम्बर्हिर्व्वारितीनान्देवमिन्द्रमवर्द्ध
यत् ॥ स्वासस्थमिन्द्रेणासन्नमन्न्याबर्हीꣳष्यभ्यभूद्वसुवनेव्वसु
धेयंस्यव्वेतुयजं ॥ २१ ॥ देवोऽअग्निः ॥ देवोऽअग्निःस्विष्टकृद्देवमिन्द्र
मवर्द्धयत् ॥ स्विष्टङ्कुर्व्वन्त्स्विष्टकृत्स्विष्टमद्यकरोतुनोव्वसुवनेव्वसुधेयं

स्यव्वेतुयज ॥ २२ ॥ अग्निमद्य ॥ होतारमवृणीतायंय्यजमानःप
चन्पक्तीःपचन्पुरोडाशम्बद्ध्नन्निन्द्रायच्छागम् ॥ सूपस्थाऽअद्यदे
वोव्वनस्पतिरभवदिन्द्रायच्छागेन ॥ अघत्तम्मेदस्तःप्रतिपचता
ग्ग्रभीदवीवृधत्पुरोडाशेन ॥ त्वामद्यऽऋषे ॥ २३ ॥ [१२] होता
यक्षत् ॥ होतायक्षत्त्समिधानम्महद्यशःसुसमिद्धंवरेण्यमग्निमिन्द्रं
व्वयोधसम् ॥ गायत्रीच्छन्दऽइन्द्रियन्त्र्यविङ्गांव्वयोदधद्वेत्वाज्ज्यस्य
होतर्य्यज ॥२४॥ होतायक्षत्तनूनपातमुद्भिदम् ॥ होतायक्षत्तनूनपात
मुद्भिदंय्यङ्गर्भमदितिर्दधेशुचिमिन्द्रंव्वयोधसम् ॥ उष्णिहञ्छन्दऽइ

न्द्रि॒यन्दि॒त्त्य॒वा॒हङ्गां॒व्वयो॒दध॒द्द्वेत्त्वाज्ज्य॑स्य॒होत॒र्य्यज॑ ॥ २५ ॥ होता॑
यक्ष॒दीडे॒न्य॑मीडि॒तम् ॥ होता॑यक्ष॒दीडे॒न्य॑मीडि॒तंव्वृ॒त्र॒हन्त॑म॒मिडा॑भि
रीड्य॒ꣳसह॒ꣳसोम॒मिन्द्रं॑व्वयो॒धस॑म् ॥ अ॒नु॒ष्टुभ॒ञ्छन्द॑ऽइन्द्रि॒यम्प॒ञ्चा॑
विङ्गां॒व्वयो॒दध॒द्द्वेत्त्वाज्ज्य॑स्य॒होत॒र्य्यज॑ ॥ २६ ॥ होता॑यक्षत्त्सु॒ब॒र्हिष॑
म्पू॒ष॒ण्वन्त॑म् ॥ होता॑यक्षत्त्सु॒ब॒र्हिष॑म्पू॒ष॒ण्वन्त॒मम॑र्त्त्य॒ꣳसी॒दन्त॑म्ब॒र्हि
षि॑प्प्रि॒ये॒मृतेन्द्रं॑व्वयो॒धस॑म् ॥ बृ॒ह॒तीच्छन्द॑ऽइन्द्रि॒यन्त्रि॑व॒त्सङ्गां॑व्वयो॒द
ध॒द्द्वेत्त्वाज्ज्य॑स्य॒होत॒र्य्यज॑ ॥ २७ ॥ होता॑यक्ष॒द्व्यच॑स्वतीꣳसु॒प्प्राय॒
णाः ॥ होता॑यक्ष॒द्व्यच॑स्वतीꣳसु॒प्प्राय॒णाऽऋ॒ता॒वृधो॒द्द्वारो॑दे॒वीर्हि॑र॒ण्ययी॑

ब्बृंहमाणमिन्द्रंव्वयोधसम् ॥ पङ्क्तिञ्छन्दऽइहेन्द्रियन्तुर्य्यवाहङ्गांव्वयो
दधद्व्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ २८ ॥ होतायक्षत्त्सुपेशसासुशि
ल्पे । बृहतीऽउभेनक्तोषासानदर्शतेव्विश्वमिन्द्रंव्वयोधसम् ॥ त्रि
ष्टुभञ्छदऽइहेन्द्रियम्पष्ठवाहङ्गांव्वयोदधद्वीतामाज्ज्यस्यहोतर्य्यज ॥
॥ २९ ॥ होतायक्षत्प्रचेतसादेवानामुत्तमंय्यशोहोतारादैव्याकवीसु
युजेन्द्रंव्वयोधसम् ॥ जगतीञ्छन्दऽइन्द्रियमनड्वाहङ्गांव्वयोदधद्वीता
माज्ज्यस्यहोतर्य्यज ॥ ३० ॥ होतायक्षत्त्पेशस्वतीस्तिस्त्र॰ ॥ होता
यक्षत्त्पेशस्वतीस्तिस्रोदेवीर्हिरण्ययीर्ब्भारतीर्बृहतीर्म्महीःपतिमिन्द्रं

व्वयो॒धस॑म् ॥ व्वि॒राज॒ञ्छन्द॑ऽइ॒हेन्द्रि॒यन्धे॒नुङ्गान्नव्वयो॒दध॒द्व्यन्त्वाज्ज्य॑
स्य॒होत॒र्य्यज॑ ॥ ३१ ॥ होता॑यक्ष॒त्सु॒रेत॑स॒न्त्वष्टा॑रम् ॥ होता॑यक्ष॒त्सु
रेत॑स॒न्त्वष्टा॑रम्पु॒ष्टि॒वर्द्ध॑नꣳरू॒पाणि॒बिब्भ्र॑त॒म्पृ॒थक्पु॒ष्टि॒मिन्द्रं॑व्वयो॒धस॑
म् ॥ द्वि॒पद॒ञ्छन्द॑ऽइ॒न्द्रि॒यमु॒क्षाण॒ङ्गान्नव्वयो॒दध॒द्वेत्वाज्ज्य॑स्य॒होत॒र्य्य
ज॑ ॥ ३२ ॥ होता॑यक्ष॒द्वन॒स्पति॑ꣳशमि॒तार॑म् ॥ होता॑यक्ष॒द्वन॒स्प
ति॑ꣳशमि॒तार॑ꣳश॒तक्र॑तु॒ꣳहिर॑ण्यप॒र्णमु॒क्त्थिन॑ꣳरश॒नाम्बिब्भ्र॑तंव्व॒शि
म्भग॒मिन्द्रं॑व्वयो॒धस॑म् ॥ क॒कुभ॒ञ्छन्द॑ऽइ॒हेन्द्रि॒यंव्व॒शांव्वे॒हत॒ङ्गांव्वयो॒द
ध॒द्वेत्वाज्ज्य॑स्य॒होत॒र्य्यज॑ ॥ ३३ ॥ होता॑यक्ष॒त्स्वाहा॑कृतीर॒ग्निम् ॥

होतायक्षत्त्स्वाहाकृतीरग्निङ्गृहपतिम्पृथग्ग्वरुणम्भेषजङ्कविङ्क्षत्रमिन्द्रं
वयोधसम् ॥ अतिच्छन्दसञ्छन्दऽइन्द्रियम्बृहदृषभङ्गांवयोदधद्व्य
न्त्वाज्ज्यस्यहोतर्य्यज॥३४॥[११]देवम्बर्हिः॥ देवम्बर्हिर्वयोधसन्दे
वमिन्द्रमवर्द्धयत् ॥ गायत्र्याच्छन्दसेन्द्रियञ्चक्षुरिन्द्रेवयोदधद्वसुवने
वसुधेयस्यवेतुयज ॥३५॥ देवीर्द्वारः ॥ देवीर्द्वारोवयोधसꣳशुचिमिन्द्र
मवर्द्धयन् ॥ उष्णिहाच्छन्दसेन्द्रियम्प्राणमिन्द्रेवयोदधद्वसुवनेवसु
धेयस्यव्यन्तुयज ॥ ३६ ॥ देवीऽउषासानक्ता । देवमिन्द्रंवयोधसं
न्देवीदेवमवर्द्धताम् ॥ अनुष्टुभाच्छन्दसेन्द्रियम्बलमिन्द्रेवयोदधद्व

६ँशतिः ॥ ॐदेवस्यंत्त्वा ॥ देवस्यंत्त्वासवितुःप्प्रंसवेश्श्विनोर्ब्बाहुब्भ्यां
म्पूष्ष्णोहस्ताब्भ्याम् ॥ आददेदित्त्यैरास्न्नासि ॥ १ ॥ इडऽएहि ॥
इडऽएह्यदितऽएहिसरंस्वत्त्येहि ॥ असावेह्यसावेह्यसावेहि ॥ २ ॥
अदित्त्यैरास्न्नासीन्द्राण्याऽउष्णीष÷ ॥ पूषासिघर्म्मायदीष्ष्व ॥ ३ ॥
अश्श्विब्भ्याम्पिन्न्वस्वसरंस्वत्त्यैपिन्न्वस्वेन्द्रायपिन्न्वस्व॥स्वाहेन्द्रवत्त्स्वा

हेन्द्रंवत्स्वाहेन्द्रंवत् ॥ ४ ॥ यस्तेस्तनंः । शशयोयोमंयोभूर्य्योरत्न
धाव्वसुविद्यःसुदत्रंः ॥ येनविश्वापुष्यसिव्वार्य्याणिसरंस्वतितमिहधा
तवेकः ॥ उर्व्वन्तरिक्षमन्वेमि ॥ ५ ॥ गायत्रञ्छन्दंः ॥ गायत्रञ्छन्दो
सित्रैष्टुभञ्छन्दोसिद्यावापृथिवीभ्यान्त्वापरिगृह्णाम्यन्तरिक्षेणोपं
यच्छामि ॥ इन्द्राश्विनामधुनःसारघस्यघर्म्मम्पातव्वसवोयजत
व्वाट्स्वाहासूर्य्यस्यरश्मयेवृष्टिवनये ॥ ६ ॥ समुद्रायंत्त्वा । व्वाताय
स्वाहासरिरायंत्त्वाव्वातायस्वाहा ॥ अनाधृष्यायंत्त्वाव्वातायस्वाहा
ऽप्रतिधृष्यायंत्त्वाव्वातायस्वाहा ॥ अवस्यवेत्त्वाव्वातायस्वाहाशिमि

दाय॑त्त्वा॒व्वाता॑य॒स्वाहा॑ ॥ ७ ॥ इन्द्रा॑यत्त्वा॒ । व्वसु॑मतेरु॒द्रव॑ते॒स्वाहेन्द्रा॑
यत्त्वादि॒त्यव॑ते॒स्वाहेन्द्रा॑यत्त्वाभिमाति॒घ्नेस्वाहा॑ ॥ स॒वि॒त्रेत्त्व॑ऽऋभु॒
मते॑व्विभु॒मते॒व्वाज॑वते॒स्वाहा॒बृह॒स्पत॑येत्त्वाव्वि॒श्वदे॑व्यावते॒स्वाहा॑ ॥
॥ ८ ॥ [८] य॒माय॒त्त्वाङ्गि॑रस्वतेपितृ॒मते॒स्वाहा॑ ॥ स्वाहा॑घ॒र्म्माय॒
स्वाहा॑घ॒र्म्मः पि॒त्रे ॥ ९ ॥ व्विश्वा॒ऽआशा॑ः ॥ व्विश्वा॒ऽआशा॑दक्षि
ण॒सद्वि॒श्वान्दे॒वान॑याडि॒ह ॥ स्वाहा॑कृतस्यघ॒र्म्मस्य॒मधोः॑पिबतम
श्विना ॥ १० ॥ दि॒वि॒धाः॑ ॥ दि॒वि॒धाऽइ॒मंय्य॒ज्ञमि॒मंय्य॒ज्ञन्दि॒वि॒धाः॒ ॥
स्वाहा॒ग्नये॑य॒ज्ञिया॑य॒शंय्यजु॒र्भ्यः॑ ॥ ११ ॥ अश्वि॑नाघ॒र्म्मम् ॥ अ

श्विनाघर्म्मम्पातꣳहार्द्वानमहर्द्दिवाभिरूतिभिः ॥ तन्त्रायिणेनमो
द्यावापृथिवीभ्याम् ॥ १२ ॥ अपातामश्विना । घर्म्ममनुद्यावापृथि
वीऽअमꣳसाताम् ॥ इहैवरातयःसन्तु ॥ १३ ॥ इषेपिन्वस्व ॥ इषेपि
न्वस्वोर्ज्जेपिन्वस्वब्रह्मणेपिन्वस्वक्षत्रायपिन्वस्वद्यावापृथिवीभ्यां
म्पिन्वस्व ॥ धर्म्मासिसुधर्म्मामेन्यस्मेनृम्णानिधारयब्रह्मधार
यक्षत्रन्धारयविशन्धारय ॥ १४ ॥ स्वाहापूष्णे । शरसेस्वाहाग्रा
वभ्यःस्वाहाप्रतिरवेभ्यः ॥ स्वाहापितृभ्यऽऊर्द्ध्वबर्हिभ्योघर्म्म
पावभ्यःस्वाहाद्यावापृथिवीभ्याꣳस्वाहाविश्वेभ्योदेवेभ्यः ।१५॥

स्वाहा॑रु॒द्द्राय॑ । रु॒द्द्रहू॑तये॒स्वाहा॒सञ्ज्योति॑षा॒ज्ज्योति॑ः ॥ अह॑ःकेतु॒ना॑
जु॒षता॒ᳪं॑सु॒ज्ज्योति॒र्ज्ज्योति॑षा॒स्वाहा॑ ॥ रात्त्रि॑ःकेतु॒ना॑जु॒षता॒ᳪं॑सु॒
ज्ज्योति॒र्ज्ज्योति॑षा॒स्वाहा॑ ॥ मधु॑हु॒तमिन्द्र॑तमे॒ऽअ॒ग्ग्नाव॒श्श्याम॑ते॒दे
व॒घर्म्म॒नम॑स्त्ते॒ऽअस्तु॒मामा॑हि॒ᳪ᳖सीः ॥ १६ ॥ अ॒भीमम् ॥ अ॒भी॒
मम्म॑हि॒मादिवं॒व्विप्प्रो॑बभूवस॒प्प्रथा॑ः ॥ उ॒तश्श्रव॑सापृथि॒वीᳪं॑सᳪ᳖सी॑
दस्व॒महाँऽअ॑सि॒रोच॑स्वदेव॒वीत॑मः ॥ व्विधू॒मम॑ग्ग्नेऽअरु॒षम्मि॑ये
द्ध्य॒सृ॒जप्प्र॑शस्त्तदर्शतम् ॥ १७ ॥ याते॑घर्म्म॑दि॒व्व्या॒शुग्ग्या॒गा॑य॒
त्त्र्याᳪं॑ह॒विर्द्धा॑ने ॥ सात॒ऽआप्प्या॑यता॒न्निष्ट्या॑यता॒न्तस्यै॑ते॒स्वाहा॑ ॥

यातेघर्म्मान्तरिक्षेशुग्ग्यात्त्रिष्टुब्भ्याग्नीद्ध्रे ॥ सातऽआप्प्यायतान्नि
ष्ट्यायतान्तस्यैतेस्वाहा ॥ यातेघर्म्मपृथिव्व्याꣳशुग्ग्याजगत्त्याꣳ
सदस्स्या ॥ सातऽआप्प्यायतान्निष्ट्यायतान्तस्यैतेस्वाहा ॥ १८ ॥
[१०] क्षत्त्रस्यत्त्वा । परस्पायब्ब्रह्मणस्तन्न्वम्पाहि ॥ व्विशस्त्त्वा
धर्म्मणाव्वयमनुक्क्रामामसुवितायनव्व्यसे ॥ १९ ॥ चतु÷स्रक्तिर्न्ना
भि÷ ॥ चतु÷स्रक्तिर्न्नाभिर्ऋतस्यसप्प्रथाꣳसनोव्विश्वायु÷सप्प्रथाꣳस
न÷सर्व्वायु÷सप्प्रथाꣳ ॥ अपद्द्वेषोऽअपह्वरोन्न्यव्व्रतस्यसश्चिम ॥ २० ॥
घर्म्मैतत् ॥ घर्म्मैतत्तेपुरीषन्तेनव्वर्द्धस्वचाचप्प्यायस्व ॥ व्वर्द्धिषी

महिचव्वयमाचप्प्यासिषीमहि ॥ २१ ॥ अचिक्क्रदद्वृषाहरिर्म्महा
न्मित्रोनदर्शतः ॥ सꣳसूर्य्येणदिद्युतदुदधिर्न्निधिः ॥ २२ ॥ सुमि
त्रियानः ॥ सुमित्रियानऽआपऽओषधयःसन्तुदुर्म्मित्रियास्तस्म्मै
सन्तुयोस्मान्द्वेष्टियञ्चवयन्द्विष्म्मः ॥ २३ ॥ उद्वयम् ॥ उद्वयन्तमस
स्प्परिस्वःपश्श्यन्तऽउत्तरम् ॥ देवन्देवत्रासूर्य्यमगन्म्मज्ज्योतिरुत्तम
म् ॥ २४ ॥ एधोसि ॥ एधोस्येधिषीमहिसमिदसितेजोसितेजोमयि
धेहि ॥ २५ ॥ यावतीद्यावापृथिवी ॥ यावच्चसप्तसिन्धवोवितस्थिरे ॥
तावन्तमिन्द्रतेग्ग्रहमूर्जागृह्णाम्म्यक्षितम्मयिगृह्णाम्म्यक्षितम् ।२६॥

मयित्त्यत् ॥ मयित्त्यदिन्द्रियम्बृहन्मयिदक्षोमयिक्क्रतुः ॥ घर्म्मस्त्रि
शुग्विराजतिविराजाज्ज्योतिषासहब्रह्मणातेजसासह ॥ २७ ॥
पयसोरेतः ॥ पयसोरेतऽआभृतन्तस्यदोहमशीमह्युत्तरामुत्तराꣳस
माम् ॥ त्त्विषःसंवृक्क्त्वेदक्षस्यतेसुषुम्म्णस्यतेसुषुम्म्णाग्निहुतः ॥
इन्द्रपीतस्यप्प्रजापतिभक्षितस्यमधुमतऽउपहूतऽउपहूतस्यभक्षया
मि ॥ २८ ॥ [१०] इति श्रीशुक्लयजुःसंहितायामष्टात्रिंशोऽ
ध्यायः ॥ ३८ ॥ स्वाहाप्राणेभ्यःषडुग्रश्चसप्तद्धौत्रयोदश ॥ ॐस्वाहा
प्प्राणेभ्यः ॥ स्वाहाप्प्राणेभ्यःसाधिपतिकेभ्यः ॥ पृथिव्यैस्वाहाग्न

येस्वाहान्तरिक्षायस्वाहाव्वायवेस्वाहा ॥ दिवेस्वाहासूर्य्यायस्वाहा॥
॥ १ ॥ दिग्भ्यःस्वाहा । चन्द्रायस्वाहानक्षत्रेब्भ्यःस्वाहाद्भ्यःस्वाहा
व्वरुणायस्वाहा ॥ नाब्भ्यैस्वाहापूतायस्वाहा ॥ २ ॥ व्वाचेस्वाहा ।
प्प्राणायस्वाहाप्प्राणायस्वाहा॥चक्षुषेस्वाहाचक्षुषेस्वाहा ॥श्श्रोत्राय
स्वाहाश्श्रोत्रायस्वाहा ॥ ३ ॥ मनसःकामम् ॥ मनसःकाममाकू
तिंव्वाचःसत्यमशीय ॥ पशूनाꣳरूपमन्नस्यरसोयशःश्रीःश्रयताम्म
यिस्वाहा ॥ ४ ॥ प्रजापतिः । सम्भ्रियमाणःसम्म्राट्सम्भृतोव्वैश्वदे
वःसꣳसन्नोघर्म्मःप्रवृक्तस्तेजऽउद्यतऽआश्विनःपयस्यानीयमानेपौ

ष्णो॒ विष्य॒न्दमा॑ने मारु॒तᳵ क्लथ॑न् ॥ मै॒त्रः श॒र॑सि स॒न्ता॒य्यमा॑ने वा॒यु
व्यो॒ ह्रि॒यमा॑णऽआग्ने॒यो हू॒यमा॑नो॒ वाग्घु॒तः ॥ ५ ॥ स॒वि॒ता प्र॑थ॒मे । ह॑न्न
ग्निर्द्वि॒तीये॑ वा॒युस्तृ॒तीय॑ऽआदि॒त्यश्च॑तु॒र्थे च॒न्द्रमा॑ᳶ पञ्च॒मऽऋ॒तुः ष॒ष्ठे म॒
रु॒त॑ः सप्त॒मे बृह॒स्पति॑रष्ट॒मे ॥ मि॒त्रो नव॑मे॒ वरु॑णो दश॒मऽइन्द्र॑ऽएका॒द
शे॒ विश्वे॑ दे॒वा द्वा॑द॒शे ॥ ६ ॥ उ॒ग्रश्च॑ । भी॒मश्च॑ ध्वा॒न्तश्च॒ धुनि॑श्च ॥
सा॒स॒ह्वाँश्चा॑भियु॒ग्वा च॑ विक्षि॒पः स्वाहा॑ ॥ ७ ॥ अ॒ग्निꣳ हृद॑येन ॥ अ॒
ग्निꣳ हृद॑येना॒शनि॑ꣳ हृदया॒ग्रेण॑ पशु॒पति॑ङ्कृत्स्नहृद॑येन भ॒वंय्य॒क्ना ॥
श॒र्वम्म॑त॒स्नाभ्या॒मीशा॑नम्म॒न्युना॑ महादे॒वम॑न्तᳶपर्श॒व्येनो॒ग्रन्दे॒वं

वनिष्ठुनांवसिष्ठहनुꣳशिङ्गीनिकोश्याभ्याम् ॥ ८ ॥ उग्रँल्लोहितेनमित्रꣳसौव्रत्येनरुद्रन्दौर्व्रत्येनेन्द्रम्प्रक्रीडेनमरुतोबलेनसाध्यान्प्रमुदा ॥ भवस्यकण्ठ्यꣳरुद्रस्यान्तꣳपार्श्व्यम्महादेवस्ययकृच्छर्वस्यवनिष्ठुःपशुपतेꣳपुरीतत् ॥ ९ ॥ लोमभ्यꣳस्वाहा ॥ लोमभ्यःस्वाहात्त्वचेस्वाहात्त्वचेस्वाहालोहितायस्वाहालोहितायस्वाहामेदोभ्यꣳस्वाहामेदोभ्यःस्वाहा ॥ माꣳसेभ्यꣳस्वाहामाꣳसेभ्यꣳस्वाहास्नावभ्यꣳस्वाहास्नावभ्यꣳस्वाहास्थभ्यःस्वाहास्थभ्यꣳस्वाहामज्जभ्यꣳस्वाहामज्जभ्यꣳस्वाहा ॥ रेतसेस्वाहापायवेस्वाहा ॥ १० ॥ आया

सायुस्वाहा । प्प्रयासायुस्वाहासंय्यासायुस्वाहाव्वियासायुस्वाहा
द्यासायुस्वाहा ॥ शुचेस्वाहाशोचंतेस्वाहाशोचंमानायुस्वाहाशोका
युस्वाहा ॥ ११ ॥ तपंसेस्वाहा ॥ तपंसेस्वाहातप्प्यंतेस्वाहातप्प्यंमा
नायुस्वाहातप्तायुस्वाहाघर्म्मायुस्वाहा ॥ निष्कृत्त्यैस्वाहाप्प्रायंश्चि
त्त्यैस्वाहाभेषजायुस्वाहा ॥ १२ ॥ यमायुस्वाहा ॥ यमायुस्वाहान्तं
कायुस्वाहामृत्त्यवेस्वाहा ॥ ब्रह्मंणेस्वाहाब्रह्महत्त्यायैस्वाहाविश्श्वे
भ्योदेवेभ्यःस्वाहाद्यावापृथिवीभ्याꣳस्वाहा ॥ १३ ॥ इति श्रीशु
क्लयजुःसंहितायां दीर्घपाठे एकोनचत्त्वारिंशातितमोऽध्यायः ॥३९॥

ईशावास्यमष्टावंधंतमोनवद्वैसप्तदश ॥ ॐईशाव्वास्युम् ॥ ईशाव्वा
स्युमिदꣳसर्व्वुँय्यत्किञ्चुजगंत्त्याञ्जगंत् ॥ तेनंत्त्युक्तेनंभुञ्जीथामागृंधुः
कस्यांस्विद्धनंम् ॥ १ ॥ कुर्व्वन्नेव ॥ कुर्व्वन्नेवेहकर्म्माणिजिजीविषेच्छु
तꣳसमाः ॥ एवन्त्वयिनान्यथेतोस्तिनकर्म्मलिप्प्यतेनरे ॥ २ ॥
असुर्य्यानामतेलोकाऽअन्धेनतमसावृंताः ॥ ताँस्तेप्प्रेत्त्याभिगच्छ
न्तियेकेचांत्त्कमुहनोजनाः ॥ ३ ॥ अनेषदेकंम् ॥ अनेषदेकम्मनं
सोजवीयोनैनंद्देवाऽआप्प्नुवन्पूर्व्वमशंत् ॥ तद्धावंतोन्न्यानत्त्येतितिष्ठत्त
स्मिन्नपोमांतरिश्वांदधाति ॥ ४ ॥ तदेजति । तन्नैजंतितद्दूरेतद्वन्ति

के ॥ तदन्तरस्यसर्व्वस्यतदुसर्व्वस्यास्यबाह्यतः ॥५॥ यस्तु ॥ यस्तु
सर्व्वाणिभूतान्यात्त्मन्नेवानुपश्यति ॥ सर्व्वभूतेषुचात्त्मानन्ततोनवि
चिकित्सति ॥ ६ ॥ यस्मिन्त्सर्व्वाणिभूतान्यात्त्मैवाभूद्विजानतः ॥
तत्रकोमोहःकःशोकऽएकत्त्वमनुपश्यतः ॥ ७ ॥ सपर्य्य ॥ सपर्य्य
गाच्छुक्रमकायमव्रणमस्नाविरꣳशुद्धमपापविद्धम् ॥ कविर्म्मनी
षीपरिभूःस्वयम्भूर्य्याथातथ्यतोर्त्थान्व्यदधाच्छाश्वतीभ्यःसमा
भ्यः ॥ ८ ॥ अन्धन्तमः । प्रविशन्तियेसम्भूतिमुपासते ॥ ततो
भूयऽइवतेतमोयऽउसम्भूत्याꣳरताः ॥ ९ ॥ अन्यदेव ॥ अन्यदेवा

हुःसम्भवादन्न्यदाहुरसम्भवात् ॥ इतिशुःश्रुमधीराणाय्येनस्तद्विचचक्षिरे ॥ १० ॥ सम्भूतिञ्च । विनाशञ्चयस्तद्वेदोभयꣳसह ॥ विनाशेनमृत्त्युन्तीर्त्त्वासम्भूत्त्यामृतमःश्नुते ॥ ११ ॥ अन्धन्तमः । प्रविशन्तियेऽविद्यामुपासते ॥ ततोभूयऽइवतेतमोयऽउविद्यायांꣳरताः ॥ ॥ १२ ॥ अन्यदेव ॥ अन्यदेवाहुर्विद्यायाऽअन्यदाहुरविद्यायाः ॥ इतिशुःश्रुमधीराणाँय्येनस्तद्विचचक्षिरे ॥ १३ ॥ विद्याञ्च ॥ विद्याञ्चाविद्याञ्चयस्तद्वेदोभयꣳसह ॥ अविद्ययामृत्त्युन्तीर्त्त्वाविद्ययामृतमःश्नुते ॥ १४ ॥ वायुरनिलम् ॥ वायुरनिलममृतमथेदम्भस्मान्तꣳ

शरीरम् ॥ ओ३म् क्रतोस्म्मर ॥ क्लिबेस्म्मरं ॥ कृतꣳस्म्मरं ॥१५॥
अग्ग्नेनयं । सुपथांरायेऽअस्म्मान्विश्श्वांनिदेवव्वयुनांनिव्विद्वान् ॥ यु
योद्ध्यस्म्मज्जुहुराणमेनोभूयिष्ठान्तेनमंऽउक्तिम्विधेम ॥ १६ ॥ हि
रण्णमयेनुपात्त्रेण । सत्त्यास्यापिहितम्मुखंम् ॥ योसावादित्त्येपुरुषुꣳ
सोसावहम् ॥ १७ ॥ ओ३म् खम्ब्रह्मं ॥ १८ ॥ इति श्रीवाजस
नेयसंहितायां दीर्घपाठे चत्वारिंशतितमोऽध्यायः ॥४०॥ श्रीवेदपुरु
षार्पणमस्तु ॥ ॥ ॐनमोभगवतेवासुदेवाय ॥ ॐनमोभगवतेशङ्करा
य ॥ ॥ दशाध्यायेसमाख्यातानुवाकाःसर्वसङ्ख्यया ॥ शतंदशानु

वाकाश्चनवान्येचमनीषिभिः ॥ १ ॥ सप्तषष्ठिश्चितोज्ञेयाःसौत्रेद्वाविंशतिस्तथा ॥ अश्वएकोनपंचाशत्पंचत्रिंशत्खिलेस्मृताः ॥ २ ॥ शुक्रियेषुतुविज्ञेयाएकादशमनीषिभिः ॥ एकीकृत्यसमाख्यातंत्रिशतंव्यधिकंमतम् ॥ ३ ॥ ॥ इति वाजसनेयसंहितायामनुवाकाःसमाप्ताः ॥

॥ श्रीगणेशाय नमः ॥ अथ प्रतिज्ञा ॥ मन्त्रब्राह्मणयोर्वेदनामधेयं तस्मिञ्छुक्ले याजुषाम्नाये माध्यन्दिनीयके मन्त्रे स्वरप्रक्रिया ह्यनुदात्तो मूर्ध्न्युदात्तः श्रुतिमूले स्वरित एवं जात्यादयोऽभिहिता ब्राह्मणे तूदात्तानुदात्तौ भाषिकस्वारौ तानस्वराणि छन्दोवत्सूत्राणि ॥ १ ॥

Nepal Sanskrit University, Balmiki Campus, Kathmandu

अथान्तस्थानामाद्यस्य पदादिस्थस्यान्यहलसंयुक्तस्य संयुक्तस्यापि रेफोष्मान्त्याभ्यामृकारेण चाविशेषेणादिमध्यावसानेषूच्चारणे जकारोच्चारणं द्विर्भावेप्येवमथापरांतस्थस्यायुक्तान्यहलः संयुक्तस्योष्मऽऋकारै रेकारसहितोच्चारणमेवं तृतीयांतस्थस्य क्वचिद्दकारस्य तु संयुक्तासंयुक्तस्याविशेषेण सर्वत्रैवमथान्त्यस्यान्तस्थानां पदादिमध्यान्तस्थस्य त्रिविधं गुरुमध्यलघुवृत्तिभिरुच्चारणमथो मूर्द्धन्योष्मणोऽसंयुक्तस्य टुमृतेसंयुक्तस्य च खकारोच्चारणमध्ययनादिकर्मस्वर्थवेलायां प्रकृत्या ॥२॥ अथानुस्वारस्यꣳइत्यादेशः शषसहरेफेषु

तस्य त्रैविध्यमाख्यातं ह्रस्वदीर्घगुरुभेदैर्दीर्घात्परो ह्रस्वो ह्रस्वात्परो दीर्घौ गुरौ परे गुरुः परसवर्णेषत्प्रकृत्या चान्यत्र विसर्गेष्वीषद्विरामः पदाद्यस्य संयुक्ताकारस्येषद्दीर्घता च भवतीषद्दीर्घता च भवति ॥ ३ ॥ इति कात्यायनपरिशिष्टसूत्रं समाप्तम् ॥ ॥ ॥

॥ श्रीगणेशाय नमः ॥ ॥ अथ वेदपारायणविधिः ॥ ॥ स्थंडिलंकल्पयित्वाग्निमुपसमाधायसंपरिस्तीर्य्याज्यंनैताभ्योदेवताभ्योजुहोतिअग्नयेसोमायेंद्रायविश्वेभ्योदेवेभ्यःऋषिभ्यऋग्भ्योयजुर्भ्यःसामभ्यःश्रद्धायैप्रज्ञायैमेधायैधारणायैश्रियैह्रियैसावित्र्यैसवित्रेप्रजापतये

कांडऋषयेसोमायकांडऋषयेअग्नयेकांडऋषयेविश्वेभ्योदेवेभ्यःकांड
ऋषिभ्यःसंहिताभ्योदेवताभ्यउपनिषद्भ्योयाज्ञकीभ्योदेवताभ्यउप
निषद्भ्योवारुणीभ्योदेवताभ्यउपनिषद्भ्योहव्यवाहायविश्वेभ्यऋग्गणे
भ्योऽनुमत्यैस्विष्टकृतेचपृथक्स्वाहाकारेणव्याहृतिभिश्चपुनःपरिषिंच
ति ॥ समाप्तेचैतायजुषातर्पयति । एवमृग्वेदस्यकांडऋष्यादिवर्ज्य
मास्विष्टकृतस्तेषांस्थानेशतर्चिभ्योमाध्यमेभ्योगृत्समदायविश्वामि
त्रायवामदेवायात्रयेभरद्वाजायजामदग्न्यायगौतमायवासिष्ठायप्रगा
थेभ्यःपावमानीभ्योदेवताभ्यःक्षुद्रसूक्तेभ्योमहासूक्तेभ्योमहानाम्नी

भ्यइति ॥ ततोवेदादिमारभ्यसंततमधीयीतेत्याहभगवान्बौधायनः ॥ इति वेदपारायणोपक्रमविधिः ॥ ॥ अथ वेदपारायणे कलशप्रतिष्ठापनादिप्रकारः ॥ तीर्थे देवालये गेहे प्रशस्ते सुपरिष्कृते ॥ कलशंसुदृढंतत्र सुनिर्णिक्तं विभूषितम् ॥ पुष्पपल्लवमालाभिश्चन्दनैःकुंकुमादिभिः॥मृत्तिकाभिश्चसंमिश्रंवेदिमध्येन्यसेत्ततः॥ पंचाशद्भिःकुशैः कार्योब्रह्मापश्चान्मुखस्थितः ॥ स्नापितःस्थापितः कुम्भेचतुर्बाहुश्चतुर्मुखः ॥वत्सजान्वाकृतिंदण्डमुत्तराग्रैःकुशैःकृतम्॥ब्रह्मोपधानेदत्त्वातं ततःस्वस्त्ययनंपठेत् ॥ प्रतिष्ठांकारयेत्पश्चात्पूजाद्रव्यमथोच्यते ॥

यज्ञोपवीतनैवेद्यवस्त्रचन्दनकुंकुमैः । स्रग्धूपदीपतांबूलैरक्षतैश्चपिता
महम् ॥ ब्रह्मयज्ञानमिति वागायत्र्यावाप्रपूजयेत् ॥ उपाध्यायश्चसंपू
ज्योयथापाठंपठेत्ततः ॥ इति वेदपारायणेकलशप्रतिष्ठापनादिप्रकारः॥
॥ ॥ अथानक्षत्रपारायणविधिः ॥ ॥ अथातोनक्षत्रपारायणविधिं
व्याख्यास्यामः ॥ आसमाप्तेर्नाश्नीयात् यथाशक्तिवाऽऽपःपयः फ
लान्योदनंवाहविष्यमल्पं भुक्त्वातदाशेषमधीयीत ॥ ग्रामात्प्राची
मुदीचींवादिशमुपगम्याग्निमुपसमाधाय परिस्तीर्येध्मं प्रदायाज्येनै
ताभ्योदेवताभ्योजुहोति ॥ अग्नये सोमायेन्द्राय प्रजापतये बृहस्प

तयेविश्वेभ्यो देवेभ्यो ब्रह्मणे ऋषिभ्यऋग्भ्यो यजुर्भ्यः श्रद्धायै मेधायै प्रज्ञायै धारणायै सदसस्पतये अनुमतये श्रियै ह्रियै सावित्र्यै सवित्रे प्रजापतये कांडऋषये सोमाय कांडऋषये विश्वेभ्यो देवेभ्यःकांडऋषिभ्यःसाहितीभ्योदेवताभ्य उपनिषद्भ्यो याज्ञिकीभ्यो देवताभ्य उपनिषद्भ्यो वारुणीभ्यो देवताभ्य उपनिषद्भ्योहव्यवाहाय विश्वेभ्यऋग्गणेभ्य अनुमत्त्यै स्विष्टकृतेच्च पृथक्स्वाहाकारेण हुत्वा व्याहृतिभिश्च पुनःपरिषिञ्चति ॥ समाप्तेश्चैतायजुषा तर्पयति एवमृग्वेदिकानां कांडऋष्यादिवर्जमास्विष्टकृतस्तेषांस्थाने शतर्चिभ्यो माध्यमेभ्यो

गृत्समदाय विश्वामित्राय वामदेवायात्रये भरद्वाजाय जामदग्न्याय गौतमाय वसिष्ठाय प्रगाथेभ्यः पावमानीभ्यः क्षुद्रसूक्तेभ्योमहानाम्नीभ्य इति ॥ ततो वेदादिमारभ्य संततमधीयीत ॥ नास्यान्तरानध्यायो नास्यान्तराजननमरणेअशुचीनान्तराव्याहरेन्नान्तराविरमेत् यावदन्तमधीयीत ॥ यद्यन्तराविरमेत्त्रीन्प्राणायामानायम्य प्रणवं वा प्रणिधाय यावत्कालमधीयीत ॥ ततः सर्वं निशोनिशान्तरं संग्रामारण्यसलिलं प्रलोप्यपरिदध्यात् ॥ आदावन्तेच ब्राह्मणभोजनं दक्षिणादानंच दद्यात् ॥ परातेन विधिनावेदमधीयीत सततः पूतोवे

दोभवति मनःशुद्धश्चभवति॥द्वाभ्यां पारायणाभ्यां ऋग्भिश्च॥भोजन इहाधीत अनृतेभ्यः प्रमुच्यते॥ त्रिभिर्बहुभ्यः पातकोपपातकेभ्यः शूद्रायां रेतःसिक्त्वागंगासुनिमज्जंश्चभवति॥चतुर्भ्यः शूद्रान्नभोजनात्तत्सेवनात्तत्स्त्रीसेवनाच्च ॥ पञ्चभिरयाज्ययाजनात्पूतोभवति ॥ अग्राह्यग्रहणाद्ग्राह्याग्रहणादभ्यासोपासनाच्च षड्भिर्ब्राह्मणस्य लोहितकरणात्स्त्रीलोहितकरणात्पशुहननात्सुवर्णस्तेयात्पतितसंप्रयोगाच्च। सप्तभिः प्राजापत्यानांहीनाचरणाद्यज्ञोपवेधनाच्च ॥ अष्टभिश्चान्द्रायणस्यान्तरानाचरणाद्गुरुतल्पगमनाद्रजस्वलागमनाच्च ॥ नवभिः

सुरापानाच्च ॥ दशभिरश्रोत्रिययाजनादसोमपानादन्यायतश्च ॥ एकादशभिर्ब्राह्मणहननाद्गर्भहननात् ॥ द्वादशभिःपूर्वजन्मेहजन्मकृतैः सर्वैः पापैः प्रमुच्यते स्वर्गलोकं गच्छति पितॄन्स्वर्गलोकं गमयत्यग्निष्टोमादीनृतून्यजति तैः क्रतुभिरिष्टंभवति ॥ वेदाध्यायी सदैवस्याद्यथावैसत्यवाक्शुचिः ॥ यंयंकामयतेकामंतंतंवेदेनसाधयेत् । असाध्यं नास्ति यत्किंचिद्ब्रह्मणोहिफलंमहद्ब्रह्मणोहिफलंमहादिति समाप्तौ यजुषातर्पयतीति ॥ समाप्ते वेदपरायणे समाप्ते एतादेवताःपूर्वोक्ताअग्निसोमाद्यजुषातर्पयति यजुर्वेदपरायणे तस्यवेदस्यप्राधान्य

मुच्यते अथवाभूरादिव्याहृतिचतुष्टयात्मकं यजुःशब्देनगृह्यते ॥ तेनै तदुक्तंभवति ॥ भूर्देवांस्तर्पयामीत्यनेनप्रकारेणतर्पयित्वा अग्नि सोमादींस्तर्पयेदिति ॥ नास्यांतराजननमरणे ॥ अशुचीइतिनाशुचि हेतुभूतेइत्यर्थः ॥ नांतराव्याहरेदिति ॥ उपक्रांतवेदपारायणमध्ये न व्याहरेन्नाध्यापयेत्तथा लौकिकवचनमपि न ब्रूयात् ॥ विहितं नित्य नैमित्तिकं कर्मानुपयुक्त्वावाक्तिं न कुर्यादित्यर्थः ॥ निशोनिशान्तरं संग्रामारण्यसलिलं लोप्यपरिदध्यादिति लोप्यछित्त्वापरिहार्य्यं वर्जयित्त्वेत्यर्थः इतियावत् ॥ परिदध्यात्समापयेत् ॥ निशान्तरं निशी

थः संध्यावा॥सलिलं वृष्टिरुदकसमीपभूमिकावा॥निशादिकालान्द शांश्चवर्जयित्त्वा समापयेदित्त्यर्थः ॥ सततः पूतोवेदोभवतीति वेदो भवति वेदात्मको भवति उत्कृष्टज्ञानवान्भवेदित्यर्थः ॥ द्वाभ्यां पारायणाभ्यां ऋग्भिश्चेति ऋग्भिः पावमानीभिः पारायणद्वयं पावमान्यश्चमिलित्त्वोक्तफलायकल्प्येते इत्यर्थः॥एवमुत्तरत्र पारायणत्रयं गंगास्नानंचामिलित्वा साधनम्॥निमज्जंश्च भवति पूतोभवतीत्त्यर्थः॥प्रजापत्यानाचरणं प्रक्रान्तप्राजापत्यानामननुष्ठानम् एवं चान्द्रायणस्यानाचरणं यज्ञोपवेधनं यज्ञविनाशः ॥ इत्यनश्नत्पारायणविधिः ॥

॥ अथ याज्ञवल्क्यशिक्षाप्रारम्भः ॥

श्रीगणेशाय नमः ॥ ॥ अथ याज्ञवल्क्यशिक्षाप्रारम्भः ॥ ॥ अथातस्त्रैस्वर्यलक्षणंव्याख्यास्यामः॥उदात्तश्चानुदात्तश्चस्वरितश्चतथैवच ॥ लक्षणंवर्णयिष्यामिदैवतंस्थानमेवच ॥ १ ॥ शुक्लमुच्चंविजानीयान्नीचंलोहितमुच्यते ॥ श्यामंतुस्वरितंविद्यादाग्निरुच्चेतुदैवतम् ॥ २ ॥ नीचेसोमंविजानीयात्स्वरितेसविताभवेत् ॥ उदात्तंब्राह्मणंविद्यान्नीचःक्षत्रियउच्यते ॥ ३ ॥ वैश्यंतुस्वरितंविद्याद्भारद्वाजमुदात्तकम् ॥ नीचंगौतममित्याहुर्गार्ग्यंचस्वरितंविदुः ॥ ४ ॥ विद्यादुदात्तंगायत्रंनीचंत्रैष्टुभमुच्यते ॥ जागतंस्वरितंविद्यादतएवंनियोगतः ॥ ५ ॥ गांधर्ववेदे

येप्रोक्ताःसप्तषड्जादयःस्वराः ॥ तएववेदेविज्ञेयास्त्रयउच्चादयःस्वराः
॥ ६ ॥ उच्चौनिषादगांधारौनीचौऋषभधैवतौ ॥ शेषास्तुस्वरिताज्ञे
याःषड्जमध्यमपंचमाः ॥ ७ ॥ षड्जोवेदेशिखंडीस्यादृषभःस्याद
जामुखे ॥ गावोरटंतिगांधारंक्रौंचाश्चैवतुमध्यमम् ॥८॥ कोकिलःपञ्च
मोज्ञेयोनिषादंतुवदेद्गजः ॥ आश्वश्चधैवतोज्ञेयःस्वराःसप्तेतिगीयते
॥ ९ ॥ निमेषमात्रःकालःस्याद्विद्युत्कालस्तथापरे ॥ अक्षरात्तुल्ययो
गाच्चमतिःस्यात्सोमशर्मणः ॥१०॥ सूर्यरश्मिप्रकाशाद्याकणिकायत्र
दृश्यते ॥ आणवस्यतुसामात्रामात्राचचतुराणवा ॥ ११ ॥ मानसेचा

या० णवंविंद्यात्कण्ठेविंद्याद्द्विराणवम् ॥ त्रिराणवंतुजिह्वाग्रेनिस्सृतंमात्रिकं
॥ २ ॥ विदुः ॥ १२ ॥ अवग्रहेतुकालःस्यादर्धमात्राप्रकीर्त्तिता ॥ पदयोरंतरे
कालएकमात्राविधीयते ॥१३॥ ऋचोर्द्धंतुद्विमात्रःस्यात्त्रिमात्रःस्याद्द
गंतके ॥ रिक्तंतुपाणिमुत्क्षिप्यद्वेमात्रेधारयेद्बुधः ॥१४॥ एकमात्रोभ
वेद्ध्रस्वोद्विमात्रोदीर्घउच्यते ॥ त्रिमात्रस्तुप्लुतोज्ञेयोव्यंजनश्चार्द्धमात्र
कम् ॥ १५ ॥ विवृतौचावसानेचऋचोर्द्धेचतथापरे ॥ पदेचपादसं
शि० स्थानेशून्यहस्तंविधीयते ॥ १६ ॥ प्रणवंतुप्लुतंकुर्याद्व्याहृतीर्मातृका
विदुः ॥ चाषस्तुवदतेमात्रांद्विमात्रांवायसोऽब्रवीत् ॥१७॥ शिखीव

देत्रिमात्रांवैमात्राणामितिसंस्थितिः ॥ वर्णौजातिश्चमात्राचगोत्रंछं
न्दश्चदैवतम् ॥ १८ ॥ एतत्सर्वंसमाख्यातंयाज्ञवल्क्येनधीमता ॥ ह
स्तौतुसंयतौधार्यौजानुभ्यामुपरिस्थितौ ॥ १९ ॥ गुरोरनुमतंकुर्या
त्पठन्नान्यमतिर्भवेत् ॥ ऊरुभागेतृतीयेतुकरंविन्यस्यदक्षिणम् ॥ २० ॥
प्रसन्नमानसोभूत्वाकिंचिन्निम्नमधोमुखम् ॥ प्रणवंप्राक्प्रयुञ्जीतव्या
हृतीस्तदनंतरम् ॥ २१ ॥ सावित्रींचानुपूर्व्येंणततोवेदान्समारभेत् ॥
कूर्मोङ्गानीवसंहृत्यचेष्टांदृष्टिंदृढंमनः ॥ २२ ॥ स्वस्थःप्रशांतोऽनिर्भीको
वर्णानुच्चारयेद्बुधः ॥ नाभ्याहन्यान्नानहन्यान्नगायेन्नैवकंपयेत् ॥ २३ ॥

यथैवोच्चारयेद्वर्णांस्तथैवैतान्समापयन् ॥ निवेश्यदृष्टिंहस्ताग्रेशास्त्रा
र्थमनुचिन्तयेत् ॥ २४ ॥ सममुच्चारयेद्वर्णान्हस्तेनचमुखेनच ॥
स्वरश्चैवतुहस्तश्चद्वावेतौयुगपत्स्थितौ ॥२५॥ हस्तभ्रष्टःस्वरभ्रष्टोनवे
दफलमश्नुते ॥ नकरालोनलंबोष्ठोनाव्यक्तोनानुनासिकः ॥ २६ ॥ गद्ग
दोबद्धजिह्वश्चनवर्णान्वक्तुमर्हति ॥ प्रकृतिर्यस्यकल्याणीदंतोष्ठौयस्य
शोभनौ ॥ २७ ॥ प्रगल्भश्चविनीतश्चसवर्णान्वक्तुमर्हति ॥ शंकितंभीत
मुद्घुष्टमव्यक्तमनुनासिकम् ॥ २८ ॥ काकस्वरंमूर्ध्निगतंतथास्थानवि
वर्जितम् ॥ विस्वरंविरसंचैवविश्लिष्टंविषमाहतम् ॥ २९ ॥ व्याकुलंता

लहीनंचपाठदोषाश्चतुर्दश ॥ संहितास्वास्वबहुलःपदसंज्ञासमाकुलः ॥ ॥ ३० ॥ क्रमसंधिसमाकीर्णोदुस्तरोमंत्रसागरः ॥ ऋक्संहितांत्रिरभ्यस्ययजुषांवासमाहितः ॥ ३१ ॥ साम्नांवासरहस्यांचसर्वपापैःप्रमुच्यते ॥ संहितानयतेसूर्यंपदंचशशिनःपदम् ॥ ३२ ॥ क्रमश्चनयतेसूक्ष्मंयत्तत्पदमनामयम् ॥ कालिंदीसंहिताज्ञेयापदयुक्तासरस्वती ॥ ॥ ३३ ॥ क्रमेणावर्त्ततेगंगाशंभोर्वाणीतुनान्यथा ॥ यथामहाह्रदंप्राप्यक्षिप्तोलोष्टोविनश्यति ॥ ३४ ॥ एवंदुश्चरितंसर्वंवेदेत्रिवृातिमज्जाति ॥ आम्रपालाशबिल्वानामपामार्गशिरीषयोः ॥ वाग्यतःप्रातरुत्था

यभक्षयेद्दंतधावनम् ॥३५॥ खादिरश्चकदंबश्चकरवीरकंरजकौ ॥ ए
तेकंटकिनःपुण्याःक्षीरिणस्तुयशस्विनः ॥ ३६ ॥ तेनास्यकरणेसूक्ष्मं
माधुर्यंचैवजायते ॥ त्रिफलांलवणाक्तांवैभक्षयेच्छिष्यकःसदा ॥ क्षी
णमेधाजनन्येषास्वरवर्णकरीतथा ॥ ३७ ॥ हस्तहीनंतुयोधीतेमंत्रंवे
दविदोविदुः ॥ यजूꣳषिनोसाधयंतिभुक्तमव्यंजनंयथा ॥ ३८ ॥ हस्त
हीनंतुयोधीतेस्वरवर्णविवर्जितम् ॥ ऋग्यजुस्सामभिर्दग्धोवियोनि
मधिगच्छाति ॥ ३९ ॥ ऋचोयजूꣳषिसामानिहस्तहीनानियःपठेत् ॥
अनृचोब्राह्मणस्तावद्यावत्स्वारंनाविंदति ॥ ४० ॥ ज्ञातव्यश्चतथैवा

थर्ववेदानांकर्मसिद्धये ॥ पठन्मात्रापपाठात्तुपंकेगौरिवसीदति ॥४१॥
स्वरवर्णप्रयुंजानोहस्तेनाधीतमाचरन् ॥ ऋग्यजुस्सामभिःपूतोब्रह्म
लोकमवाप्नुयात् ॥ ४२ ॥ नकुर्वीतपदंदीर्घंनकुर्वीतविलंबितम् ॥ पद
स्यग्रहमोक्षौचयथाशीघ्रगतिर्हयः ॥ ४३ ॥ आगमंकुरुयत्नेनकार
णंहितदात्मकम् ॥ आस्येनचशयंकुर्यात्पठन्नान्यमतिर्भवेत् ॥ ४४ ॥
नचास्यमुष्टिबंधीस्यान्नचात्युत्तममाचरेत् ॥ चुलुनौकास्फुटोदंडीस्व
तिकोमुष्टिराकृतिः ॥ एतेवैहस्तदोषाःस्युःपरशुश्चैवसप्तमः ॥ ४५ ॥
यथावाणीतथापाणीरिक्तंतुपरिवर्जयेत् ॥ यत्रयत्रस्थितावाणीपाणि

स्तत्रैवतिष्ठति ॥ ४६ ॥ यथाधनुष्याविततेशरेक्षिप्तेपुनर्गुणः ॥ स्व
स्थानंप्रतिपद्येततद्वद्धस्तगतःस्वरः ॥ ४७ ॥ उत्तानंसोन्नतंकिंचित्सु
व्यक्तांगुलिरंजितम् ॥ स्वराविद्धंकरंकुर्यात्प्रादेशोद्देशगामिनम् ॥४८॥
अंगुष्ठस्योत्तरेपर्वेतर्जन्युपरियद्भवेत् ॥ प्रादेशस्यतुसोद्देशस्तन्मात्रं
चालयेत्करम् ॥४९॥ मनुष्यतीर्थोच्चंकृत्वापितृतीर्थोदकंव्रजेत् ॥ ना
मितंकरपृष्ठेतुसव्यक्तांगुलिमोक्षणम् ॥ ५० ॥ स्वारितेत्र्यंगुलंविंद्यान्नि
पातेतुषडंगुलम् ॥ उत्थानेतुनवांगुल्ल्यमेतत्स्वारस्यलक्षणम् ॥५१॥
अभ्यासार्थंद्रुतांवृत्तिंप्रयोगार्थंतुमध्यमाम् ॥ शिष्याणामुपदेशार्थंकु

र्यांद्वृत्तिंविलंबिताम् ॥ ५२ ॥ ऐंद्रीतुमध्यमावृत्तिःप्राजापत्याविलंबिता ॥ अग्निमाऽरुतयोर्वृत्तिःसर्वशास्त्रेषुनिंदिता ॥ ५३ ॥ मुष्ट्याकृतिर्मंकारेतुनकारेतुनखाग्रतः ॥ अनुस्वारेंगुष्ठपातऊष्मांतेंगुलिमोक्षणम् ॥ ५४ ॥ उदात्तंभुविपातेनप्रचयंनोग्रएवच ॥ शेषंषडंगुलंविंद्यान्निचितंतुविधीयते ॥ ५५ ॥ षडंगुलंतुजात्यस्यहस्तस्यानुपथस्यच ॥ तच्चतुर्भागमात्रंतुहस्तस्तेनैववर्तयेत् ॥ ५६ ॥ ककारांतेटकारांतेङणेचांगुलिनामयेत् ॥ पंचांगुल्यमकारेतुतकारेकुण्डलाकृतिः ॥५७॥ ऊर्ध्वक्षेपाच्चयोऽमाचअधःक्षेपाच्चयोभवेत् ॥ एकैकामुत्सृजेद्धीरःस्व

रितेतूभयंक्षिपेत् ॥ ५८ ॥ अंगुष्ठाकुंचनंलघावनुस्वारेत्वपाꣳरसम्॥
दीर्घेरंगेचतर्जन्याःप्रसारःपरिकीर्तितः ॥ ५९ ॥ तर्जन्यंगुष्ठयोःस्पर्शे
प्युदात्तंप्रातिविद्यते ॥ नीचंतुमध्यमंकुर्याच्छेषंनीचतरंक्रमात् ॥६०॥
स्वरितंयद्भवेत्किंचिद्धकारसहसंयुतम् ॥ ऊष्माणंतद्विजानीयान्निक्षि
पेदुभयोरपि ॥ ६१ ॥ स्वरितसंज्ञेचानिक्षितेसंयोगोयत्रदृश्यते ॥ द्वि
मात्रिकेभवेदेकमात्रिकेतूभयंक्षिपेत् ॥ ६२ ॥ जात्येचस्वरितेचैवव
कारोयत्रदृश्यते ॥ कर्तव्यस्तूभयोःक्षेपोवायव्यइतिदर्शनम् ॥ ६३ ॥
शृंगवद्धाथवत्सस्यकुमारीकुचयुग्मवत् ॥ उभक्षेपस्वरोयत्रसविसर्गं

उदाहृतः ॥६४॥ विसर्गांतस्वरोयत्रस्वरितोयत्रदृश्यते ॥ दीर्घश्चैवतुकारश्चतत्रोभक्षेपउच्यते ॥ ६५ ॥ त्रिविधस्तुभवेदूष्माप्रचिताबलकातरा ॥ स्वरितेप्रचिताविद्यान्निपातेबलकांविदुः ॥ ६६ ॥ उत्थानेतुतथाताराएताभिस्त्रिभिरूष्मभिः॥ मात्रामात्रांविदित्वातुततःक्षेपंप्रयोजयेत् ॥ ६७ ॥ अक्षरंभजतेकाचित्काचिद्वित्तेप्रंतिष्ठितम् ॥ समानेजातिकाकाचित्काचिदूष्माप्रदायिका ॥ ६८ ॥ यथाबालस्यसर्पस्य उच्छ्वासोलघुचेतसः ॥ एवमूष्माप्रयोक्तव्याहकारपरिवर्जितः ॥६९॥ विवृतिंप्रत्ययादूष्मांप्रवदंतिमनीषिणः ॥ तामेवप्रतिषेधंतिआईऊए

निदर्शनम् ॥७०॥ अष्टौस्वरान्प्रवक्ष्यामितेषामेवतुलक्षणम् ॥ जात्यो
भिनिहितःक्षैप्रःप्रश्लिष्टश्चतथापरः ॥७१॥ तैरोव्यञ्जनसंञ्ज्ञश्च तथा तै
रोविरामकः॥पापवृत्तोभवेत्तद्वत्तथाभाव्यइतिस्वराः ॥७२॥एकपदेनी
चपूर्वःसयवोजात्यइष्यते।अपूर्वोऽपिपरस्तद्वद्धान्यंकन्यास्वरित्यपि॥
एकपदइत्याह ॥ नीचपूर्वःसयकारवकारौवाजात्यःस्वरितोभवति ॥
यथाजात्यंमनुष्यानिति।सुप्वेति।चम्वीव।धान्यम् । कन्याइव।स्वः ।
वीर्यं । एवं ह्याहयानिचान्यानीहग्लक्षणानिपदानिभवंति । एओआभ्या
मुदात्ताभ्यामकारोरिफितश्चयः॥अकारोयत्रलुप्येततंचाभिनिहितंवि
दुः॥७३॥यथा कुक्कुटः+असि। कुक्कुटोसि । वेदः+असि। वेदोसि । भागः

असि+भागोसि। मारुतः+असि। मारुतोसि । श्वात्रः+असि। श्वात्रोसि।ते+अप्सरसाम्। तेप्सरसाम्।ते+अवंतु। तेवंतु।कः+असि।कोसि। सः+अहम् । सोहम् । एवꣳह्याहयानिचान्यानिईदृग्लक्षणानिपदानि भवंति। इउवर्णौयदोदात्तावापद्येतेयवौक्वचित् ॥ अनुदात्तेपदेनित्यंविद्यात्क्षैप्रस्यलक्षणम्॥७४॥यथा त्रि+अंबकम् । त्र्यंबकम् । द्रु+अन्नः । द्र्वन्नः। वीडु+अंगः । वीड्वंगः। वाजी+अर्वन् । वाज्यर्वन् । एवꣳह्याहयानि ०॥ इकारोयत्रदृश्येतइकारेणैवसंयुतः॥उदात्तश्चानुदात्तेनप्रश्लिष्टो भवतिस्वरः॥७५॥ अभि+इन्धताम् । अभीन्धताम् । अभि+इमम् ।

अभीमम् । वि+इहि । वीहि । स्रुचि+इव । स्रुचीव। चम्वी+इव । चम्वीवेति।एवꣳह्याहयानिचान्यानि०॥उदात्तपूर्वंयत्किंचिच्छंदसिस्वरितंपदम्॥एषसर्वंबहुस्वारस्तैरोव्यंजनउच्यते॥७६॥ इडे। रंते। हव्ये। काम्ये। चंद्रे। ज्योते । अदिति । सरस्वता । महि । व्विश्रुतीतिभवंति । एवꣳह्याहयानि० भवंति ॥ अवग्रहात्परोयस्तुस्वरितःस्यादनंतरम् ॥ तैरोविरामंतंविंद्यादुदात्तोयद्यवग्रहः ॥ ७७ ॥ यथागोमदितिगो+मत् । गोपतावितिगो+पतौ । प्रप्रेतिप्र+प्र । विततेतिवि+तता । समिद्धेतिसम् +इद्धः । एवꣳह्याहयानि० भवंति ॥ स्वरेति

स्वरितेचैवविवृतिर्यत्रदृश्यते ॥ पादवृत्तोभवेत्स्वारःश्वित्रआदित्येति निदर्शनम् ॥ श्वित्रः+आदित्यानाम् ॥ श्वित्र आदित्यानाम् । पुत्रः+ईंधे । पुत्रईंधे । दात्रे+एधि । दात्रएधि । कः+ईम् कईम् । ताः+अस्य । ताअस्य । एवंꣳह्याहयानि० ॥ उदात्ताक्षरयोर्मध्येभवेन्नीचस्त्ववग्रहः ॥ तथाभाव्यंभवेत्कंपंस्तनूनप्त्रेतिनिदर्शनम् ॥ ७८ ॥ यथातनूनप्त्रइति तनू+नप्त्रे । तनूनपादिति तनू+नपात् । तनूनपातमिति तनू नपातम् । एवंꣳह्याहयानिपदानिलक्षणानिभवंति ॥ इत्यष्टपदसमाम्नायेवैशेषिकेयाज्ञवल्क्यवचनानांपदानांपाठःसमाप्तः ॥

माध्यंदिनविरोधिःस्यात्तथाभाव्यस्तुयःस्मृतः ॥ स्वरोनैवात्रदृश्येतभिन्नोदात्तानुदात्तकौ ॥ १ ॥ स्वराःस्पर्शांताःस्थोष्माणः ॥ कण्ठ्य-जिह्वामूलीय-तालव्य-मूर्धन्य-दंत्य-ओष्ठ्य-यम-विसर्जनीयनिपाताद्याश्चकिंवर्णदैवत्यलिंगाः । स्मराः शुक्लाः नानादैवत्याः । स्पर्शाः कृष्णाः । कपिलाअंतस्थाः । ऊष्माणोऽरुणाः । नीलायमाः । हरितानासिक्याः । पीतोनुस्वारः । रक्तोजिह्वामूलीयः । पीतउपध्मानीयः । श्वेतोविसर्जनीयः । शबलोरंगः । नीलोनुनासिक्यः । इत्यंतर्मध्यमयोर्नासिक्यंविद्यात् ॥ द्विरुदात्ताख्याइतिस्मृतः । उदमनुद

निपातेआद्येचोपसर्गैनाम्नाख्यातेचोपसर्गनिपाताश्चेति । किंदैवत्या अक्षराणांचकेपुरुषाः । काःस्त्रियः । कानिनपुंसकानिइत्यत्रब्रूमः । कंठ्याआग्नेयाः । अकारादयः । जिह्वामूलीयानैर्ऋत्याःककारादयः । तालव्याः सौम्याश्चचकारादयः । वायंव्यामूर्धन्याष्टकारादयः । रौद्रादंत्यास्तकारादयः । औष्ठ्याआश्विन्याः पकारादयः । शेषावैश्वदेवाः । अंइत्येवमादयः ॥ स्वरास्तुब्राह्मणाज्ञेयावर्गाणांप्रथमाश्चये ॥ द्वितीयाश्चतृतीयाश्चचतुर्थाश्चापिभूमिपाः ॥ २ ॥ वर्गाणांपंचमावैश्याअंतस्थाश्चतथैवच ॥ ऊष्माणश्चहकारश्चशूद्राएवप्र

कीर्तिताः ॥ ३ ॥ शुक्लवर्णानिनामानिआख्यातारोहितामताः ॥ क
पिंजलास्तूपसर्गाःकृष्णाश्चैवनिपातकाः ॥ ४ ॥ भार्गवगोत्राणिना
मानिभारद्वाजाआख्याताः ॥ वासिष्ठाउपसर्गास्तुनिपाताःकाश्य
पाःस्मृताः ॥ पीतवर्णश्चोपसर्गोनिपातःकृष्णवर्णकः ॥ सर्वंतुसौम्य
माख्यातंवायव्यंनामदृश्यते ॥ आग्नेयस्तूपसर्गःस्यान्निपातोवारुणः
स्मृतः ॥ ५ ॥ प्रथमाश्चतथांतस्थाःस्त्रीलिंगाःपरिकीर्तिताः ॥ शेषा
क्षराणिषंढानिप्राहुर्लिंगाविवेचकाः ॥ ६ ॥ नाम्नामिंद्रोदेवताव
रुणउपसर्गाणामादित्यःसर्वस्याक्षरगणस्यस्वराविसर्जनीयोयमाश्चपुं

ल्लिंगाः । ङञणनमायरलवाः स्त्रीलिंगाः । शेषाण्यक्षराणिनपुंसकलिंगानीति ॥ संधिश्चतुर्विधोभवतीति ॥ लोपागमौवर्णविकारः प्रकृतिभावश्चेति । तद्यथा तत्रलोपोभवति अयक्ष्माः+मा अयक्ष्मामा । शततेजाः+वायुः शततेजावायुः । तिग्मतेजाः+द्विषतः । तिग्मतेजाद्विषतः । इतिलोपः॥आगमोभवति यथा प्रत्यङ्+सोमः प्रत्यङ्क्सोमः । प्राङ्क्सोमः प्राङ्+सोमः।अस्मान्+सीतेअस्मान्त्सीते।त्रीन्+समुद्रान् त्रीन्त्समुद्रान्। इतिआगमः॥विकारोभवति आ+इदम् एदम्।आ+इमे एमे । आ+इष्टयः एष्टयः । प्र+इषितः प्रेषितः । इतिविकारः॥प्रकृति

भावः यथा आशुः शिशानः । युञ्जानःप्रथमम् । अदितिःषोडशाक्षरेण ।
देवोवःसविता । इतिप्रकृतिभावः ॥ आकाशस्थायथाविद्युत्स्फुटिताम
णिसूत्रवत् ॥ एषच्छेदोविवृत्तीनांयथाबालेषुकर्तरी ॥ ७ ॥ द्वयोस्तु
स्वरयोर्मध्येसंधिर्यत्रनदृश्यते ॥ विवृत्तिस्तत्रविज्ञेयायईशेतिनिदर्श
नम् ॥ ८ ॥ पिपीलिकापाकवतीतथावत्सानुसारिणी ॥ वत्सानुसंसृ
ताचैवचतस्रस्तुविवृत्तयः ॥ ९ ॥ पंचरंगाःप्रवर्तंतेघातनिर्घातव
ज्रिणः ॥ अहरप्रहरोज्ञेयअइउऋओइतिनिदर्शनम् ॥ १० ॥ पिपीलि
काआद्यंतदीर्घानाभ्याआसीदितिनिदर्शनम् ॥ पाकवत्युभयोर्ह्रस्वा

विनइन्द्रेतिनिदर्शनम् ॥ ११ ॥ अन्तेचवत्सानुसृजतातानेत्यसौआवोढमाश्विनेतिनि०॥वत्सानुसारिणीचादौदीर्घांताअस्येतिनि०॥१२॥ करिणीकुर्विणीचैवहरिणीहारिणीतिच ॥ तथाहंसपदानामपंचैताःस्वरभक्तयः ॥ १३ ॥ करिणीरहयोर्योगेकुर्विंणीलहकारयोः ॥ हरिणीरषयोर्योगेहारितांऋषकारयोः ॥ १४ ॥ यातुहंसपदानामसातुरेफषकारयोः ॥ हरिणीहरयोर्विंद्यात्कुर्विंणीलहकारयोः ॥ १५ ॥ देवंबर्हिरितिकरिणीउपह्वरेतिकुर्विंणी ॥ हरिणींअरेषसइत्याहुर्हारिणीशतवल्हेतिच ॥ १६ ॥ वर्षींवर्षीयतेसीतितथाहंसपदेतिच ॥ स्वरभक्तिं

प्रयुंजानस्त्रीन्दोषान्परिवर्जयेत् ॥ १७ ॥ इकारंचाप्युकारंचग्रस्तदो
षंतथैवच ॥ एतल्लक्षणमाख्यातंयाज्ञवल्क्येनधीमता ॥ १८ ॥ सम्य
क्पाठस्यसिद्ध्यर्थंशिष्याणांहितकाम्यया ॥ अर्धमात्रास्वरंकिंचि
त्पृथङ्न्यूनमिवोच्चरन् ॥ ऋकारेतुहकारस्यहृत्कंठमनसापिच ॥ १९ ॥
नैतत्स्वरितपूर्वांगेनापरांगेकथंचन ॥ नस्वरेनचमात्रायांकथंस्वारोवि
धीयते ॥ २० ॥ परांगस्यतुयत्पूर्वंपूर्वांगस्यतुयत्परम् ॥ उभयार्द्धार्द्ध
संयोगेस्वारंकुर्याद्विचक्षणः ॥ २१ ॥ संयोगेतुपरंस्वार्थंपरंसंयोगना
यकम् ॥ संयुक्तस्यतुवर्णस्यनस्वार्थंपूर्वमक्षरम् ॥ २२ ॥ उदात्ताद

नुदात्तेतुवामायाभ्रुवआरभेत् ॥ उदात्तात्स्वरितोदात्तौक्रमाद्दक्षिणतो
न्यसेत् ॥ २३ ॥ स्वरितादनुदात्तायेप्रचयांस्तान्प्रचक्षते ॥ एकस्व
रानपिचतानाहुस्तत्त्वार्थचिंतकाः ॥ २४ ॥ प्रचयोयत्रदृश्येततत्रह
न्यात्स्वरंबुधः ॥ स्वरितःकेवलोयत्रमृदुस्तत्रानिपातयेत् ॥ २५ ॥ दु
र्बलस्ययथाराष्ट्रंहरतेबलवान्नृपः ॥ एवंव्यंजनमासाद्यअकारोहरते
स्वरम् ॥ २६ ॥ उच्चादुच्चतरंनास्तिनीचान्नीचतरंतथा ॥ अक्षरात्तु
ल्ययोगाच्चनीचेनीचगतानिच ॥ २७ ॥ स्वरउच्चःस्वरोनीचःस्वरः
स्वरितएवच ॥ स्वरप्रधानैस्तैःस्वार्यंव्यंजनंतेनसस्वरम् ॥२८॥ व्यंज

नान्यनुवर्तंतेयत्रातिष्ठतिसस्वरः ॥ स्वरप्रधानंत्रैस्वर्यंआचार्याःप्रवदं
तिहि ॥२९॥ मणिवद्व्यंजनंविद्यात्सूत्रवच्चस्वरंविदुः ॥ आचार्याःसम
मिच्छंतिपद्च्छेदंतुपंडिताः ॥३०॥ स्त्रियोमधुरमिच्छंतिविकृष्टमित
रेजनाः ॥ उदात्तंनानुवर्तंतेनीचंनस्वरितंतथा ॥३१॥ विस्वरंतंविजा
नीयाद्दीर्घह्रस्वविवर्जितम्॥हरिवरुणवरेण्येषुधाराहिपुरुषेषुच ॥ वैश्वा
नरोनकारे च शेषास्तु स्वरितानराः ॥ स्वरितेरेफवैश्वानरोनकारःशे
षाकारःस्वरितानराः ॥ ३२ ॥ द्वौवरुणौचस्वरितौउदुत्तमंत्वंवरुण ॥
धारेचैवोरुधारेतुपुरुधारेचदोहने ॥ मात्रिकंवाद्विमात्रंवास्वरितंयदि

हाक्षरम् ॥ तस्यादितोर्द्धमात्रावैशेषंचपरतोभवेत् ॥३३॥ नकारांतपदे पूर्वैश्मश्रुभिःपरतःस्थिते॥ छकारंनप्रयुंजीतञशसंधिंसमुच्चरेत्॥३४॥ ओकारंप्लुतविज्ञेयंप्लुतमग्नाद्वितीयकम् ॥ लाजींछाचीतृतीयंचविवेशंतिचतुर्थकम् ॥ ३५ ॥ अधःस्विदासीत्पंचमंचोपरिस्विदासीच्चषष्ठकम् ॥ सप्तमंतुभ्रुवोस्मारअष्टमंनैवविद्यते ॥ ऌकारस्यतुदीर्घत्वंनास्तिवाजसनेयिनः ॥३६॥ उच्चस्थानगतेह्रस्तेस्वरितंनोपपद्यते ॥ अधस्तातुयदागच्छेत्स्वरितंनतदाभवेत् ॥ कचटतपादृश्यंतेसंधिस्थानेषुनित्यशः ॥ स्ववर्गेणैवसंयुक्तामोक्षंकुर्वीततत्रवै ॥ तकारांतपदेपूर्वैसका

रेपरतःस्थिते ॥ प्रत्यारंभंनकुर्वीतपापावितिनिदर्शनम् ॥ ककारांतेपदेपूर्वेंसकारेपरतःस्थिते ॥ खसवर्णविजानीयाद्धिखक्सेतिनिदर्शनम् ॥ तकारांतेपदेपूर्वेंचवर्गेंपरतःस्थिते ॥ मोक्षंतत्रचकुर्वीतयच्चपापौनिदर्शनम् ॥ ङकारांतेपदेपूर्वेंसकारेपरतःस्थिते ॥ कसवर्णविजानीयात्प्राङ्सोमेतिनिदर्शनम् ॥ टकरांतेपदेपूर्वेंसकारेपरतःस्थिते ॥ टसवर्णविजानीयात्संम्राट्संभृतेतिनिदर्शनम् ॥ तकारांतेपदेपूर्वेंसकारेपरतःस्थिते ॥ छसवर्णविजानीयात्तत्सवितुरितिनिदर्शनम् ॥ नकारांतेपदेपूर्वेंसकारेपरतःस्थिते ॥ तसवर्णविजानीयात्रीन्त्समुद्रेतिनिदर्श

नम् ॥ पकारांतेपदेपूर्वेंशकारेपरतःस्थिते ॥ छासवर्णंविजानीयादनुष्टु
प्छारदीतिनिदर्शनम्॥ मकारांतेपदेपूर्वेंसवर्णेंपरतःस्थिते॥ मसवर्णंवि
जानीयादिमम्मेतिनिदर्शनम्॥वर्णेंतुमात्रिकेपूर्वेंअनुस्वारोद्विमात्रिकः
द्विमात्रेमात्रिकोज्ञेयःसंयोगाद्यस्ययोभवेत्॥ अनुस्वारोद्विमात्रः स्या
द्वर्णव्यंजनादिगः॥ह्रस्वाद्वायादिवादीर्घाद्देवानाꣳहृदयेभ्यइति ॥ अ
नुस्वारस्योपरिष्टात्संवृतंयत्रदृश्यते। दीर्घंतंतुविजानीयाच्छ्रोताग्रावा
णेतिनिदर्शनम् ॥ अनुस्वारस्योपरिष्टात्संयोगोयत्रदृश्यते ॥ ह्रस्वंतंतु
विजानीयात्सꣳस्थेतिनिदर्शनम् ॥ अनुस्वारश्चयोदीर्घादक्षराद्योभवे

त्परः॥सतुह्रस्वइतिज्ञेयोमंत्रेष्वेवविभाषया॥ ओभावश्चाविवृत्तिश्चशष
सारेफएवच॥ जिह्वामूलमुपध्माचगतिरष्टविधोष्मणः॥ यद्योभावप्र
संधानमुकारादिपरंपदम् ।स्वरांतंतादृशंविद्याद्यदन्यद्व्यक्तमूष्मणः॥
उभावादुत्थितश्चोष्मातांतुकेलिंविनिर्दिशेत्॥ विवृत्तंप्रातियाऊष्मावि
ज्ञेयाविकटानना॥लीढातिलीढविद्युच्चशषसेषुप्रकीर्तिताः॥ जिह्वामू
लेचरेफेचविज्ञेयाविठकाशठा॥ उपध्मानीयसहितांपुष्पिणींतांविनि
र्दिशेत्॥अन्यत्रयोभवेदूष्मासुलभांतांविनिर्दिशेत्॥ पादाद्यंतंपदाद्यंतं
तथावग्रहकालिकम्॥ ईषत्स्पृष्टंविजानीयात्तस्मिन्कालेतुकारयेत्॥

पादादौचपदादौचसंयोगावग्रहेषुच ॥ जःशब्दइतिविज्ञेयोयोन्यःसय इतिस्मृतः ॥ उपसर्गपरोयस्तुपदादिरपिदृश्यते ॥ ईषत्स्पृष्टंयथाविद्युत्पदच्छेदात्परंभवेत् ॥ त्वदर्थवाचिनौवोवांवावेयदिनिपातजौ॥आदेशश्चविकल्पार्थाईषत्स्पृष्टाइतिस्मृताः ॥ विभाषयायेकारःस्यात्तथानेतिपदात्परः॥भवतीत्यपिपूर्वैवतथाचसपदादपि ॥ यदेवलक्षणंयस्यवकारस्यापितद्भवेत् ॥ यत्रयत्रविशेषःस्यादिदानींससकथ्यते ॥ वकारस्त्रिविधःप्रोक्तोगुरुर्लघुर्लघूतरः ॥ आदौगुरुर्लघुर्मध्येपदांतेचलघूतरः ॥ यवर्णस्त्रिविधःप्रोक्तोगुरुर्लघुर्लघूतरः ॥ आदौगुरुर्लघुर्मध्ये

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

पदांतेतुलघूतरः ॥ उपांशुस्वरितंचैवयोधीतेवित्रसन्नपि ॥ अपिरूपस
हस्राणांसंदेहेषुप्रवर्तते॥पंचाविद्यांनगृह्णंतिजडास्तब्धाश्चयेनराः ॥अल
साश्चैवरोगाश्चयेषांचविस्मृतंमनः ॥ अहेरिवगणाद्भीतःसंमानान्नर
कादिव ॥ राक्षसीभ्यइवस्त्रीभ्यःसविद्यामधिगच्छति ॥ नभोजनवि
लंबीस्यान्नचनारीनिबंधनः ॥ सुदूरमपिविद्यार्थीव्रजेद्गरुडहंसवत् ॥
यथाखनन्खनित्रेणनरोवार्यधिगच्छति ॥ तथागुरुगतांविद्यांशुश्रूषुर
धिगच्छति ॥ सुखार्थीचेत्त्यजेद्विद्यांविद्यार्थीचेत्त्यजेत्सुखम् ॥ सुखि
नश्चकुतोविद्याविद्यासुखंविद्यार्थिनःकुतः ॥ गुणिताशतशोविद्यासहस्रावर्ति

तापुनः॥ आगमिष्यातिजिह्वाग्रेस्थलान्निम्नामिवोदकम् ॥ शतेनगुणिता विद्यासहस्त्रेणचातिष्ठति॥शतानांचसहस्त्रेणप्रत्यंचदवतिष्ठति ॥ जलमभ्यासयोगेनशिलायांकुरुतेक्षयम् ॥ कर्कशानांमृदुस्पर्शंकिमभ्यासान्नसाध्यते ॥ गुरुशुश्रूषयाविद्यापुष्कलेनधनेनवा ॥ अथवाविद्ययाविद्याचतुर्थंनोपलभ्यते ॥ शुश्रूषारहिताविद्याह्यल्पमेधागुणैः सह ॥ वंध्याचयौवनीतस्यानविद्याफलिनीभवेत् ॥ हयानामिवजात्यानामर्धमात्रार्द्धशायिनाम् ॥ नहिविद्यार्थिनांनिद्राचिरंनेत्रेषुतिष्ठति ॥ यथा पिपीलिकैःपांसुर्वल्मीकंक्रियतेमहत् ॥ नतत्रबलसामर्थ्यमुद्य

मस्तत्रकारणम् ॥ अंजनस्यक्षयंदृष्ट्वावल्मीकस्यतुसंचयम् ॥ अवं
ध्यंदिवसंकुर्याद्दानाध्ययनकर्मसु ॥ अत्रव्यंजनयोर्मार्गौतृतीयमुद
कस्यच ॥ वायोःसंचारणार्थायचतुर्थमुपकल्पयेत् ॥ हकारंपंचमैर्यु
क्तमंतस्थैश्चापिसंयुतम् ॥ औरसंतंविजानीयात्कंठ्यमाहुरसंयुतम् ॥
हकारोयत्रपूर्वस्थोअन्तस्थाद्योभवेत्परः ॥ पदकालेवियुज्येतसंहिता
यांसऔरसः ॥ मेघदुंदुभिनिर्घोषोज्ञायतेपयसोह्रदात् ॥ एवंनादंप्रयो
क्ष्यांसिंहस्यरुदितंयथा ॥ मासेभाद्रपदेमेघाःशब्दंकुर्वंतियादृशम् ॥
एवंगह्वरमासाद्यशुष्कंदुदुहेतिदर्शनम् ॥ शेषाणांवानरायुद्धमुत्पतांति

पतीतिच ॥ एवंवर्णाःप्रयोक्तव्याइहेहैषान्निदर्शनम् ॥ यथापुत्रवतीस्ने
हान्मुंचतेनिजमौरसम् ॥ एवंवर्णाःप्रयोक्तव्यायुआनेतिनिदर्शनम् ॥
दर्दुरोदरदेशौतुप्रफुल्लेतेपुनर्यथा ॥ एवंवर्णाःप्रयोक्तव्याअपांफेनेति
निदर्शनम् ॥ यथाभारभराक्रांतानिश्वसंतिनराभुवि ॥ एवंवर्णाःप्र
योक्तव्या अह्नःसंभूतइत्यपि ॥ कुक्कुटःकामलुब्धश्चककारद्वयमुच्चारे
त् ॥ एवंवर्णाःप्रयोक्तव्याःकुक्कुटोसीतिदर्शनम् ॥ वडवाश्चहयंदृष्ट्वा
योनिंविकुरुतेयथा॥ एवंवर्णाःप्रयोक्तव्याःसदुंदुभीतिनिदर्शनम् ॥ रंगे
चैवसमुत्पन्नेनोग्रसेत्पूर्वमक्षरम् ॥ स्वरंदीर्घंप्रयुंजीतपश्चान्नासिक्य

माचरेत् ॥ यथासौराष्ट्रिकानारीअराँइत्यभिभाषते ॥ एवंरंगःप्रवक्त
व्योङ्कारःपरिवर्जितः ॥ द्विमात्रिकोमात्रिकोवानासामूलंसमाश्रि
तः ॥ अंतेप्रयुंजतेरंगः पंचमैः सानुनासिकः ॥ यथासौराष्ट्रिकानारी
अराँइत्यभिभाषते ॥ एवंरंगंविजानीयान्ङ्कारपरिवर्जितम् ॥
अनंतरंमकारस्ययोरंगस्तत्ररंज्यते ॥ सर्वानुनासिकंविंद्यादेषाव
ध्योपधानिका ॥ यरलवशषसहरज्यतेचोपधानिका ॥ गर्वांतेरंग
तेयस्तुसर्वैःसर्वानुनासिका ॥ नासादुत्पद्यतेरंगःकांस्येनसमानिःस्व
नः ॥ मृदुश्चैवद्विमात्रःस्याद्दृष्टिमान्स्यान्निदर्शनम्॥यथाव्याघ्रीहरेत्पु

त्रान्दंष्ट्राभिर्नंचपीडयेत् ॥ भीतापतनभेदाभ्यांतद्वद्वर्णान्प्रयोजयेत्॥ मधुरंचनचाव्यक्तंव्यक्तंचापिनपीडितम् ॥ सनाथस्यैकदेशस्यनवर्णाः संकरंगताः ॥ यथासुमत्तनागेंद्रःपदात्पदंनिधापयेत्॥ एवंपदंपदाद्यंतं दर्शनीयंपृथक्पृथक्॥गीतीशीघ्रीशिरःकंपीयथालिखितपाठकः ॥अनर्थज्ञोल्पकंठश्चषडेतेपाठकाधमाः ॥ माधर्यंमक्षरव्याक्तिःपदच्छेदस्तुसुस्वरः ॥ धैर्यंलयसमत्वंचषडेतेपाठकागुणाः॥चतुरक्षरषट्कंचानिवर्तैतपुनःपुनः॥आवर्ततेपदंयच्चाद्विस्त्रिराम्रेडितंहितत् ॥ यथाधाम्नेधाम्नेतियजुषेयजुषेतिनिदर्शनम्॥हीयतेवर्धतेचापिपदंयत्रकृशोदरम् ।उपचारः

सविज्ञेयउभेसुश्चंद्रेतिनिदर्शनम् ॥ ॥ अथसप्तविधाःसंयोगपिंडाः ॥
अग्यःपिंडोदाहपिंडऊर्णापिंडोज्वालापिंडोमृत्पिंडोवायुपिंडोवज्रपिंड
श्चेति ॥ यमान्विद्यादयःपिंडान्सांतस्थंदाहपिंडवत् ॥ अंतस्थंयमवर्जं
तुऊर्णापिंडंविनिर्दिशेत् ॥१॥ अंतस्थंयमसंयोगेविशेषोनोपलक्ष्यते ॥
अशरीरंयमंविद्यादंतस्थंपिंडनायकम् ॥२॥ ज्वालापिंडान्सनासिक्या
न्सानुस्वारांस्तुमृन्मयान् ॥ सोपध्मावायुपिंडाश्चजिह्वामूलैस्तुवज्रिणः
॥३॥ अग्यःपिंडोनामयथा । अग्नीः । पक्तीः । मातरिश्वा । दाहपिंडो
नामयथा । अश्वः । सूर्यः । विभ्राजतीतिभवति । तत्रऊर्णापिंडोनाम

यथा । अस्मिन् । यस्मिन् । अमुष्मिन् । इतिभवति ॥ तत्रज्वालापिंडोनामयथा । ब्रह्मा । बाह्वः । गृह्णामीतिभवति । तत्रमूर्तिपिंडोनामयथा । संस्थाम् । संस्कर्त्तारः । संस्मर्तइति । तत्रवायुपिंडोनामयथा । देवसवितः । युञ्जानः प्रथमम् । प्राद्विः ककुत्सुर्मामितिभवति ॥ तत्रवज्रपिंडोनामयथा । इष्कृतिः निष्कृतिः ऋक्सामयोः । इतिभवति ॥ प्रथममेवणकारेण सकारेणैवसंयुतम् ॥ एतत्स्वरंसमासाद्यअग्निष्वात्तानिदर्शनम् ॥४॥ प्रथमेनठकारणथकारेणैवसंयुतम् ॥ एतत्स्वरंसमासाद्य अधिष्ठानानिदर्शनम् ॥५॥ प्रथममेवणकारेणनकारेणैवसंयुतम् ॥ एत

त्स्वरंसमासाद्यात्रिणवत्रयस्त्रिꣳशाविति निदर्शनम् ॥ ६ ॥ प्रथममेव
रंगेणनकारेणैवसंयुतम् ॥ एतद्रञ्जितमासाद्यवृष्टिमानितिनिदर्शनम्
॥७॥ एतेककारादयोमकारपर्यवसानाःकृष्णाव्याख्याताः । शनैश्चर
दैवत्याः । चत्वार्यंतस्थायरलवाःकपिलवर्णाःअग्निदैवत्याः । चत्वार्यू
ष्माणःशषसहा अरुणवर्णाः आदित्यदैवत्याः॥त्रयस्त्रिꣳशद्व्यंजनानि
स्पर्शाअंतस्थाऊष्माणश्चेति । चतुर्विधंकरणम् ॥ स्पृष्टमस्पृष्टंसंवृतं
विवृतंचेति ॥ संवृताघोषाविवृताअघोषाः । विꣳशतिर्घोषास्तेगजड
दबाघझढधभाङञणनमाःयरलवाश्चेति । त्रयोदशअघोषास्तेकचट

तपाःखछठथफाःशषसाश्चेति ॥ षड्विधमास्यप्रयत्नम् ॥ संवृतंविवृतमस्पृष्टंस्पृष्टमीषत्स्पृष्टंचार्धस्पृष्टंचेति ॥ तत्रअकारःसंवृतोज्ञेयइतरेविवृताःस्वराः ॥ सर्वेंचतेस्युरस्पृष्टाःस्पर्शाः स्पृष्टाभवन्तिहि ॥ ८ ॥ ईषत्स्पृष्टास्तथान्तस्थाऊष्माणोर्धस्पृशःस्वराः ॥ सामान्यंभजतेवर्णःसंस्थानकरणस्यहि ॥ ९ ॥ ऋलोर्मध्येभवत्यर्धमात्रारेफलकारयोः ॥ तस्मादस्पृष्टतानस्याद्ऌकारनिरूपणे ॥ १० ॥ वर्गाणांप्रथमाद्वितीयाःशषसहाश्चाघोषाघोषास्त्वन्येदशधावर्णाभवन्ति ॥अष्टौवर्णस्थानानिभवंति। उरःकंठ्यमूर्धन्यतालुदंत्योजिह्वामूलयमानुनासिक्याश्चेति॥

द्वौऔरस्यौ ह्न ह्यइति । अआआ ३ अवर्णहकाराविसर्जनीया इति त्रयःकंठ्याः । ऋषट्मूर्द्धन्याः टठडढणष इति । दशतालव्याः चछजझञयशइईई ३ इति । अष्टौदंत्याः तथदधनलॢलसाः । अष्टावोष्ठ्याः पफबभमाउऊऊ ३ वउपध्माचेत्यादयः । एकोदंतमूलीयोरेफः । जिह्वामूलीयाःपंच कुंखुंगुंघुंङुंइति । क्मख्मग्मघ्मकुंखुंगुंघुंइतियमाश्चत्वारः ॥ रुक्मेति प्रथमोज्ञेयः सक्थ्नेत्येवापरोभवेत् । तृतीयःसघ्नइत्याहुःउपध्मेतिचतुर्थकः ॥ ११ ॥ प्रथमौचौष्ठनासिक्यौद्वितीयःकंठ्यदंत्यश्चनासामूलमुपाश्रितः ॥ तृतीयःकंठ्यजिह्वा

ग्रेनासायामेवानिर्दिशेत् ॥ चतुर्थौहादिनासिक्यःकंठेचाभिहितायमाः
॥ १२ ॥ आपंचमैश्चैकपादःसंयुक्तंपंचमाक्षरम् ॥ उत्पद्यतेयमस्तत्र
सोऽङ्गपूर्वाक्षरस्याहि ॥ १३ ॥ पंचमाःशषसैर्युक्ताअन्तस्थैर्वापिसंयुताः
॥ यमास्तत्रनिवर्तंतेश्मशानादिवबांधवाः ॥ १४ ॥ ऋवर्णेतिपरे
सादावनुस्वारोद्विमात्रकः ॥ संयोगेपरभूतेतुह्रस्वएवोच्यतेबुधैः ॥
॥ १५ ॥ आद्यामात्रातुकण्ठ्यस्यएकारौकारयोर्भवेत् ॥ तालव्यस्य
तथौष्ठ्यस्याद्वितीयाचयथाक्रमम् ॥ १६ ॥ यादृशीरत्नवर्णाभाजपायाः
कुसुमेऽथवा ॥ तादृशंरञ्जयेद्वर्णंप्रान्तेनासिक्यमाचरेत् ॥ १७ ॥

लाक्षारक्तंयथातोयंनकारान्तंपदंतथा ॥ सर्वंरंगंविजानीयाच्छत्रूनि
तिनिदर्शनम् ॥ १८ ॥ लुप्तेनकारेयत्स्वारंरंजन्तिशौनकादयः ॥ आ
दिरैङ्गंविजानीयान्नचासीदिवाविन्दन्ति ॥ १९ ॥ प्रथमस्थषकारेण
तकारेणचसंयुतम् ॥ एतदक्षरमासाद्यात्रिष्टुभेतिनिदर्शनम् ॥ २० ॥
प्रथमस्थषकारेणथकारेणचसंयुतम् ॥ एतत्स्वरंसमासाद्याधिष्ठान
मितिनिदर्शनम् ॥ २१ ॥ चतुर्थंचतृतीयेनद्वितीयंप्रथमेनच ॥ आद्यं
मध्यंतथान्यञ्चस्वरूपेणाभिपीडयेत् ॥ २२ ॥ अवग्रहपदच्छेदउदात्तं
दृश्यतेयदि ॥ स्वरन्तंस्वरितंप्राहुःसंधौतुस्वार्यतेपरम् ॥ २३ ॥ स्वर

संधिविधानेननीचोच्चंतुविधीयते ॥ व्यंजनाद्वास्वराद्वापितत्सन्धौ
स्वरउच्यते ॥ २४ ॥ उदात्तान्निहितःस्वारःस्वरितात्प्रचयोभवेत् ॥
उदात्तात्स्वरितात्पूर्वौंनान्यआपद्यतेस्वरः ॥ २५ ॥ पदकालेयःस्वरि
तःसंहितायांतथैवच ॥ स्वरिताच्चेद्भवेत्पश्चात्सएवनिचितःस्वरः ॥
॥ २६ ॥ प्रथमाश्चतृतीयाःस्युपरेघोषवतिस्थिते ॥ पञ्चमाःपञ्चमे
पाठेद्वितीयाःशषसेषुच ॥ २७ ॥ उदात्तान्निहितःस्वार्यःस्वारोदात्तौ
नतत्परौ ॥ स्वरितोनस्तथाभूतोज्ञेयःसप्रचयःसदा ॥ २८ ॥ उच्चानु
दात्तयोर्योगेस्वरितःस्वारउच्यते ॥ ऐक्यंतत्प्रचयःप्रोक्तःसन्धिरेषां

मिथोऽद्भुतः ॥ २९ ॥ यह्वीजिह्वायथागृह्णात्यह्नोवह्निस्तथैवच ॥ ब्रह्म
रूपं विजानीयाद्रूपमेवात्मनःसदा ॥ ३० ॥ यत्किञ्चिद्वाङ्मयंलोकेस
र्वमत्रप्रतिष्ठितम् ॥ करोतितत्प्रदानंयत्तस्माद्ब्रह्ममयोगुरुः ॥ ३१ ॥
विधिनाप्यविधिनाज्ञानमविधानान्नलभ्यते ॥ अद्विधानपरोनित्यंप्रा
यश्चित्तीभवेन्नरः ॥ ३२ ॥ युक्तियुक्तंवचोग्राह्यंनग्राह्यंगुरुगौरवात् ॥
सर्वंशास्त्ररहस्यंतद्याज्ञवल्क्येनभाषितम् ॥ ३३ ॥ ह्रवर्णोतितत्परे
सादावनुस्वाराद्द्विमात्रकः । संयोगेपरभूतेतुह्रस्वएवोच्यतेबुधैः ॥
॥ इति श्रीयाज्ञवल्क्यशिक्षासमाप्ता ॥ ॥ ॥ ॥

श्रीगणेशाय नमः ॥ ॥ ॐ अथानुवाकान्वक्ष्यामिब्रह्मणानिर्मितान्पु
रा ॥ शिष्याणामुपदेशाययज्ञसंस्कारएवच ॥ विप्राणांयज्ञकालेषु
जपहोमार्चनादिषु ॥ १ ॥ ईषेत्वैकावसोःपवित्रेतिस्रोग्नेव्रतपतेसप्तप
वित्रेस्थोद्वेशर्मासि तिस्रोधृष्टिरसिशर्मासिद्विकौदेवस्यत्वातिस्रोदेव
स्यत्वापंचप्रत्युष्टंरक्षस्तिस्रोदशैकत्रिंशत् ॥ १० ॥ ३१ ॥ १ ॥
कृष्णोसिषडग्नेवाजजित्तिस्रोमयीदमग्नीषोमयोःपंचकावग्नेदब्धायो
तस्त्रःसंवर्चसापंचाग्नयेकव्यवाहनायषट्सप्तचतुस्त्रिंशत् ॥ ७ ॥
॥ ३४ ॥ २ ॥ समिधाग्निंभूर्भुवःस्वश्चतुष्कावग्निर्ज्योतिर्द्वैउपप्रयंतः

षड्विꣳशतिर्भूर्भुवःस्वश्चतस्रोगृहामातिस्रःप्रघासिनःपंच पूर्णादर्विंद्वे
ऽअक्षन्नमीमदन्तषडेषतेसप्तदशात्रिषष्टिः ॥ १० ॥६३ ॥ ३ ॥ एदंद्वेम
हीनांपयश्चतस्रआकूत्याक्वसामयोर्द्वेकौव्रतंकृणुतषडेषातेचतस्रोव
स्व्यासितिस्रएषतेद्वेशुक्रंत्वाचतस्रोदित्यास्त्वगष्टौदशसप्तत्रिꣳशत् ॥
॥ १० ॥ ३७ ॥ ४ ॥ अग्नेस्तनूरापतयेचतुष्कौतप्तायनीद्वेइन्द्रघोष
स्तिस्रोयुञ्जतेष्टौदेवस्यत्वाचतस्रोदेवस्यत्वापंचाविभूरसिचतस्रोज्यो
तिरसिषडुरुविष्णोतिस्रोदशात्रिचत्वारिꣳशत् ॥ १० ॥ ४३ ॥ ५ ॥
देवम्यत्वाषडुपावीरसिपंचमाहिःषट्संते (तिसंते) तिस्रःसमुद्रंगच्छ

हविष्मतीर्द्धिकौह्वदेत्वापंचदेवस्यत्वाष्टावष्टौँसप्तात्रिर्ठंशत् ॥ ८ ॥
॥३७॥६॥ वाचस्पतयऽउपयामगृहीतो।सित्रिकावावायोयंवाद्धिकौया
वामेकातंप्रत्नथा चतस्रोयंवेनोयेदेवासस्त्रिका।विन्द्रायमूर्द्धानंद्विकौय
स्तएकाप्राणाय तिस्रोमघवइन्द्राग्नीआगतमाघौमासश्चर्षणीधृतोवि
श्वेदेवासऽआगतेंद्रमरुत्वोमरुत्वंतं वृषभंमरुतांत्वौजसेसजोषाइंद्रम
रुत्वाँ२ ॥ इन्द्रमहँ२ ॥ इन्द्रोमहाँ२ ॥ इंद्रमेकैकोदुत्यमष्टौपं
चविर्ठंशतिरष्टाचत्वारिर्ठंशत् ॥ २५ ॥ ४८ ॥ ७ ॥ उपयामगृहीतो
सि ॥ आदित्येभ्यः पंचवाममद्यद्वेसुशर्मास्येकाबृहस्पतिसुतस्यद्देह

रिरसिचतस्रः सामिन्द्रणाष्टौमाहिरंजतुद्दशमास्यः पंचकावातियुक्ष्वा
हौंद्रमिदंकैकायस्मान्नद्वेऽग्नेपवस्वोत्तिष्ठन्नहश्रमुदुत्यमेकैकाजिघ्रद्वावि
मइन्द्रवाचस्पातिंविश्वकर्मन्नेकैकाग्नयेत्वाचतस्रइहरातिस्तितस्रःपरमेष्ठी
दशात्रयोविंशतिस्त्रिषष्टिः ॥ २३ ॥ ६३ ॥ ८ ॥ देवसवितश्च
तस्रइंद्रस्यवज्रः पंचदेवस्याहंदशापयोतिस्रोवाजस्येममष्टावाग्निरेका
क्षरेणैषतेचतुष्कौसवितद्वेअष्टौचत्वारिंशत् ॥ ८ ॥ ४० ॥ ९ ॥
अपोदेवाश्चतस्रः सोमस्यात्विषिःपंचावेष्टाः सप्तसोमस्यत्वाचतस्र
इन्द्रवज्रःपंचस्योनासिचतस्रः सवित्रेकाऽश्विभ्यांचतस्रोष्टौचतुस्त्रिं

शत् ॥ ८ ॥ ३४ ॥ १० ॥ युंजानएकादशप्रतूर्त्तꣳ षोडशदेवस्य
त्वादशापोदेवीर्द्वादशापोह्यैकादशादितिष्ट्वा पंचाकूतिमष्टादशसप्तत्र्य
शीतिः ॥ ७ ॥ ८३ ॥ ११ ॥ दृशानःसप्तदशादिवस्परिद्वादशस
मिधाग्निंपंचदशापेतसप्तदशाऽसुन्वन्तंत्रयोदशयाओषधीःसप्तविꣳश
तिर्मामाषोडशसप्तसप्तदशꣳशतम् ॥ ७ ॥ ११७ ॥ १२ ॥ मयिगृह्णा
तिपंचदशध्रुवासिमधुवाताएकादशकौ सम्यक्स्रवंतिनवेमंमाषड
षांत्वेकाऽयंपुरःपंचसप्तसाष्टापंचाशत् ॥ ७ ॥ ५८ ॥ १३ ॥ ध्रुवाक्षि
तिः षट्सजूर्ऋतुभिर्मूर्द्धावयोर्द्विकाविन्द्राग्नी आयुर्मेषट्कावाशुस्त्रि

वृदेकाऽग्नेर्भागोस्येकयाचतुष्कावष्टावेकत्रिꣳशत् ॥ ८ ॥ ३१ ॥ ॥ १४ ॥ अग्नेजातान्पंचराड्मिनासत्यायचतस्रोराड्यस्ययंपुरःपंचकावग्निर्मूर्द्धैकोनत्रिꣳशत् येनऋषयोष्टौतपश्चनवसप्तपंचषष्टिः ॥ ॥ ७ ॥ ६५ ॥ १५ ॥ नमस्तेषोडशाहिरण्यबाहवऽउष्णीषिणेतक्षभ्योज्येष्ठायपंचकाः स्तुत्याय चतस्रःशंभवायैकापायार्यपंचद्रापेअंधसोविꣳशतिर्नवषट्षष्टिः ॥ ९ ॥ ६६ ॥ १६ ॥ अश्मन्नूर्जंदृशनमस्तेपंचाग्निस्तिग्मेननवचक्षुषः ।पिताष्टावाशुः शिशानः सप्तदशोदेनंक्रमध्वमग्निना पंचदशकौशुक्रज्योतिः सप्तमꣳस्तनंत्र

योदशनवैकोनशतम् ॥ ९ ॥ ९९ ॥ १७ ॥ वाजः सप्तमूर्क्कंचतुष्काअ
श्माग्निस्त्रिकावꣳशुः पंचैकाचतस्रोवाजायद्द्वेवाजस्यत्वष्टावृताषाट्त्र
योदशाग्निंयुनज्मिसप्तयदाकूताद्वार्त्रंहत्यायदशकौ त्रयोदशसप्तसप्त
तिः ॥ १३ ॥ ७७ ॥ १८ ॥ स्वाद्वींत्वैकादशदेवायज्ञंविꣳशतिःसुरावं
तꣳसप्तदशोदीरतां त्रयोदशाच्याजानुर्दशसोमोराजाष्टौसीसेनतंत्रꣳ
षोडशसप्तपंचनवतिः ॥ ७ ॥ ९५ ॥ १९ ॥ क्षत्रस्ययोनिस्त्रयोदशय
द्देवादशाभ्यादधाम्यष्टौयाभूतानांचतस्रः समिद्धइंद्रएकादशायात्व
ष्टौसमिद्धोअग्निर्द्वादशाश्विनाहविस्त्रयोदशाश्विनातेजसैकादशनवनव

ति: ॥ ९ ॥ १० ॥ २० ॥ इमम्मेसमिद्धोअग्निरेकादशकोवसन्तेन
ऋतुनाषड्होतायक्षत्समिधाग्निर्द्वादशाऽश्विनौ छागस्यसप्त देवंबर्हि
श्चतुर्दश षडेकपाङ्क्तिः ॥ ६ ॥ ६१ ॥ २१ ॥ तेजोसिपंचाग्नेय
एकाहिंकारायद्वेतत्सवितुर्दश विभूर्मात्रैकाकायद्वेआब्रह्मंस्त्रयोदश
शेषादेकैकोनाविंशतिश्चतुस्त्रिंशत् ॥ १९ ॥ ३४ ॥ २२ ॥ हिरण्य
गर्भायःप्रणतोद्वेकौयुंजंत्यष्टौवायुर्द्वापंचप्राणायतिस्र उत्सक्थाद्वाद
शगायत्रीकस्त्वाषट्कौकःस्विदष्टौकास्विद्दशसुभूःस्वयम्भूस्तिस्र एका
दशपंचपाङ्क्तिः ॥ ११ ॥ ६५ ॥ २३ ॥ अश्वस्तूपरोधूम्रान्वसंताय

समुद्रायशिशुमारान्मयुःप्राजापत्योदशकाश्चत्वारश्चत्वारिꣳशत् ॥
॥ ४ ॥ ४० ॥ २४ ॥ शादैद्धिर्नवैकैकाहिरण्यगर्भश्चतस्रआनो
दशमानोमित्रोयदश्वस्याष्टकौयत्तेषाडिमानुकंद्रेपंचदशसप्तचत्वारिꣳ
शत् ॥ १५ ॥ ४७ ॥ २५ ॥ अग्निश्चपंचदशोच्चातएकादशकौ
षड्विꣳशतिः ॥ २ ॥ २६ ॥ २६ ॥ समास्त्वादशोर्द्धौअस्यपीवो
अन्नाद्वादशकावभित्वैकादशचत्वारःपंचचत्वारिꣳशत् ॥ ४ ॥ ४५ ॥
॥ २७ ॥ होतायक्षदेकादशदेवंबर्हिर्द्वादशपुनरप्येवंचत्वारःषट्चत्वा
रिꣳशत् ॥ ४ ॥ ४६ ॥ २८ ॥ समिद्धोअंजन्नेकादशयदक्रंदस्त्रयो

दशसमिद्धोअग्रद्वादशकेतुंकृण्वंश्चतुर्विंꣳशतिश्चत्वारःषष्टिः ॥ ४ ॥
॥ ६० ॥ २९ ॥ देवसवितःषट्तपसेकौलालꣳषोडशद्वौद्वाविꣳशतिः॥
॥ २ ॥२२॥ ३० ॥ सहस्रशीर्षाषोडशाद्भ्यःसंभृतःषट्द्वौद्वाविꣳशतिः ॥
॥ २ ॥ २२ ॥ ३१ ॥ तदेवसप्तवेनस्तन्नवद्वौषोडश ॥ २ ॥ १६ ॥
॥ ३२ ॥ अस्याजरासःसप्तदशापाश्विद्वादश विभ्राट्चतुर्दशप्रवावृज
एकादशप्रवायुप्रवीरयापंचदशकावानस्त्रयोदशसप्तसप्तनवतिः ॥ ७ ॥
॥ ९७ ॥ ३३ ॥ यज्जाग्रतःपंचनद्यःसोमोधेनुमाकृष्णेनपूषंतव्रद
शकानतदष्टौषडष्टापंचाशत् ॥ ६ ॥ ५८ ॥ ३४ ॥ अपेतोद

शाद्यंद्वादशद्वौद्वाविꣳशतिः ॥ २ ॥ २२ ॥ ३५ ॥ ऋचंवाचꣳषोडश
द्यौःशांतिरष्टौद्वौचतुर्विꣳशतिः ॥ २ ॥ २४ ॥ ३६ ॥ देवस्यत्वादशाय
मायत्वैकादशद्वावेकविꣳशतिः ॥ २ ॥ २१ ॥ ३७ ॥ देवस्यत्वाष्टौ
यमायत्वाक्षत्रस्यत्वादशकौत्रयोष्टाविꣳशतिः ॥ ३ ॥ २८ ॥ ३८ ॥
स्वाहाप्राणेभ्यःषडुग्रश्चसप्तद्वौत्रयोदश ॥ २ ॥ १३ ॥ ३९ ॥ ईशा
वास्यमष्टावंधंतमोनवद्वौसप्तदश ॥ २ ॥ १७ ॥ ४० ॥ ॥ दशा
ध्यायेसमाख्याताअनुवाकास्तुसंख्यया ॥ शतंदशानुवाकश्चनवा
न्येचमनीषिभिः ॥ १ ॥ सप्तषष्टिरग्नौज्ञेयासौक्तेद्वार्विंशतिस्तथा ॥

अश्वएकोनपंचाशत्पंचत्रिंशात्विलेस्मृताः ॥ २ ॥ शुक्रियेषुतुविज्ञेयाएकादशमनीषिभिः ॥ एकीकृत्यसमाख्यातंत्रिशतंत्वधिकंमतम् ॥ ३ ॥ इत्यनुवाकसूत्राध्यायः समाप्तः ॥ ॥ ॥ ॥

श्रीगणेशायनमः ॥ मंडलंदाक्षिणमाक्षिहृदयंचाधिष्ठितंयेनशुक्लानियजूꣳषिभगवान्याज्ञवल्क्योयतः प्रापतंविवस्वंतंत्रयीमयमर्चिष्मंतमभिध्यायमाध्यंदिनीयेवाजसनेयके यजुर्वेदाम्नायेसर्वे सखिलेसशुक्रियऋषिदैवतच्छंदाꣳस्यनुक्रमिष्यामोयजुषामनियताक्षरत्वादेकेषां छंदोनविद्यते द्रष्टारऋषयःस्मर्तारः परमेष्ठ्यादयोदेवतामंत्रांतर्भूता

ग्न्यादिकाहविर्भाजःस्तुतिभाजोवानःशाखोखाशम्योपवेशकपालेध्मोलूखलादयश्चप्रतिमाभूताश्छंदांसिगायत्र्यादीन्येतान्यविदित्वायोधीतेनुब्रूतेजपतिजुहोतियजतेयाजयतेतस्य ब्रह्मनिर्वीर्यं यातयामंभवत्यथांतराश्वगर्त्तंवापद्यते स्थाणुंवर्छतिप्रमीयतेवापापीयान्भवत्यथविज्ञायैतानियोधीतेतस्यवीर्यवदथयोर्थवित्तस्यवीर्यवत्तरं भवतिजपित्वाहुत्वेष्ट्वातत्फलेनयुज्यते ॥ १ ॥ इषेत्वादिखंब्रह्मांतंविवस्वानपश्यततः प्रतिकर्मविभागेनब्राह्मणानुसारेणऋषयोवेदितव्याःपरमेष्ठीप्राजापत्योदर्शपूर्णमासमंत्राणामृषिर्देवावाप्राजापत्याइषेत्वाशाखानु-

ष्टुब्विनियोगः कल्पकारोक्तएवमूर्ज्जैंत्वावायवोवायव्यंदेवोवऐंद्रंयज
मानस्यशाखावसोर्वायव्यंद्यौर्मातारिश्वनउखावसोर्वायव्यंदेवस्त्वाप
यःकामधुक्षप्रश्नःसाविश्वायुस्त्रीणिगव्यानींद्रस्यैंद्रंविष्णोपयः ॥ २ ॥
योअग्नइद्दमाग्नेये ॥ कस्त्वाप्राजापत्यंकर्मणेस्त्रुक्शूर्पंप्रत्युष्टंद्धेराक्षसे
उरुब्रह्मरक्षोघ्नठंसर्वत्रधूरसिधूर्दैवानां विष्णुस्त्वानऽउरुहविष्याऽअप
हतठंरक्षोयच्छंताठंहविष्यादेवस्यत्वासावित्रठंसर्वत्राग्नयेलिंगोक्तेभू
तायत्वाहविःस्वःसूर्यौंद्दठंहंतांगृहाःपृथिव्यास्त्वाहव्यंपावित्रेलिंगोक्त
ठंसावितुर्दैवीः ॥ प्रोक्षिताआपान्यग्नयेलिंगोक्तेदैव्यायपात्राणि ॥ ३ ॥

शर्मास्यदित्याः कृष्णाजिनमवधूतꣳराक्षसमद्रिर्ग्रावोलूखलेअग्नेर्हविर्बृहत्सइमम्मौसलेहविष्कृदाधिदैवतंवागधियज्ञंपत्नीकुक्कुटोवाग्वर्षवृद्धꣳशूर्पंप्रतित्वाहविःपरापूतमपहतꣳराक्षसेवायुर्वोदेवोवस्तंडुलाधृष्टिरूपवेषोपाग्नआदेवजयमाग्नेयेध्रुवमसिषण्णां कपालान्यग्नेब्रह्माग्नेयंधिषणासिदार्षदंदिवःशम्याधिषणौपलंधान्यमसिषण्णाꣳहविर्मंहीनामाज्यम् ॥ ४ ॥ संव्वपामिहविःसमाप आपंजनयत्त्यैत्वेदꣳहविरिषेत्वाज्यꣳधर्मोंसिषण्णांपुरोडाशस्त्रितायत्रयाणांत्रितोद्धितएकतःक्रमेणाददइंद्रस्यस्फ्यः पृथिविवेदिर्व्रजंपुरीषंवर्षतुवेदिर्बंधानसावित्रम

पाररुमररोआसुरेंद्रप्सरस्तेवेदिर्गायत्रेणत्रीणि वैष्णवानिसूक्ष्मात्रया
णांवेदिः पुराघशर्ठंसांपङ्क्त्यच्चांद्रमसीत्रिष्टुभंप्रोक्षणीः प्रैषोद्विषतःआ
भिचारिकमनिशितःस्रुवोनिशितास्रुगादित्यैविष्णोर्यौक्रमूर्जें त्रयाणा
माज्यठंसवितुरापंतेजोसिधामाज्यम् ॥ ५ ॥ कृष्णोसीध्मोवेदिर्बर्हि
र्लिंगोक्ते ॥ आदित्याआपंविष्णोःप्रास्तरमूर्णम्रदसंवेदिर्भुवपतयेत्री
ण्याग्नेयानिगन्धर्वस्त्रयाणांपरिधयोवीतिहोत्रंविश्वावसुराग्नेयी गायत्री
ठंसमिदाग्नेयठंसूर्यस्त्वालिंगोक्तठंसवितुर्विधृती ऊर्णं म्रदसमात्वा
प्रास्तरंघृताच्यासित्रयाणांजुहूपभृद्ध्रुवाःक्रमेणाग्नेयेणहविर्ध्रुवा असद

स्पाहि मांवैष्णवे अग्नेवाजजिदाग्नेयं नमोदैवꣳस्वधापित्र्यꣳसूयमेसु
चावंघ्रिणावैष्णवं वसुमतीमाग्नेयमितऐंद्रꣳसंज्योतिषाज्यंमयीदमा
शीःप्रतिग्रहणमुपहूताद्यावापृथिव्यम् ॥६॥ ब्रह्मत्वंप्रतिष्ठांतम् ॥ बृह
स्पतिरांगिरसोपश्यदग्रेष्ठाप्राशित्रमेतंतेवैश्वदेवमेषातेनुष्टुबाग्नेय्यग्ने
वाजजिदाग्नेयमग्नीषोमयोश्चत्वारिलिंगोक्तानिवसुभ्यस्त्रयाणांपरिध
यःसंजानाथाव्यंतुप्रास्तरेमरुतांकपिर्बृहतींप्रास्तरीमंत्यः पाद आग्ने
योयंपरिधिंदेवल आग्नेयींत्रिष्टुभंविराड्रूपांचयजुरंतामग्नेःप्रियंयजुः
सर्वꣳस्त्रवभागाःसोमसुक्ष्मोवैश्वदेवींत्रिष्टुभंयजुरंताꣳस्वाहावाज्यजुघृं

ताचीस्रुचौयज्ञनमः शूर्पंयवमान्कृपिरुद्धालवाँधानांतवाँनितिपंचार्षं
योयज्ञोदेवताग्नेदब्धायोगार्हपत्योग्नये दक्षिणाग्निः सरस्वत्यैलिँङ्गोक्तं
वेदोसिवेदोदेवामनसस्पतिर्वातदेवत्यां विराजꣳसंबर्हिर्लिँगोक्तात्रिष्ट
ब्विराड्रूपाकस्त्वाप्राजापत्यꣳरक्षसार्ꣳराक्षसम् ॥ ७ ॥ अथयाजमा
नꣳसंवर्च्चसात्वाष्ट्रीत्रिष्टुब्दिविविष्णुस्त्रीणि वैष्णवान्यस्माद्भागोस्यैभू
मिरगन्मदैवꣳसंज्योतिषाहवनीयःस्वयंभूःसूर्यस्यसौरेअग्नेगृहपतेगा
र्हपत्यः सूर्य्यस्यसौरमग्नइदमाग्नये ॥ ८ ॥ पितृयज्ञःप्रजापतेरार्षम
ग्नयेसोमायद्धदैवेस्वाहाकारश्रुतेरपहता असुरायेरूपाणिकव्यवाहनो

ग्निस्त्रिष्टुबत्रामीमदंतपित्र्यैनमोवः षड्लिंगोक्तानिपरेपित्र्येआधत्त
पित्र्यागायत्र्यूर्जमापिविराट्॥९॥अग्न्याधेयंप्रजापतेरार्षम् ॥ देवाना
मग्नेर्गंधर्वाणांवासमिधाग्नेठ्यश्चतस्रोगायत्र्यः समिधाविरूपआंगि
रसः सुसमिद्धायवसुश्रुतस्तंत्वाभरद्वाजोभूर्भुवः स्वस्तिस्रोमहाव्या
हृतयोग्निवायुसूर्यदेवत्याः क्रमेणद्यौरिवयजमानाशीर्लिंगोक्तदेवता
यंगौः सार्पराज्ञ्यस्तृचोगायत्र्योग्निःपरावररूपेणदेवता ॥ १० ॥
अग्निहोत्रंप्रजापतेरार्षमाग्निर्ज्योतिः ॥ सप्तलिंगोक्तदेवतागायत्र्यआ
द्याः पंचैकपदाअग्निर्वर्च्चोद्धेतक्षापश्यत्परांजीवलश्चैलकिः ॥ ११ ॥

यजमानाग्न्युपस्थानंबृहद्देवानामार्षम् ॥ उपप्रयंतइत्यनुवाकआद्ये द्वेआग्नेय्यौगायत्र्यावुपवत्यागोतमाराहूगणोमूर्द्धन्वत्याविरूपउभा वांभरद्वाजऐंद्राग्नींत्रिष्टुभंयंतेदेवश्रवादेववातश्च भारतावाग्नेयीमनुष्टुभमयमिह वामदेवोजगतीमस्यप्रत्नामवत्सारोगव्यांवाग्नेयींवापयांदेवत्यांवागायत्रीं तनूपाआग्नेयानींधानाआग्नेयींमहापंक्तिस्त्र्यवसाना ॥ १२ ॥ चित्रावसोरात्रिदेवत्यमृषयोपश्यन्तसंत्वमाग्नेयमंधस्थरेवतीः सꣳहितेतित्रीणिगव्यान्युपत्वाग्नेयंतृचंगायत्रंमधुछंदावैश्वामित्रोग्नेत्वंचतस्रोद्विपदा आग्नेयीर्बंधुःसुबंधुःश्रुतबंधुर्विप्रबन्धुरे

कैकशइडेकाम्यागव्येसोमानंब्रह्मणस्पत्यंतृचंगायत्रंब्रह्मणस्पतिमैधा
तिथिर्वामहित्रीणाꣳसत्यधृतिवारुणिरादित्यदैवतं तृचंगायत्रंपाथि
स्वस्त्ययनं कदाचनैंद्रींपथ्याबृहतींमधुच्छंदास्तत्सवितुर्विश्वामित्रः
सावित्रींगायत्रींपरितेवामदेवआग्नेयींमानिरुक्तांगायत्रीम् ॥ १३ ॥
क्षुल्लकोपस्थानमासुरेरार्षम् ॥ भूर्भुवःस्वःप्रवत्स्यदुपस्थानमागतोप
स्थानंचादित्यस्यार्षंनर्यंगार्हपत्यः शꣳस्याहवनीयोथर्वंदक्षिणाग्नि
रागन्माहवनीयोनुष्टुब्वयमाग्निन्यैंकुसारिणीबृहतीगार्हपत्योयमाग्निर
न्वाहार्यपचनोनुष्टुब्गृहामात्रिष्टुब्विराड्रूपायेग्मषानुष्टुबुपहूतामहा

पंक्तिस्त्र्यवसानास्तिस्त्रोपिवास्तवीःशंयुर्बार्हस्पत्यः ॥ १४ ॥ चातुर्मा
स्यानिप्रजापतेरार्षम् ॥ प्रघासिनोमारुतीगायत्रीयद्ग्राममारुत्यनुष्टु
बनिरुक्तामोषुणोगस्त्यऐंद्रामारुतीं विराजमकंनानिरक्ताग्नेय्यनुष्टब
वभृथयज्ञदैवतं पूर्णादर्विद्वे और्णवाभऐंद्र्यावनुष्टुभावक्षंद्वेगोतमऐं
द्र्यौपंक्तीमनोनुमानसंतृचंबंधुर्गायत्रंवयर्ठंसौमीं गायत्रीबंधुरेषतेद्वे
रौद्रेअवरुद्रठंरौद्र्यावेकापंक्तिरपराककुब्त्र्यंबकंद्वेअनुष्टुभौपूर्वस्यां
वासिष्ठएतदास्तारपंक्तिस्त्र्यायुषंनारायणउष्णिहंयजमानाशीर्षठंशिवो
नामक्षौरंनिवर्तयामिलिंगोक्तदैवतमाशीःप्रायम् ॥ १५ ॥ अग्नि

ष्टोमःप्रजापतेरार्षम् ॥ एदंद्वे अत्यष्टीत्यवसाने आद्यावर्द्धर्चौदेवयज
नदेवत्याविमाआपओषधेकुशतरुणꣳस्वधिते क्षौरमापोऽअस्मानापं
दीक्षातपसोर्वासोमहीनां नवनीतं वृत्रस्यांजनंचित्पतिर्द्वेप्राजापत्ये
देवोमासावित्रमावोदैव्यनुष्टुबासीस्वाहायज्ञं चतुर्णांयज्ञआकूत्यैच
तुर्णांमौद्गृभ्णानामाग्निरापोदेवीर्लिंगोक्तदेवताविराट् ॥ १६ ॥ विश्वो
देवस्यस्वस्त्यात्रेयः ॥ सावित्रीमनुष्टुभमृक्सामयोःकृष्णाजिनेश
र्मासिकृष्णाजिनमूर्गस्यां गिरोभिर्दृष्टंमेखलꣳसोमस्य नीविर्विष्णोर्वा
सइंद्रस्य सुसस्याःकृष्णाविषाणोच्छ्रयस्वदंडोव्रतं यज्ञोदैवीर्धीयैदेवा

वाक्प्राणोदानौचक्षुःश्रोत्रमध्यात्ममग्निर्मित्रावरुणावादित्योविश्वेदे
वाअधिदैवतꣳश्वात्राअपोजगतीयंतेलोष्टमपोमूत्रंपृथिव्या लोष्टमग्ने
त्वमाग्नेय्यनुष्टुप्पुनर्मनआग्नेयंत्वमग्नेवत्सआग्नेयीं गायत्रीꣳरास्वेय
त्सौम्यमेषातेहिरण्याज्यदैवतंजूरसिवाग्दैवतꣳशुक्रमासिहिरण्यंचिद
सिगौःसोमक्रयणीवाग्रूपाध्यारोपकल्पनया ॥ १७ ॥ वस्व्यस्यनुष्टुप्
बृहतीवासोमक्रयण्यास्तुतिरदित्याआज्यमस्मेषण्णां लिंगोक्तादेव
ताःसमख्येपत्न्याशीरास्तापंक्तिरेषतेलिंगोक्तदेवतमास्माकोसिसौ
म्यमभित्यꣳसावित्र्यष्टिःप्रजाभ्यस्त्वाप्रजास्त्वाशुक्रंत्वासौम्यानिस

ग्मेस्मेलिंगोक्तेतपसोद्वैंजाद्वैंसोमोमित्रोनइंद्रस्यसौम्येस्वानादीनि धिष्ण्यनामानिपरिमाग्नेयीपुरस्ताद्बृहतीप्रतिपन्थामनुष्टुप्पथिदेवत्या दित्याःकृष्णाजिनमादित्यैसौम्यमस्तभ्नात्रिष्टुभौ वारुण्यौ सूर्यस्या नुष्टुप्कृष्णाजिनमुस्रावूर्ध्वंबृहत्यानडुहीभद्रोमेसौम्यनमोमित्रस्या भितपनःसूर्यःसौरींजगतींवरुणस्यपंचवारुणानियातेसौमींत्रिष्टुभंगौ तमः ॥ १८ ॥ अग्नेस्तनुरसिपंचवैष्णवान्यग्नेःशकलंवृषणादर्भंतरुणैकेउर्वंश्यसित्रयाणांलिंगोक्तादेवतागायत्रेणत्रीण्याग्नेयानिभवतंनः पंक्तीरग्नावग्निर्विराडेतयोर्निर्मंथ्याहवनीयावग्नीदेवतेआपतयेवायव्य

मनाधृष्टमाज्यमग्नेव्रतपाआग्नेयमꣳशूरꣳशुःप्रकृतिश्चतुरवसानासौ
म्यंत्योर्द्धंचौलिंगोक्तदैवतोयातेत्रीण्याग्नेयानितप्तायनीचत्वारिपार्थि
वानिविदेदाग्नेयमग्नेअंगिरोयोस्यामनुत्वालिंगोक्तानिसिꣳह्यासित्रया
णांवेदिरिंद्रघोषश्चतुर्णामुत्तरवेदिरिदमहमापꣳ सिꣳह्यासि पंचानां
वाग्भूतेभ्यःस्रुग्ध्रुवोसिपरिधयस्त्रयाणामग्नेःसंभारागुल्गुल्वादयः ॥
॥ १९ ॥ युजतेश्यावाश्वः ॥ सावित्रींजगतीमिदंविष्णुर्मेधातिथिर्वै
ष्णवींगायत्रींमिरावतीवासिष्ठास्त्रिष्टुभंदेवश्रुतावक्षधुरौ प्राचीस्वंगोष्ठम
न्त्रहविर्द्धानेविष्णोर्नुतिस्रोवैष्णव्यास्त्रिष्टुभआद्येद्वेयजुरंतेविष्णोर्नुप्रत

दीर्घतमाऔतथ्यो विष्णोरराटंपंचवैष्णवान्याददेभ्रिरिदमहꣳरक्षो
घ्नंबृहन्नौपर्वाणीदमहंपंचालिंगोक्तानिस्वराडस्यौपर्वाणिचत्वारिरक्षोह
णोवःसप्तवैष्णवानियवोसियवोदिवेत्वौदुंबरीशुधंतांपित्र्येउद्दिवंपंचा
नामौदुंबरिघृतेनद्यावापृथिव्यामिंद्रस्यैंद्रंपरित्वामधुच्छंदाअनिरुक्ता
मैंद्रीमनुष्टुभमिंदस्यैंद्राणित्रीणिचतुर्थंवैश्वदेवम् ॥ २० ॥ विभूरस्य
ष्टानांधिष्ण्याअग्नयः ॥ सम्राडाहवनीयःपरिषद्योबाहिष्पवमानदेशो
नभोसिचात्वालोमृष्टोसिशामित्रऋतधामौदुंबरीसमुद्रोसिब्रह्मासन
मजोसिशालाद्वार्यौंहिरसिप्राजहितोवागसिसदऋतस्यद्वार्यैअध्वना

ꣳसूर्योमित्रस्यर्त्विजोग्नयोधिष्ण्याः ॥ २१ ॥ ज्योतिरसिवैश्वदेवम् ॥
त्वꣳसोमक्रतुर्भार्गवःसौमींगायत्रीमनवस्रानांजुषाणो अप्तुर्देवत्यैक
पदाविराड्यजुरंताग्नेनयागस्त्य आग्नेयींत्रिष्टुभमयन्नास्त्रिष्टुब्यजुरंता
ग्नेष्ट्युरुविष्णोवैष्णव्यनुष्टुब्यजुरंतादेवसवितः सावित्रमेतत्त्व ꣳ सौ
म्यꣳस्वाहाग्निर्लिंगोक्तदेवतामग्नेव्रतपाआग्नेयमत्यन्यान्वनस्पतिरोष
धेकुशतरुणꣳस्वधितेपरशुर्द्यांमातस्त्वंवनस्पतिः ॥ २२ ॥ अग्रेणीःश
कलम् ॥ देवस्त्वायूपःसुपिप्पलाभ्यश्ववालंद्यामग्रेणस्पृषोयातेदीर्घंत
मायूपदेवत्यांत्रिष्टुभंब्रह्मवनिब्रह्मदृ ꣳ ह्यूपदेवत्येविष्णोःकर्माणिद्व

मेधातिथिर्वैष्णव्यौगायत्र्यौपरिवीर्यूपोदिवस्वरुरेषतेयूपउपावीस्तृण
मुपदेवांल्लिंगोक्तमृतस्यत्वापशुरग्नीषोमाभ्यांलिंगोक्तमद्भ्योपांपशुरापो
देवीरापꣳसंतेपशुर्घृतेनस्वरुशासौरेवतीवाग्वर्षौतृणꣳस्वाहा दैवे ॥
॥ २३ ॥ माहिर्भूरज्जुर्नमस्तेयज्ञोदेवीरापोर्द्धमापमर्द्धमाशीर्वाचंतेमन
स्तेपशुः शंलिंगोक्तमोषधेतृणꣳस्वधितेसीरक्षसांलिंगोक्तंनिरस्तमिद
महꣳरक्षोहणीघृतेनद्यावापृथिव्यंवायोवायव्यमाग्निराज्यस्याग्नेयꣳ
स्वाहा कृतेवपाश्रपण्याविदमाप आपीमहापंक्तिस्त्र्यवसानापावमान
श्वांत्यःपादःसंतेहृदयꣳरेडासिवसाप्रयुतंलिंगोक्तंघृतंवैश्वदेवंदिशःपंच

दिङ्यान्यैंद्रः प्राणः पश्वंगः प्राणदानंलिंगोक्तंदेवत्वाष्ट्रीत्रिष्टुप् ॥ २४ ॥
समुद्रंलिंगोक्तानिद्वादश ॥ दिवंतेस्वरुर्मापोहृद्द्यशूलंधाम्नोधाम्नोवा
रुणंयदाहुर्वारुणीगायत्र्यनवसानासुमित्रियानआपठं हविष्मती
र्लिंगोक्तदेवतानुष्टुबग्नेर्वैश्वत्वार्यांपात्न्यमूरापागायत्रींमेधातिथिहृदेत्वा
सौम्यनुष्टुप्सोमराजन्त्सौम्येशृणोतुलिंगोक्तदेवतात्रिष्टुब्देवीरापऽआ
पीपंक्तिःकार्षिराज्यमनुष्टुप्समुद्रस्यसमापआपेठ्यमग्नेमधुच्छंदाआग्ने
यींगायत्रीमादद्देग्रावानिग्राभ्याआपीमिंद्रायत्वापंचसौम्यानियत्तेसौ
मीविपरीताबृहतीश्वात्राःपथ्याबृहतीमाभेःसौम्यमर्द्धंद्यावापृथिव्यम

छँप्रागपाकसौम्युषिणक्त्वमंगगोतमऐंद्रींपथ्याबृहतीम्॥२५॥वाचस्पतयेप्राणदेवत्याविराट् ॥ मधुमतीर्लिंगोक्तं यत्तेसौम्यꣳस्वाहोरुयजुषीर्लिंगोक्तेस्वांकृतोस्युपाꣳशुर्देवेभ्यस्त्वादेवंदेवाꣳशोर्लिंगोक्तमाभिचारिकं प्राणायाग्रहोव्यानायउपाꣳशुसवनउपयामगृहीतोस्यंतरैंद्रमंतस्तेमघवदेवत्यात्रिष्टुबुदानायगृहआवायोवासिष्ठोवायव्यांत्रिष्टुभमिंद्रवायूमधुच्छंदाऐंद्रवायवींगायत्रींमयंवांगृत्समदो मैत्रावारुणीꣳरायावयंत्रसदस्युस्त्रिष्टुभंयावांमेधातिथिराश्विनींगायत्रींतंप्रत्नथावत्सारःकाश्यपोवैश्वदेवींजगतीमच्छिन्नस्य सौम्यꣳसाप्रथमैंद्रीत्रिष्टुप्तृपं

त्वयाऽग्नीलिंगोक्ते ॥२६॥ अयंवेनोवेनस्यात्रिष्टुप्सोमस्तुतिराधिदैवत
मधियज्ञंचमनोनात्रिष्टुप्सोमस्तुतिराधियज्ञानुवादिन्यपमृष्टःशंडोपमृ
ष्टोमर्कआभिचारिकेदेवास्त्वाशुक्रामंथिनावनाधृष्टाऽसिदक्षिणोत्तरवेदि
श्रोण्यौसुवीरःसुप्रजाःशुक्रामंथिनौनिरस्तोद्वेआभिचारिकेशुक्रस्यमं
थिनःशकलंयेदेवासःपरुच्छेपोवैश्वदेवींत्रिष्टुभमाग्रयणोसिलिंगोक्तदै
वतम् ॥२७॥ सोमःपवतेवैश्वदेवामिंद्रायत्वापंचलिंगोक्तामूर्द्धानंभर
द्वाजोवैश्वानरींत्रिष्टुभंध्रुवोसिध्रुवोध्रुवंध्रुवेणबृहतीपूर्वार्द्धंचाध्रौवउत्तर
ऐंद्रोयस्तेदेवश्रवाःसौमींत्रिष्टुभंयजुरंतांदेवानांचात्वालदैवतंप्राणाय

मोलिंगोक्तदेवतान्यैकादशकौसिप्राजापत्योष्णिग्वर्द्धमानानामथवेत्वा
लिंगोक्तदेवतानित्रयोदश ॥ २८ ॥ इंद्राग्नीविश्वामित्रऐंद्राग्नींगायत्री
माद्यन्त्रिशोकआग्नैंद्रीमोमासोमधुच्छंदावैश्वदेवींविश्वेदेवासोगृत्समद
इंद्रमरुत्वश्वतस्त्रोविश्वामित्रऐन्द्रामारुतीस्त्रिष्टुभोमरुतांत्वायजुर्मरु
त्वतीयंमहाम् ॥ इंद्रोभरद्वाजोमाहेंद्रीत्रिष्टुभंयओजसावत्सोगायत्री
मुदुत्यंप्रस्कण्वःसौरींगायत्रींचित्रंकुत्सआंगिरसस्त्रिष्टुभंऽरूपेणवोद
क्षिणाश्चतुर्णांब्राह्मणमद्यलिंगोक्तदेवतान्यष्टौ ॥ २९ ॥ विष्णोर्वैष्णवं
कदाचनादित्यदेवत्येबृहत्यौयज्ञोदेवानांकुत्सस्त्रिष्टुभंविवस्वन्यजुः

श्रदस्मैजगत्याशीर्वांममद्यभरद्वाजोबार्हस्पत्यःसावित्रींत्रिष्टुभठंसा
वित्रोसिसावित्र ठंसुशर्मासिवैश्वदेवंबृहस्पतिसुतस्यलिंगोक्तमहंप्रजा
पतिरूपेणाऽऽत्मादेवतात्रिष्टुबग्ना ३ इपत्नीवन्नाग्नेयंप्रजापतिः ॥ प्राजा
पत्यठंहरिरस्पृकसामेहर्यौयस्तेलिंगोक्तेदेवकृत्तस्याऽऽग्नेयानिषट्३०॥
समिन्द्रात्रिवैश्वदेवींत्रिष्टुभंधातालिंगोक्तबहुदेवत्यासुगावोदेवीषाँः२ ॥
आवहोवयमाग्नेय्यौयज्ञयज्ञमेषतेलिंगोक्तेयजुषीउरुठंहिशूनःशेपोवा
रुणींत्रिष्टुभंनमोवारुणमग्नेरनीकमाग्नेयीत्रिष्टुप्समुद्रेतेसौमीविराड्
देवीरापःपंक्तिबृहतीवापूर्वार्द्धर्चआपउत्तरःसौम्योदेवानामाग्नेयमेजतु

त्र्यवसानामहापंक्तिर्यस्यैतेवशापुरुदस्मोगभौंमरुतोयस्यगोतमोमारुतींगायत्रींमहीद्यौमैंधातिथिर्द्यावापृथिव्यामित्यग्निष्टोमः ॥ ३१ ॥

अथषोडश्यातिष्ठगोतमऐंद्रीमनुष्टुभंयुक्ष्वाहिमधुच्छंदाइंद्रमिद्गोतमोयस्मान्नैंद्रीत्रिष्टुप्परब्रह्मरूपेणषोडाशिनस्तुतिरिंद्रश्चैंद्रावारुणीषोडशिदेवत्यावायजुरंताग्नेपवस्ववैखानसआग्नेयींगायत्रीमुत्तिष्ठन्कुरुस्तुतिरैन्द्रीमहश्चंप्रस्कण्वःसौरींतिस्रोपियजुरन्ताउदुत्यंदेवानामार्षमाजिघ्रेडैकौसुरूँविंदुर्गव्येमहापंक्तिप्रस्तारपंक्तीविनःशासोभारद्वाजऐन्द्रीमनुष्टुभंवाचस्पतिंवैश्वकर्मणींत्रिष्टुभंविश्वकर्मन्नैंद्रीवैश्वकर्मण्यग्नयेत्वादे

वार्षाण्यदाभ्यदेवत्यानिव्रेशीनांत्वासौम्यानि ॥ ३२ ॥ सत्रोत्थानं
देवानामार्षमिहरातिः पशुदैवतमुपसृजन्नुष्णिगाग्नेयीसत्रस्यबृहतीयज
मानानामात्मस्तुतिर्युवंतंपरुच्छेपऐंद्रीमत्याष्टिस्त्र्यवसानामाद्योर्द्धर्चऐं
द्रापार्वतः परमेष्ठीनैमित्तिकान्याध्यायाद्वसिष्ठस्यार्षंलिंगोक्तदेवतानि
चतुस्त्रिꣳशद्द्वयोर्वैष्णववारुणीं त्रिष्टुब्देवांदिवमाशीर्लिंगोक्तदेवताश्च
तुस्त्रिꣳशद्धर्मदेवत्यापंक्तिस्त्रिष्टुब्वा यज्ञस्ययज्ञदेवत्यात्रिष्टुबापवस्व
सौमींगायत्रीं नैध्रुविः कश्यपः ॥ ३३॥ अथवाजपेयोबृहस्पतेरार्षम् ॥
इंद्रस्यचदेवसावितः सावित्रीत्रिष्टुब्ध्रुवसदमैंद्राणित्रीण्यपाꣳरसदेव

त्यानुष्टुब्ग्राहालिंगोक्तदेवतानुष्टुप्संपृचौयजुषीन्द्रस्यरथोवाजस्यपा
र्थिव्यतिजगत्यंत्यः पादः सावित्रोप्स्वन्तरश्वदेवत्यानवसानापुरउ
ष्णिक्वातोवातिस्रोश्वस्तुतयउष्णिक् त्रिष्टुब्जगत्योवाजिनोश्वादेव
स्याहंलिंगोक्तानिवाजिनोश्वाएषस्यद्धेदधिक्रावावामदेव्योश्वदेवत्येज
गत्यौशन्नोवासिष्ठोविराजंतेनोनाभानेदिष्ठोजगतींवाजेवाजेवसिष्ठस्त्रि
ष्टुभमामाप्राजापत्यांवाजिनोश्वाः ॥ ३४ ॥ आपयआयुर्यज्ञेनप्राजाप
त्यानिप्रजापतेःस्वमृतायजमानोस्मेदिशोनमःपृथिवीयमासंदीयंता
सुन्वन्वाजस्यप्राजापत्यंतृचंत्रैष्टुभर्ठंसोमंतृचंतापसऽआद्यावैश्वदेव्य

निरुक्तानुष्टुब्द्वितीयालिंगोक्तदेवतातृतीयाऽऽग्नेयीप्रनोलिंगोक्तागायत्रीसरस्वत्यैसुन्वन्नाग्निःसप्तदशालिंगोक्तदेवतानि ॥३५॥ अथराजसूयोवरुणस्यार्षम् ॥ एषतेपार्थिवमाग्निनेत्रेभ्योदेवार्षाण्याध्यायाद्दशाद्यानिदैवान्यग्नेसहस्वदेवश्रवादेववातश्चभारतावाग्नेयीमनुष्टुभमुपाꣳशोस्त्रीणिरक्षोघ्नानिसविताद्वेयजमानः ॥३६॥ आपोदेवाआपीत्रिष्टुप् ॥वृष्णउर्म्मिर्लिंगोक्तानि मधुमतीरनाधृष्टाआपसोमस्यचर्माग्नेयोलिंगोक्तान्यनिभृष्टमापꣳसधमादोवारुणीत्रिष्टुप्क्षत्रस्य चतुर्णांतार्प्यपांड्वाधीवासोष्णीषाणींद्रस्यधनुर्म्मित्रस्यबाहूत्वयायंधनुर्द्दबाषणामिषवआ

वि:प्राजापत्यंपराणिलिंगोक्तानि॥३७॥अवेष्टामृत्युनाशनम् ॥ प्राचीं
पंचानांयजमानःप्रत्यस्तमासुरंमृत्योरोजोसिरुक्मोहिरण्यरूपो मै
त्रावरुणीत्रिष्टुब्यजुरन्तासोमस्यसुन्वन्प्रपर्वतस्यापीत्रिष्टुब्विष्णोस्त्री
णिलिंगोक्तानिसुन्वन्प्रजापतेनप्राजापत्यात्रिष्टुब्यजुर्मध्यायममुष्यजू
रुद्रयद्रौद्रम् ॥ ३८ ॥ इंद्रस्यलिंगोक्तानि ॥ मातेसंवरणःप्राजापत्यऐं
द्रींत्रिष्टुभमग्नयेलिंगोक्तानिपृथिविमातभूमिर्हꣳसोवामदेवःसौरीꣳसप्र
पंचपरब्रह्माभिधायिनीमतिजगतीमियच्छतमानावूर्गासिशाखेन्द्रस्य
बाहूस्योनास्यासंदीक्षत्रस्याधीवासꣳस्योनाꣳसुन्वन्निषसादशुनःशेपो

वारुणींगायत्रीमभिभूरस्यक्षायजमानोवाब्रह्मँस्त्वमामंत्रणानिपंचलिंगोक्तानींद्रस्यस्फ्योऽग्निःपृथुराग्नेयꣳस्वाहाकृताअक्षाःसवित्रालिंगोक्तदैवतम्॥३९॥अथचरकसौत्रामण्यश्विनोरार्षं॥ अश्विभ्यांत्रीणिलिंगोक्तानिवायुःसौमीगायत्रीकुवितृच॰सुकीर्तिःकाक्षीवतआद्यासौम्यनिरुक्तात्रिष्टुब्युवमनुष्टुप्पुत्रामिवात्रिष्टुबश्विसरस्वतींद्रदेवत्येअश्विसरस्वतीन्द्रदेवत्ये ॥४०॥ इतिसर्वानुक्रमणिकायांप्रथमोऽध्यायः ॥ १ ॥

अथाग्निंप्रजापतिरपश्यत् ॥ साध्यावापश्यन्त्सोऽग्निःपंचचितिकः प्रथमाचितिः प्रजापतेर्द्वितीयादेवानांतृतीयेंद्राग्न्योर्विश्वकर्मणश्चतुर्थ्यृ

षीणां पंचमीपरमेष्ठिनोऽथ प्रतिकर्मंदर्शिनांयुञ्जानोष्टौसावित्राणिसवितापश्यदाद्यातृतीयाचानुष्टुप्चतुर्थीषष्ठ्यौजगत्यौद्वितीयागायत्री पंचमीत्रिष्टुबिमंनोयजुरंतागायत्र्यनवसानाददेभ्रिर्हस्तेनुष्टुब्यजुरंता ॥ १ ॥ प्रतूर्तंनाभानेदिष्ठः ॥ आश्वीमास्तारपंक्तिर्युंजाथांकुश्रिगार्दंभींगायत्रींयोगेयोगेशुनःशेपआर्जीप्रतूर्वंस्त्रिष्टुब्विराड्रूपायजुर्गर्भारुयजुःपृथिव्यास्त्रीण्याग्नेयान्यन्वग्निराग्नेयींत्रिष्टुभंपुरोधसआगत्यमयोभुवआश्वीमनुष्टुभमाक्रम्याऽनुष्टुब्द्यौस्तेबृहत्युत्क्रामविराडुदक्रमीत्रिष्टुबात्वाद्धेगृत्समदआग्नेय्यौपरिसोमकोगायत्रीं परित्वापायुरनुष्टुभं

स.नु. त्वमग्नेगृत्समदोजगतीम् ॥ २ ॥ पृथिव्याआग्नेयम् ॥ अपांपुष्करपर्णं
॥४४॥ ꣳस्वराट्पंक्तिःशर्मद्वेअनुष्टुभौकृष्णाजिनपुष्करपर्णैंपुरीष्योग्निस्त्वामग्ने
तृचंभारद्वाजआग्नेयंगायत्र्ꣳसीदहोतर्दैंवश्रवादेववातश्च त्रिष्टुभंनिहो
तागृत्समदःसꣳसीदस्वप्रस्कण्वोबृहतीम् ॥ ३ ॥ अपोदेवीः ॥ सिंधु
द्वीपआपीन्यंकुसारिणीꣳसंतेत्रिष्टुप्पार्थिवोद्धौंवायव्योर्द्धःसुजातोनु
ष्टुबाग्नेय्युदुतिष्ठविश्वमनाःपथ्याबृहतीमूर्द्धःकण्वउपरिष्टाद्बृहतीꣳस
सू.अ. जातस्त्रितास्त्रिष्टुभꣳस्थिरोरासभेय्यनुष्टुबुषिणग्वाशिवोभवाजीपथ्याबृ
२ हतीप्रैतुलिंगोक्तमहापंक्तिरूयवसानाग्नेगायत्र्येकपदाग्नेय्यतमग्निमाग्ने

ये ओषधयस्त्रिष्टुबनुष्टुभावोषाधिदेवत्ये व्यस्यन्नाग्नेयोर्द्धचौंविपाजसोत्कीलः कात्यआग्नेयींत्रिष्टुभम् ॥ ४ ॥ आपोह्यापꣳसिंधुद्विपस्तृचंगायत्रंमित्रउपरिष्टाद्बृहतीमैत्रीरुद्रा अनुष्टुब्रौद्रीसꣳसृष्टां द्वेसिनीवालीदेवत्येउखामादित्यामखस्यमृत्पिंडोवसवस्त्वालिंगोक्तानिसर्वत्रादित्यैरास्नादितिरौषंकृत्वायादित्योष्णिगदितिरावटंदेवानांपंचौखानि मित्रस्यविश्वामित्रोमैत्रींगायत्रींदेवस्त्वासावित्रीबृहत्युत्थायपूर्वार्द्धर्चंऔषउत्तरोमैत्रः ॥ ५ ॥ आकूतिंलिंगोक्तान्यौद्ग्रभणानि ॥ मास्वौख्यौगायत्रीत्रिष्टुभावग्निश्चपादाआग्नेयोर्द्धंनः सोमाहुतिराग्नेयींगा

यत्रीं परस्याविरूपऽआंगिरसःपरमस्याऽआरुणिरनुष्टुभंयदग्नेद्धेजम
दग्निरहरहर्नाभानेदिष्ठस्त्रिष्टुभौयाःसेनाअनुष्टुभःसर्वाआग्नेय्यौंत्योप
परिष्टाद्बृहती ॥ ६ ॥ इशानोवत्सप्री ॥ त्रिष्टुभꣳरौक्मीनक्तोषासाकु
त्सऽआग्नेयींविश्वाइयावाश्वःसावित्रींजगतीꣳसुपर्णःकृतिश्चतुरवसा
नागारुत्मी विषघ्नी विष्णोर्लिंगोक्तन्यक्रंदद्धत्सप्रीराग्नेयींत्रिष्टुभमग्न
ऊर्ध्वंबृहत्यग्नेमहाबृहतीपुनर्गायत्र्यावात्वाध्रुवोनुष्टुभमुदुत्तमꣳशुनःशे
पोवारुणींत्रिष्टुभमग्नेत्रितआग्नेयीꣳहꣳसउक्ताजगतीहयजुरन्तांतेबृह
द्यजुः सीदत्वमाग्नेयीत्रिष्टुभंतरग्नेनुष्टुभौ ॥ ७ ॥ दिवस्पर्याग्नेयंत्रैष्टुभ

म् ॥ द्वादशर्चंवत्सप्रीर्भालंदनः समिधाग्निंविरूपाक्षआंगिरसआग्नेयं
गायत्रमुदुत्वातापसोनुष्टुभं प्रेदनुष्टुप्प्रप्रायमाग्नेयींवासिष्ठस्यास्त्रिष्टुभ
मापोदेवीराप्यप्स्वग्नेविरूपऽआग्नेयींगायत्रीगर्भोअसितिस्त्रोनुष्टुभो
बोधामेदीर्घतमास्त्रिष्टुभꣳसबोधिसोमाहुतिराग्नेयींयजुरंतांगायत्रींय
जुꣳवैँश्वकर्म्मणंपुनस्त्वात्रिष्टुबाग्नेयी ॥८॥ अपेतलिंगोक्तम्बहुदेवत्या॥
संज्ञानमृषदेवत्यमग्नेः सिकताश्चितःपरिश्रितायꣳसः पंचर्च्चमाग्नेयंत्रै
ष्टुभंविश्वामित्रश्चतुर्थ्यनुष्टुबयंतेनुष्टुप्त्विदैष्टकेलोकं लिंगोक्तानुष्टुप्ता
अस्यापींद्रियमेधऐंद्रइंद्रंजेतामाधुच्छंदसऐंद्रीꣳसमितञ्चतस्त्रोद्व्याग्नि

देवत्याउष्णिगुपरिष्टाद्बृहत्युष्णिक्पंक्तयोमातेवोखास्तुतिस्त्रिष्टुप् ॥
॥ ९ ॥ असुन्वंतंनैर्ऋतंतृचंत्रैष्टुभम् ॥ यंतेयजमान देवत्यानमो
विराड्धृतिदेवत्येकपदानिवेशनआग्नेयींत्रिष्टुभंविश्वावसुर्देवगंधर्वःसीरा
द्वेसीरदेवत्येबुधः सौम्योगायत्रीत्रिष्टुभौशुनंचतस्रः सीतादेवत्याःकु
मारहारितोद्वेत्रिष्टुभौतृतीयापंक्तिश्चतुर्थ्यनुष्टुब्विमुच्यध्वमानडुहीगा
यत्रीसजूर्लिंगोक्तदेवतम् ॥ १० ॥ याऽओषधीःसप्तविꣳशतिरनुष्टुभ
ऽओषधिस्तुतिमाथर्वणोभिषङ्मुंचतुबंधुर्द्वादशानारभ्याधीतामामा
हिरण्यगर्भःकार्यीत्रिष्टुभमभ्यावर्तस्वोष्णिगाग्नेय्यग्नेयद्गायत्रीयंत्रिष्टु

वग्नेतवपावकोग्निराग्नेयꣳषडृचंप्रथमेविष्टारपंक्तीतिस्त्रः सतोबृहत्यपरिष्टाज्ज्योतिःषष्ठ्याप्यायस्वगोतमः सौम्योगायत्रीत्रिष्टुबुष्णिहआतेवत्सारस्तुभ्यंताद्वेविरूपस्तिस्त्रोगायत्र्यआग्नेय्यौ ॥ ११ ॥ मयिककुबाग्नेयी ॥ ब्रह्मादित्यदेवत्यात्रिष्टुब्भरण्यगर्भोहिरण्यगर्भः कार्यीत्रिष्टुभंद्रप्सोदेवश्रवाआदित्योनमोस्तुसार्प्यंतृचमानुष्टुभंकृणुष्वपंचप्रतिसराराक्षोघ्नादेवानामार्षꣳसर्व्वास्त्रिष्टुभ आग्नेयीर्वामदेवश्चापस्यदग्नेष्ट्वायजुराग्नेयामिंद्रस्यैंद्रंभुवास्त्रिंशिराआग्नेयीत्रिष्टुभम् ॥ ॥ १२ ॥ ध्रुवास्यूर्ध्वंबृहती ॥ प्रजापतिरनुष्टुब्भूरासिप्रस्तारपं

क्तिरसार्ठऽस्वयमातृणादेवताविश्वस्माइत्येतस्यचयजुषःकाण्डात्का
ण्डादानुष्टुभंद्व्यृचमग्निनादृष्टंकादैवतंयास्तआग्नेयंद्व्यचमानुष्टुभमिं
द्राग्निभ्यांदृष्टंविराडयंलोकः स्वराडसौलोकःप्रजापतिष्ठाविश्वज्योति
षंमधुश्चतुर्दैवतमषाढासिसवितापश्यद्देवावापश्यंनिष्टकादैवतम् ॥
॥१३॥ मधुव्वातावैश्वदेवंतृचंगायत्रंगोतमोपांगंभन्पंक्तिस्त्रीन्त्समुद्रां
स्त्रिष्टुप्कौम्र्यंद्व्यृचंध्रुवासित्रिष्टुबिषेबृहत्यौरवंद्व्यृचमग्नेयुक्ष्वाग्नेयंद्व्यृ
चंगायत्रमाद्यायांभरद्वाजोद्वितीयस्यांविरूपःसम्यक्त्रिष्टुब्लिंगोक्तदे
वतचैंत्वाबृहत्याग्निर्ज्योतिषोष्णिगादित्यंगर्भंपंचर्चमाग्नेयंत्रैष्टुभमिमं

मापंचर्च्चमाग्नेयंत्रैष्टुभमेवद्वेद्वेचांतेयजुषीत्वंयविष्ठोशनाःकाव्यआग्नेयीमनिरुक्तांगायत्रीमपांत्वाविꣳशतिरैष्टकान्ययंपुरःपंचाशत्प्राणभृद्देवत्यानिलोकंताइंद्रांतिस्रःप्रतीकोक्ताएवꣳसर्वत्र ॥ १४ ॥ अथद्वितीयाचितिः ॥ ध्रुवाक्षितिःपंचाश्विन्यस्तासांप्रथमाविराट्तस्त्रस्त्रिष्टुभोयजुरंताःशुक्रश्चर्तव्यꣳसजूः पंचविश्वेषांदेवानामार्षं ताएवदेवताःप्राणंमेपंचवायव्यान्यपःपंचापानिमूर्द्धावयएकोनविꣳशतिर्लिंगोक्तदेवतानि ॥ १५॥ अथतृतीयैंद्राग्नीअनुष्टुप् ॥ पूर्वार्द्धर्च्चमैंद्राग्नउत्तरःस्वयमातृणादेवतोविश्वकर्मावायव्यꣳराज्ञ्यसिपंचदिग्देवत्यानि विश्वकर्मावा

यव्यंनभश्चेषश्चर्तव्येआयुर्मेदशालिंगोक्तदेवतानिमाच्छंदश्च षट्त्रिꣳ
शन्मूर्द्धानुष्टुब्व्यंत्रीपरोष्णिक्चतुर्दशयजूꣳषिप्राणदेवत्यानि ॥ १६ ॥
अथचतुर्थ्यांशुरष्टादशाग्नेर्दशैकयासप्तदशसर्वाणिलिंगोक्तदेवतानिस
हश्चर्तव्यम् ॥ १७ ॥ अथपंचम्यग्नेजातानाग्नेय्यौत्रिष्टुभौषोडशीचतु
श्चत्वारिꣳ शोलिंगोक्तेअग्नेस्त्रिष्टुबेवश्चत्वारिꣳ शद्रास्मिनैकान्नात्रिꣳ
शद्राड्यासिपंचायंपुरःपंचैतानिसर्वाणिलिंगोक्तदेवतानि ॥१८॥ अग्नि
मूर्द्धाग्नेयोनुवाकः ॥ प्रथमस्त्यृचोगायत्रोद्वितीयस्त्रैष्टुभौभुवस्तृतीयो
जागतोऽयमिहचतुर्थआनुष्टुभःसखायःसंपंचमःप्रगाथ एनावस्तत्रपू

वांबृहतीसतोबृहत्युत्तराताभ्यांतिस्रोबृहत्यःसंपादिताःषष्ठऔष्णिहो
ग्नेवाजस्यगोतमःसप्तमःपुनः ककुभःप्रगाथोभद्रोनस्तत्रपूर्वाककुप्स
तोबृहत्युत्तराताभ्यांतिस्रःककुभः संपादिताअष्टमः पांक्तोग्निंतंपदपां
क्तोनवमोग्नेतमाग्निꣳहोतारमातिच्छंदास्त्र्यवसानाग्नेत्वंद्वैपदस्तृचः१९।
अयमग्निर्विरूपोबोधिबुधगविष्ठिरोजनस्यसुतंभरःसखायइषः सꣳ
समित्संवननस्त्वांप्रस्कण्वएनावोवसिष्ठोग्नेवाजस्यगोतमो भद्रोनः
सौभरिरग्निंतंकुमारत्रृषौयेनाष्टावाग्नेय्यः षट्त्रिष्टुभोद्वेअनुष्टुभौतपश्व
तंव्यंपरमेष्ठीसौरंप्रोथदश्वोवसिष्ठस्त्रिष्टुभमाग्नेयीमायोद्वेस्वयमातृणदे

वत्येसहस्रस्यपंचाग्नेयानि ॥ २० ॥ रौद्रोध्यायः परमेष्ठिनआर्षंदे
वानांवाप्रजापतेर्वाद्योनुवाकः षोडशर्च्च एकरुद्रदेवत्यःप्रथमागायत्री
तिस्रोनुष्टुभस्तिस्रःपंक्तयःसप्तानुष्टुभोद्वेजगत्यौमानोद्वेकुत्सः ॥२१॥
अंत्यानुवाकेसप्तैकरुद्रस्तुतिः ॥ आद्योपरिष्टाद्बृहतीद्वितीयाजगती
कुत्सस्य तृतीयानुष्टुब्द्वेत्रिष्टुभौ द्वेअनुष्टुभावसंख्याता बहुरुद्रदेवत्या
दशानुष्टुभोमंत्राअवतानसंज्ञकास्ततोंत्यानित्रीणियजूꣳषिबहुरुद्रदेव
त्यानिप्रत्यवरोहसंज्ञकामंत्राः ॥ २२ ॥ मध्येसर्वाणियजूꣳषि ॥ हिर
ण्यबाहवइतितिस्रोशीतयोरुद्राणां तेषामुभयतो नमस्काराअन्येन्य

तरतोनमस्काराअपरेजातानामरुद्राः सभाभ्यइत्यादयोनमोवःकिरि
केभ्यइत्याग्निवायुसूर्यहृदयभूताः पंचव्याहृतयोबहुरुद्रदेवत्याः॥२३॥
अश्मन्मारुतमश्मँꣳस्तेश्मामय्याशीर्य्यँद्विष्मआभिचारिमिमामआ
ग्नेयमृतवोबृहतीपंक्तिर्वासमुद्रस्य द्वगायत्र्यावुपज्मंजगतीत्रिष्टुब्वाऽपा
मिदंबृहत्यग्नेपावकवसूयवःसनोमेधातिथिरेतेआग्नेय्यौगायत्र्यौपा
वकयाजगतींभरद्वाजोनमस्तेबृहतीमाग्नेयीमृषिसुतालोपामुद्रा ॥
॥ २४ ॥ नृषदेपंचाग्नेयानिषेदेवाजगत्यौप्राणदेवत्येप्राणदाबृहती
पंक्तिर्वाऽऽग्येय्यग्निस्तिग्मेनाग्नेयींगायत्रींभरद्वाजोयइमावैश्वकर्म्म

णीस्त्रिष्टुभोविश्वकर्माभौवनः ॥ २५ ॥ आशुरैंद्रीद्वादश ॥ त्रिष्टुभो
प्रतिरथोवसृष्टानुष्टुबिषुदेवत्याप्रतयोद्धृन्तस्तौत्यष्टुबसौयामारुतीत्रि
ष्टुब्यत्रालिंगोक्तदेवता पंक्तिर्मर्म्माणिलिंगोक्तैवत्रिष्टुबुदेनं तिस्रोनुष्टुभ
आद्याग्नेयीद्वितीयैंद्रीतृतीयालिंगोक्तदेवता पंचदिशःपंचयज्ञाग्निसाध
नवादिन्यऽआद्येद्वेत्रिष्टुभौ तृतीयापंक्तिर्बृहतीवाचतुर्थीबृहत्येवांत्या
त्रिष्टुब्विमानोद्वे आदित्यदेवत्येआद्याविश्वावसोर्द्वितीयाप्रतिरथस्य
देवहूर्विधृतिरनुष्टुब्यज्ञदेवत्यावाजस्यैंद्र्यनुष्टुबुद्ग्राभमैंद्राग्न्यनुष्टुबेव
॥ २६ ॥ क्रमध्वंपंचाग्नेय्यः ॥ आद्यानुष्टुप्ततास्त्रिष्टुप्ततोबृहतीपिपीलि

कमध्याततोनुष्टुप्त्रिष्टुबंत्याग्नेसहस्राक्षविराडाग्नेयीसुपर्णोद्धे पंक्ति
त्रिष्टुभौताꣳसवितुः सावित्रींत्रिष्टुभंपुरस्ताज्ज्योतिषं कण्वो दर्शविधे
माग्नेयींगृत्समदस्त्रिष्टुभमस्यास्त्रिस्थानोग्निर्द्देवताप्रेद्धोविराडाग्नेयी
वसिष्ठस्य चित्तिंवैश्वकर्मण्यतिजगतीसप्ततआग्नेयीत्रिष्टुप्सप्तऽऋषी
णाम् ॥२७॥ शुक्रज्योतिःषण्मारुत्यः ॥ आद्याचतुर्थीचोष्णिग्द्वती
यातृतीयाचगायत्रीपंचमीजगती षष्ठीगायत्र्युष्णिग्वंदंदैवीर्मारुतमि
मंत्रयोदशर्च्चंआग्नेयस्त्रैष्टुभोऽनुवाको यज्ञस्तुतिर्घृतस्तुतिर्वावसोर्द्धा
राभिवादिनीवाघृतंमिमिक्षेगृत्समदःसमुद्राद्वामदेवश्चत्वारिशृङ्गायज्ञ

पुरुषदेवत्यऋषभोमंत्रः।२८। वाजश्चमेदेवानामार्षम् ॥ एतैर्यजुभिर्यज
मानाग्नेःकामान्याचतेवाजप्रसवीꣳसप्तर्चंविश्वे त्रैष्टुभंवैश्वदेवंलुशोधा
नाकोवाजोनस्तिस्त्रोन्नदेवत्याआद्यानुष्टुब्द्वेत्रिष्टुभौसंमाविराजावाग्ने
य्यौसरस्वत्यौलिंगोक्तदैवतम् ॥२९॥ ऋताषाड्गन्धर्वाप्सरसः ॥ सनः
प्राजापत्याप्रस्तारपंक्तिःसमुद्रोसिवायव्यानित्रीणिरुचमाग्नेय्यनुष्टुप्त
त्वावारुणीत्रिष्टुभꣳशुनःशेपःस्वर्णाग्नेयानिपंचाग्निंयुनज्म्याग्नेय्यास्ति
स्त्रआद्येद्वे त्रिष्टुभौपंक्तिस्तृतीयादिवोद्वेआग्नेय्यौ परोष्णिग्ज्मशापदपं
क्ती इष्टोयज्ञोव्द्यृचंयजमानाग्निदेवत्यंगालवआद्योष्णिग्द्वितीयागाय

त्री ॥ ३० ॥ यदाकूतादष्टर्चमाग्नेयम् ॥ विश्वकर्म्मणस्तृतीयादैवीवाद्याजगतीतिस्रस्त्रिष्टुभश्चतस्रोनुष्टुभोग्निरस्म्यगन्यद्वैतवादिनींत्रिष्टुभं देवश्रवादेववातश्चभारतावृचोयजुषैँअग्नेयोनुष्टुबाग्नेयी ॥ ३१ ॥ वार्त्रहत्यायसप्तर्चमिन्द्रोपश्यत् ॥ आद्येद्वेवार्त्रघ्न्यौगायत्रीत्रिष्टुभौविश्वामित्रस्यचविनोनुष्टुम्मृगोनात्रिष्टुप्प्रथमाऱ्शासो भारद्वाजोद्वितीयांजयऐंद्रोद्वेवैश्वानऱ्यौगायत्रीत्रिष्टुभौपृष्टोदिविकुत्सस्यचाऽश्यामद्वेत्रिष्टुभावाग्नेय्यौ कामवत्यावश्यामभरद्वाजस्यच वयंतेकात्स्योत्कीलस्यच धामच्छदनुष्टुब्वैश्वदेवी ॥३२॥ अथसौत्रामणीप्रजापतेरार्षम्॥

अश्विनोःसरस्वत्याश्चस्वाद्वींत्वानुष्टुप्सुरासोमदेवत्यासोमोसिचत्वारिसौराणिपरितोभारद्वाजःसौमीबृहतीऽवायोस्तृचोगायत्रःसौम्यआभूतेर्ब्रह्मक्षत्त्रंत्रिष्टुप्सुरासोमदेवत्यानानाहिजगतीसुरासोमदेवत्यातेजोसिपयोदेवत्यान्योजोसिसुरादेवत्या निषाव्याघ्रꣳहैमवर्चैरनुष्टुब्विषूचिकास्तुतिर्यदापिपेषाग्नेयीबृहतीसम्पृचस्थपयोग्रहाविप्रचस्थसुराग्रहादेवायज्ञंब्राह्मणानुवाकोविꣳशतिरनुष्टुभः सोमसंपत् ॥ ॥ ३३ ॥ सुरावंतंचतुर्ऋचंत्रैष्टुभम् ॥ अश्विसरस्वतींद्रदेवत्यंपितृभ्यःसप्तपित्र्याणिपुनन्तुमानवर्चंपावमानमाद्येद्वे पित्र्येअनुष्टुभौ प्रजापति

स्तृतीयंवैखानसआग्नेयींगायत्रींचतुर्थीलिंगोक्तदेवतानुष्टुप्पंचम्याग्ने
यीगायत्रीषष्ठ्याग्नेयीब्राह्मीचगायत्रीब्राह्मयस्तृतीयः पादसौमीसप्त
मीसावित्र्यष्टमीनवमीत्रिष्टुब्वैश्वदेवीयेसमासनाअनुष्टभौ पित्र्याद्या
द्वितीयायजमानाशीर्द्वैसृतीत्रिष्टुब्देवपानपितृपाणौपंथानौब्रवीतीदृꣳ
हविरूह्यवसानाष्टिर्यजमानाशीः ॥ ३४ ॥ उदीरतांत्रयोदशर्च्चंपैत्र्यंत्रैष्टु
भꣳशंखएकादशीतुजगत्याच्यजानुदशर्च्चौनुवाको नवपित्र्यादशम्यैं
द्रीगायत्रीतृतीयाचतुर्थीनवम्योनुष्टुभास्त्रिष्टुभइतराःसोमोराजाष्टर्चंम
श्विसरस्वतीन्द्राऽअपश्यन्नाद्यास्तिस्रो महाबृहत्यउपांत्याचचतुर्थ्यै

न्तेअतिजगत्यौशेषेअतिशक्कर्यौत्र्यवसानेसीसेनतंत्रमाश्विसरस्वतीं
द्रदेवत्याः षोडशजगत्यः ॥ ३५ ॥ क्षत्रस्ययोर्निंद्विपदागाय
त्री ॥ आसन्दीदेवताकामात्वाकृष्णाजिनंमृत्योरुक्मावाश्विनोभैषज्ये
न लिंगोक्तदेवतानित्रीणि कोसिप्राजापत्यागायत्री शिरोमेपंचर्चं
मिंद्रशरीरावयवदेवताकं तृतीयागायत्र्यंत्यामहापंक्तिस्त्र्यवसानानु
ष्टुभौंत्याःप्रतिक्षत्रेवैश्वदेवंत्रयादेवादैवीपंक्तिस्त्र्यवसाना प्रथमाद्विती
ययोर्वैश्वदेवमाशीर्लिंगं लोमान्यनुष्टुब्लिंगोक्तदेवता ॥ ३६ ॥ यद्दे
वास्तिस्रोग्निवायुसूर्यदेवत्याअनुष्टुभः ॥ कुष्माण्डीर्यद्ग्रामेलिंगोक्त

देवतꣳसमद्रेतोद्विपदाविराडार्पीद्विपदादिवानुष्टुबाप्युद्वयꣳसौर्यंनुष्टुप्प्र
स्कण्वस्यापोऽआद्याग्नेयीपंक्तिरेधोसिसमिद्देवत्येयजुषी समाववर्त्य
निरुक्तागायत्रीवैश्वानरज्योतिर्यजुरभ्यादधाम्याग्नेयंतृचमानुष्टुभमा
श्वतराश्विर ꣳ शुनासौर्य्यंनुष्टुप्सिंचंतिपरिसौर्यैन्द्रीचानुष्टुब्धानावंत
मैंद्रीगायत्रीविश्वामित्रस्य चबृहदिंद्रायबृहतीनृमेधपुरुषमेधयोरध्व
र्यौंगायत्री ॥ ३७ ॥ षाभूतानामात्मप्रवादापंक्तिः ॥ नारा
यणीयाकौडिन्यस्यप्राणपामेद्धेअनुष्टुबुपरिष्टाद्बृहत्यौलिंगोक्तदेवतेस
मिद्धइन्द्रएकादशार्षीस्त्रिष्टुभआंगिरसइध्मस्तनूनपान्नराशꣳसइडोब

हिंर्द्वारउषासानक्तादैव्याहोतारातिस्त्रोदेवीस्त्वष्टावनस्पतिः स्वाहा
कृतयइत्येताआप्रीदेवता आयातुसप्तत्रिष्टुभऐंद्र्यआमन्द्रैर्बृहत्यायातु
वामदेवस्त्रातारंगर्गआमन्द्रैर्विश्वामित्रएवेद्वसिष्ठः ॥ ३८ ॥ अथहो
त्रंत्रिपशोः ॥ समिद्धोअग्निराप्रीर्द्वादशविदर्भिरश्विसरस्वतीन्द्रदेवत्या
अनुष्टुभोश्विनाहविस्तिस्त्रोनुष्टुभएकैकाश्विसरस्वतीन्द्रदेवत्यायइन्द्र
सवितृवरुणदेवत्यास्तिस्त्रोऽनुष्टुभोश्विनागोभिस्तिस्त्रोनुष्टुभो युवंपुत्र
मिवानुष्टुप्त्रिष्टुभौ यस्मिन्नश्वासआग्नेय्यौजगतीत्रिष्टुभावश्विनातेज
सैकादशर्च्चंऽशस्त्रंगोमदृत्समदस्तृचमाश्विनंगायत्रं पावकानोमधुच्छं

दाःसारस्वतीमिंद्रायाह्यैंद्रंमधुच्छंदाएवानुक्तमानुष्टुभमश्विसरस्वतीन्द्र
देवत्यम्॥३९॥इमंमेगायत्रीत्रिष्टुभौवारुण्यौशुनःशेपः॥त्वन्नस्त्रिष्टुभा
वाग्निवारुण्यौ वामदेवोमहीमूषुत्रिष्टुबादित्यासुत्रामाणंगयःप्लातःसु
नावत्रौस्वर्ग्यौगायत्र्यानोमैत्रावरुणींगायत्रींविश्वामित्रःप्रबाहवावसि
ष्ठस्त्रिष्टुभꣳसमिद्धोअग्निरेकादशाप्रमानुष्टुभ ꣳस्वस्त्यात्रेयस्यार्षंवयो
धाइंद्रोदेवतावसंतेन ऋतुनाषडृचामानुष्टुभंलिंगोक्तदेवतꣳहोतायक्ष
द्वादशाप्रीःप्रैषाअश्विसरस्वतींद्रदेवत्याअश्विनौ छागस्यसप्तलिंगोक्त
देवताःप्रैषावनस्पतिमभियूपोग्निꣳस्विष्टकृतꣳस्विष्टकृदग्निर्देवंबर्हिरे

कादशानुयाजप्रैषाअश्विसरस्वतीन्द्रदेवत्याऽआग्निमद्यसूक्तवाकप्रैषो
लिंगोक्तदेवतोलिंगोक्तदेवतः॥४०॥इतिसर्वानुक्रमणिकायांद्वितीयोऽ
ध्यायः॥२॥ ॐ अथाश्वमेधश्चतुरोध्यायान्प्रजापतिरपश्यत्॥तेजोसि
सौवर्णंनिष्कमिमामगृभ्णन्संवत्सरो यज्ञपुरुषस्त्रिष्टुभमभिधालिंगो
क्तानियोअर्वन्तंगायत्र्यर्द्धेनाश्वस्तुतिःपरोधौलिंगोक्तोग्नयेलिंगोक्तान्ये
वहिंकारायेत्यश्वस्यैकान्नपंचाशच्चेष्टितानिहिरण्यपाणिंपंचर्च्चंठंसावि
त्रंगायत्रमाद्यांमेधातिथिरग्निंछंस्तोमेनाग्नेयंतृचंगायत्र ठं सुतंभरोवि
श्वामित्रोविरूपोयथासंख्यमजीजनोहिपावमानींकृतिं पिपीलिकम

ध्यामनुष्टुभं त्र्यरुणत्रसदस्यूर्विभूरश्वदैवतंदेवादैवामिहरंतिराग्नेयानि चत्वारिकायौद्गृभ्णानिलिंगोक्तान्याब्रह्मलिंगोक्तान्येवाध्यायात् ॥१॥ प्रजापतयेप्राजापत्यम् ॥ यस्तेदेवंयःप्राणतस्त्रिष्टुप्कायी हिरण्यगर्भस्य युंजन्तिमधुच्छन्दाआदित्यदेवत्यांगायत्रीं युंजंत्यस्याश्वस्तुतिर्यद्धातोबृहतीमौवसवस्त्वालिंगोक्तानिलाजी ॥ २॥ नश्वदेवत्यंकःस्विच्चतस्रोऽनुष्टुभःप्रश्नप्रतिप्रश्नभूताब्रह्मोद्येहोतुर्ब्रह्मणश्च वायुष्वालिंगोक्तानि सꣳशितस्तिस्रोश्वदेवत्याअनुष्टुब्विराड्त्रिष्टुभोग्निःपशुराश्वानित्रीण्ययंबेनुष्टुबश्वस्तुतिर्गणानांत्वाचत्वारिलिंगोक्तानि ॥ ३ ॥

उत्सक्थ्यागायत्र्याश्वी ॥ एकादशर्चंमानुष्टुभंद्वितीयातूपरिष्टाद्बृ
हत्यध्वर्य्वादीनांकुमार्य्यादिभिरश्लीलभाषणं ताएवदेवता दधिक्रा
व्णोदधिक्रावावामदेव्यः सुरभिमतीमनुष्टुभमाइर्वांगायत्रींठंषडृचमा
इवमुष्णिगाद्याश्चतस्त्रोनुष्टुभोंत्यात्रिष्टुप् कस्त्वाषडृचमाश्वमाद्यागा
यत्रीपंचानुष्टुभः कःस्विदष्टादशर्चंब्रह्मोद्यंठं होत्रादीनांप्रश्नप्रतिप्रश्न
भूतमाद्याश्चतस्त्रोनुष्टुभः कास्विदाद्याश्चतस्त्रश्चांत्यादशत्रिष्टुभः सुभूर
नुष्टुब्लिंगोक्तदेवताहोतायक्षत्प्राजापत्यः प्रैषःप्रजापतेर्हैरण्यगर्भःप्रा
जापत्यांत्रैष्टुभम् (४)॥ अश्वस्तूपरइत्यादयः ॥ पशवोध्यायेनो

क्तादेवतावापर्यंग्यास्तथारोहितादयोगुणयुक्ताऽ आरण्याश्चकापिंज
लादयआध्यायाच्छादंदद्भिरित्यादित्वगित्येतदंत द्रव्यदैवतमुक्तम्॥
॥ ४ ॥ अश्वस्तूपरोब्राह्मणोध्यायः ॥ शादंदद्भिस्त्वचांतश्चजुंबका
यवारुणींद्विपदांमुंडिभओदन्य एषा चाघनाशन्यंतर्ज्जलेयस्येमेका
श्यौत्रिष्टुभौहिरण्यगर्भः प्राजापत्यआनोदृशर्च्चंजागतंवैश्वदेवंगोतमः
स्वस्तिनोविराट्स्थानाभद्रंकर्णेभिस्तृचं त्रैष्टुभंमानोश्वस्तोमीयंदी
र्घतमास्त्रैष्टुभं द्वाविꣳशत्यृचमश्वस्तुतिस्तृतीयाषष्ठ्यौ जगत्यावि
मानुद्वैपदं वैश्वदेवंतृचं भौवनआप्त्योवासाधनभौवनोवा ॥ ५ ॥

अग्निश्वसप्तलिंगोक्तानि ॥ प्रियोदेवानांलौगाक्षिरनुष्टुभमनवसानांबृ
हस्पतेगृत्समदोब्राह्मीं त्रिष्टुभमिंद्रगोमन्नैंद्र्यौगायत्र्यौरम्याक्षिर्ऋता
वानंप्रादुराक्षिर्वैश्वानरीयांवैश्वानरस्य त्रिष्टुभंकुत्सोग्निर्ऋषिराग्नेयींगा
यत्रीं वसिष्ठभरद्वाजौमहाँ २ ऽइंद्रोमाहैंद्रीवसिष्ठस्तंवऐंद्रींपथ्याबृहतीं
नोधागोतमोयद्वाहिष्ठंवसूयवआग्नेयीमनुष्टुभमोहिभरद्वाजोगायत्रीमृ
तवस्तेबृहतीत्युपह्वरेवत्सो गायत्रीम् ॥ ६ ॥ उच्चातेगायत्रंतृचर्ठः
सौम्यमामहीयवोनुवीरैर्मुद्गलोयज्ञपुरुषास्त्रिष्टुभमग्नेपत्नीर्मेधातिथि
राग्नेयीं गायत्रीमभियज्ञंद्व्यृचमृतुदैवतं मेधातिथिस्तवायमैंद्रीत्रिष्टुभं

विश्वामित्रोमेवनोजगतीं गृत्समदःस्वादिष्ठयामधुच्छन्दाः सौम्यावनुक्तानांगायत्रम् ॥ ७ ॥ समास्त्वाग्नेकोध्यायः ॥ प्रजापतेरार्षꣳसामिधेन्योनवाग्नेय्यास्त्रिष्टुभोग्निनादृष्टाअग्निर्ऋषिः कर्मांगभूतमग्निꣳस्तौत्यूर्ध्वाद्द्वादशर्चंमाग्नियमौष्णिहंविषमपदं प्राजापत्यमाग्नेयमग्निरपश्यदग्निर्हिप्रजापतित्वेनसंस्तूयतेतेनप्राजापत्यम् ॥ ८ ॥ पीवो अन्नाद्द्वेवायव्ये त्रिष्टुभौवसिष्ठः ॥ आपोहद्वेप्राजापत्येहिरण्यगर्भः प्राजापत्यः प्रयाभिर्द्वेवायव्येवसिष्ठोनियुत्वान्वायव्याःषड्वायोशुक्रोनुष्टुबेकयाचत्रिष्टुबंत्यागायत्र्योनियुत्वान्वायोषेगृत्समदोवायोशुक्रः

पुरुमीढाजमीढौतववायोव्यश्वआङ्गिरसोभित्वावसिष्ठऐन्द्रप्रगाथंप्रथमाबृहतीद्वितीयासतोबृहतीत्वामिदेवठँशंसुबार्हस्पत्यः कयानऐंद्रं तृचं गायत्रं वामदेवोंऽत्यातु पादनिचृद्यज्ञायज्ञावऊर्जोनपातठँ शंयुः पाहिनोगर्भः प्रागाथएतंतृचंप्रागाथमाग्नेयंद्वेबृहत्यौतृतीया सतोबृहतीसंवत्सरोस्याग्नेयम् ॥ ९ ॥ इन्द्रमिडःसौत्रामणिकोध्यायः ॥ एकादशप्रयाजप्रैषाऐंद्राआप्रीदेवत्याआद्येनुवाके देवं बर्हिरनुयाजप्रैषाऐंद्राएकादशैवाग्निमद्यैन्द्रःसूक्तवाकप्रैषस्त्वामद्यप्रतीकउभयत्रापिसमिधानंमहद्वायोधसआप्रियएकादशप्रयाजप्रैरवा

स्तथैव देवंबर्हिरनुयाजप्रैरवाअग्निमद्यवायोधसःसूक्तवाकप्रैषः॥१०॥ समिद्धोअंजनाश्वमेधिकोध्यायः ॥ आद्याआप्रीस्त्रिष्टुभएकादशाश्वस्तुतिर्बृहदुक्थोवामदेव्योददर्शाश्वोवासामुद्रिर्य्यंदक्रंदस्त्रयोदशाश्वस्तुतिस्त्रिष्टुभोभार्गवोजमदग्निर्ददर्शदीर्घतमाश्च समिद्धोऽअद्यद्वादशाप्रीस्त्रिष्टुभोजमदग्निः ॥११॥ केतुंकृण्वन्नाग्नेयीमनिरुक्तांगायत्रींमधुच्छन्दाः ॥ जीमूतस्येवपायुर्भारद्वाजःसंग्रामांगान्यृक्षौस्तौषीत्सन्नाहंकार्मुकंगुणमार्त्नींनूणंजगत्यर्द्धंनसारथिमर्द्धंन रश्मीन्हरीन्रथठंरथगोपायितृअगत्यालिंगोक्तदेवताद्वाभ्यां त्रिष्टुबनुष्टुब्भ्यामिषुमनुष्ट

भाकशांततोहस्तघ्नंततस्तृचौरथदुंदुभिदेवत्यावैंद्रोर्द्धंचौंत्यःसर्वास्त्रि
ष्टुभोनुक्ताआग्नेय्यःकृष्णग्रीवइत्याद्याएकादशिन्न्योर्द्धयोःपशुदेवता
अग्नयेगायत्त्रायेतिदशहविषोवेष्टेर्द्दैवता ॥ १२ ॥ देवसवितुर्द्धावध्या
यौ ॥ पुरुषमेधोनारायणः पुरुषोददर्शविश्वानिदेवगायत्त्रीर्ठंसावित्री
ठंश्यावाश्वोविभक्तारंमेधातिथिर्ब्रह्मणे ब्राह्मणमितिकण्डिकेतपसेनु
वाकश्चब्राह्मणम् ॥ १३ ॥ सहस्त्रशीर्षाषोडशर्च्चमानुष्टुभम् ॥ त्रिष्टुबं
त्यंपुरुषोजगद्बीजमन्त्रदेवताद्भ्यःषडृचउत्तरनारायणोमंत्र आद्यास्ति
स्रास्त्रिष्टुभो द्वेअनुष्टुभावंत्यात्रिष्टुप् ॥ १४ ॥ तदेवसर्वमेधोध्यायः ॥

आत्मदैवतः सप्तमेहानिसर्वंहोमेविनियुक्तः सर्वंमेधंब्रह्मस्वयंभ्वैक्षततदीयंमन्त्रगणंप्रवायुमच्छेत्येतस्मादाद्येद्वेअनुष्टुभौनतस्याद्विपदागायत्रीहिरण्यगर्भश्चतस्त्रोमामाहिꣳसीद्यस्मान्नद्वे एताः प्रतीकचोदिता ब्रह्मयज्ञेध्येयाःसर्वत्रैवमेषोहचतस्त्रास्त्रिष्टुभआपोहयाश्चित्प्रतीकचोदिते ॥ १५ ॥ वेनस्तत्पंचात्रिष्टुभः ॥ सदसस्पातिंतृचेनमेधाकामोमेधांयाचतेप्रथमागायत्रीलिंगोक्तदेवताद्वितीयाग्नेय्यनुष्टुप् तृतीयालिंगोक्तदेवतानुष्टुबिदंमेमांत्रवर्णिक्यनुष्टुबेतया देवेभ्यःश्रीकामोयाचतेश्रियम् ॥ १६ ॥ अस्या जरासः ॥ सप्तदशाग्निष्टुत्याग्निष्टोमिके प्रथमे

स.नु. हनिपुरोरुच आग्नेय्यआद्येद्वेऐंद्रवायवस्यास्याजरासोवत्सप्रीर्हरयोधू
॥६०॥ मकेतवोविरूपोयजमानोद्वेमैत्रावरुणस्ययजमानोगोतमोद्वेविरूपेशु
क्रस्यकुत्सोयमिहमंथिनोवैश्वदेवग्रहग्रहणेत्रीणिशताविश्वामित्रऐंद्रा
ग्नस्याग्निर्वृत्राणिभरद्वाजोवैश्वदेवस्य विश्वेभिःसोम्यंमेधातिथिराय
न्मरुत्वतीययोर्द्वे आयत्पराशरःशाक्त्योऽग्नेशर्द्धात्रिदुहिताविश्ववारा
त्वाꣳहिभरद्वाजस्त्वेअग्नेद्वेबृहत्यावादित्यस्यत्वेअग्नेवासिष्ठः श्रुधिप्र
सू.अ. स्कण्वआदित्यग्रहग्रहणेविश्वेषामदितिर्वामदेवोगोतमोमहोअग्नेःसा
३ वित्रस्यलुशोधानाकोऽनुक्तगायत्रंत्रैष्टुभमम् ॥ १७ ॥ इन्द्रस्तुत्युक्थ्यो

द्वितीयेहनि ॥ ऐंद्यः पुरोरुचोद्वादशप्रतीकचोदितेच द्वे तिस्रश्चापश्चिद्व
सिष्ठोगावउपपुरुमीढाजमीढौयदद्यवासिष्ठआसुतेसुनीतिरातिष्ठतं वि
श्वामित्रःप्रवःसुचीकोबृहतीन्त्रिशोकइन्द्रेहिमधुच्छन्दाइन्द्रोवृत्रविश्वा
मित्रः कुतस्त्वमगस्त्यआतद्वौरीवितिशाक्त्यइमान्तेकुत्सोजगतीम
नुक्तंगायत्रंत्रैष्टुभमम् ॥ १८ ॥ सूर्यस्तुत्युक्थ्येतृतीयेहनि ॥ सौर्यंश्चतु
र्दशपुरोरुचस्तिस्रश्च प्रतीकोक्ताविभ्राड्बृहज्जगती विभ्राट्सौर्यं उदु
त्यं तिस्रः प्रस्कण्वआनोगस्त्योयदद्यश्रुतकक्षःसुतंकक्षौतरणिःप्रस्क
ण्वस्तत्सूर्य्यस्य द्वेकुत्सोबणमहाँ २ ॥ द्वेजमदग्निर्बृहती सतोबृह

त्यौश्वायंतइवनृमेधोबृहतीमत्यद्यादेवाः कुत्सआकृष्णेनाहिरण्यस्तूप
आंगिरसोनाख्यातर्ठंसौर्यंगायत्रंत्रैष्टुभम् ॥ १९ ॥ वैश्वदेवस्तुतिच
तुर्थेंहनि ॥ वैश्वदेव्यः पुरोरुचएकादशषट्चप्रतीकोक्ताः प्रवावृजेवसि
ष्ठास्त्रिष्टुभइंद्रवायूबृहस्पतिंद्वेमेधातिथिराधिनः कुसीदीकाण्वोग्नइन्द्रप्र
तिक्षत्त्रइन्द्राग्नीमित्रावरुणाजगतीं काश्यपो वत्सारोऽस्मेरुद्राः प्रगाथो
वाँचोऽअद्यकूर्म्मोंगात्सँमदोविश्वेअद्यलुशाधानाकोविश्वेदेवाःसुहोत्रो
देवेभ्योहिवामदेवोजगतीमनुक्तंगायत्रंत्रैष्टुभम् ॥२०॥ अथाऽनारभ्या
धीतंमंत्रगणम् ॥ अर्वाकिपतृमेधादादित्ययाज्ञवल्कयौदद्दशतुःप्रवा

युंपंचदशर्च्चः पुरोरुग्गणोद्वेचप्रतीकोक्तेप्रवायुमृजिश्वोमित्रꣳहुवेद्धेम
धुच्छन्दामित्रं लिंगोक्तादस्रायुवाकवआश्विनींविदद्यद्यैन्द्रींकुशिकोन
हिस्पर्शंविश्वामित्रोवैश्वानरीमुग्राविघनिनैन्द्राग्नींभरद्वाजउपास्मै सौ
मींदेवलोसितोवा येत्वाविश्वामित्रोजनिष्ठाउग्रोगौरीवितिरातुवामदे
वस्तृचमैन्द्रंत्वामिंद्रैंद्र्यौनृमेधःपथ्याबृहतीसतोबृहत्यौयज्ञोदेवानांकु
त्सोदब्धेभिःसावित्रींजगतींभरद्वाजः॥२१॥ प्रवीरयापंचदशर्चःपुरोरु
ग्गणः ॥ द्वेचप्रतीकोक्तेप्रवीरयावसिष्ठोवायव्यांकाव्ययोराजानेषुद
क्षस्तिरश्चीनःपरमेष्ठी प्रजापतिर्भाववृत्तंतृचमारोदसींजगतीं विश्वा

मित्रउक्थेभिर्वृत्रहंतमावासिष्ठउपनः सुहोत्रोवैश्वदेवीं ब्रह्माणिमेग
स्त्योद्वेइंद्रमरुत्संवादेतादिदाथर्वणोबृहद्दिवइमाउत्वाद्वेबृहत्या मेधा
तिथिरयꣳसहस्रंमेधातिथिःसतोबृहतीम् ॥ २२ ॥ आनस्त्रयोदशर्च्चःपु
रोरुग्गणः ॥ चतुर्ऋचंप्रतीकचोदितंचानोवायव्यांजमदग्निरिन्द्रवा
यूसुसन्दृशैन्द्रवायव्यांतापसऋधगित्थामैत्रावरुणीं जमदग्निरायात
माश्विनींवासिष्ठः प्रैतुवैश्वदेवींकणवश्चन्द्रमाअप्स्वैन्द्रीमाहुतीपरिणा
मवादिनींत्रितआस्योदेवंदेवंवोमनुर्वैवस्वतोवैश्वदेवींदिविपृष्ठोमृधऐ
न्द्रइन्द्राग्नीअपात्सुहोत्रोदेवासोहिमनुरपान्धमद्धेनृमेधोस्येन्मेधाति

थिर्दशम्येकादश्यंत्याचसतोबृहत्यः शेषाबृहत्यःशेषाबृहत्यः॥ २३ ॥
इति सर्वानुक्रमणीयेतृतीयोऽध्यायः ॥ ३ ॥ यज्जाग्रतःषडृचंमानसंत्रै
ष्टुभꣳशिवसंकल्पः ॥ पितुन्नूष्णिहमगस्त्योन्नस्तुतिमान्विश्चतुर्ऋच
मानुष्टुभं द्वयोरनुमितिर्द्वयोः सिनीवालीसरस्वत्यौ सिनीवालीपृथु
ष्टुकेद्वेगृत्समदस्त्वमग्नेद्वे आग्नेय्यौजगत्यौहिरण्यस्तूपआंगिरसउ
त्तानायंद्वेदेवश्रवादेववातश्चभारतावाद्यात्रिष्टुब्द्वितीयानुष्टुप्प्रमनम
हेनोधाद्व्यृचमैन्द्रंत्रैष्टुभमिच्छन्तित्वाद्व्यृचमैन्द्रंत्रैष्टुभमेवदेवश्रवादे
वताश्च भारतौ ॥ १ ॥ अषाढंयुत्सुगोतमः ॥ चतुर्ऋचंत्रैष्टुभꣳसौम्य

मष्टोव्यख्यञ्चतुर्ऋचंत्रैष्टुभꣳसावित्रमांगिरसोहिरण्यस्तूपो द्वितीयाज
गत्युभापिबतुमाश्विनंतृचमुभापिबतं प्रस्कण्वोगायत्रीमप्नस्वतीमाश्वि
नात्रिष्टुभौ कुत्सआरात्रिपथ्याबृहतीꣳरात्रिदेवत्यां काशिपाभरद्वाज
दुहितोषस्तदुषस्यांपरोष्णिहंगोतमः प्रातरग्निंवासिष्ठःसप्तर्चंमाद्याज
गतीबहुदेवत्यापञ्चभगदेवत्यास्त्रिष्टुभोंत्योषस्याः ॥ २ ॥ पूषन्तवसु
होत्रः ॥ पथस्पथःपरिपातिमृजिश्वैतपौष्ट्यौगायत्रीत्रिष्टुभौत्रीणिपदा
वैष्णव्योगायत्र्यौमेधातिथिर्घृतवती भुवनानांभरद्वाजोद्यावापृथिव्यां
जगतीयेनोलिंगोक्तदेवतांत्रिष्टुभंविहव्यआनासत्याहिरण्यस्तूपआ

श्विनीमेषवोमारुतींत्रिष्टुभमगस्त्यःसहस्तोमाऋषिसृष्टिप्रतिपादिकां
त्रिष्टुभंयज्ञःप्राजापत्यआयुष्यंवर्च्चस्यंतृचंदक्षउष्णिकशक्करीत्रिष्टुभो
हिरण्यस्तुतिरुतनऋत्विजोबहुदेवत्यात्रिष्टुभामिमांगिरःकूर्मोगार्त्सम
दआदित्यदेवत्यांत्रिष्टुभर्ऽसप्तऋषयोध्यात्मवादिनीजगत्युत्तिष्ठंतृ
चोब्राह्मणस्पत्यआद्येबृहत्यौ कण्वोघोरोंत्यांत्रिष्टुभंगृत्समदोयइमा
चतुर्ऋचंप्रतीकोक्तम् ॥ ३ ॥ अपेतोध्यायः ॥ पित्र्यआदित्यस्यदेवा
नांवाद्यागायत्रीपरंयजुःसवितातेगायत्रीवायुःपुनातुचत्वारिलिंगोक्ता
नि ॥ सवितातेगायत्रीपरंमृत्योसंकसुकस्त्रिष्टुभंमृत्युदेवत्याऽंशवातो

ऽनष्टुब्बृहत्यौ वैश्वदेव्यावस्मन्वतीसुचीकस्त्रिष्टुभंवैश्वदेवीमपाघंलिंगो
क्तदेवतामनुष्टुभꣳशुनःशेपोदुःष्वप्ननाशनीमनड्वाहमानडुह्यनुष्टुबिमं
जीवेभ्यःसंकसुकोमृत्युदेवत्यां त्रिष्टुभमायुष्मानग्नआग्नेयींत्रिष्टुभंवै
श्वानसःपरीमेनुष्टुभमैंद्रींभारद्वाजःशिरिंबिठःक्रव्यादमाग्नींत्रिष्टुभंमाने
यींदमनोवहवपांजातवेदसींत्रिष्टुप्स्योनापृथिवीमेधातिथिःपार्थिवींगा
यत्रीमस्मात्त्वमाग्नेयींगायत्र्यानिरुक्ता ॥४॥ ऋचंवाचंपंचाध्यायींदध्य
ङाथर्वणोददर्शाग्निकाश्वमेधिकवर्ज्जमाद्योध्यायः ॥ शांत्यर्थौवैश्वदेव
आद्यानियजूꣳषियन्मेबार्हस्पत्यापंक्तिःकयात्वमैंद्र्यनिरुक्तागायत्रीं

द्वोविश्वस्यविराड्द्विपदाशन्नोद्वे अनुष्टुभावहानिद्विपदागायत्रीशन्नइन्द्राग्नीत्रिष्टुब्गायत्र्यावंत्याशीर्द्यौः शांतिर्यजूंषिनमस्तेअस्त्वनुष्टुभौतच्चक्षुःपुरउष्णिक्सौरी ॥ ५ ॥ आददेनारिरस्याभ्रिदैवतम् ॥ देवीद्यावापृथिव्यं देव्योवम्र्योवल्मीकवपेयत्यग्नेवराहविहतमिंद्रस्यौज आदाराः प्रैतुमखस्याश्वस्यर्ज्जैवेषमायदेवस्त्वार्चिरसि घर्मदेवत्यानियोघर्मस्सआदित्योय एषतपत्यनाधृष्टापुरस्तात्सप्तपार्थिवानियजमानाशीर्मधुप्राणदेवत्यानि गर्भोदेवानामवकाशामा माहिंसीरित्येतदंताघर्मदेवत्याधर्तादिवऊर्ध्वंबृहत्यपश्यंगोपांत्रिष्टुभं दीर्घतमा

हृदेत्वापरोष्णिकत्वष्टेमन्तःपत्न्याशीरहःकेतुनायजुषीघर्मदेवत्ये ॥
॥ ६ ॥ आददेदित्थैरज्जुः ॥ इडएहिगौर्यस्तेत्रिष्टुभंदीर्घंतमाइन्द्रा
श्विनावैश्वदेवानिसमुद्रायत्वावातनामानिस्वाहाघर्मायघर्मदेवत्योवि
श्वाआशाआश्विन्यनुष्टुब्द्विविधाघर्मदेवत्यमश्विनाघर्ममुष्णिगपातां
ककुबमेऽन्यस्मेस्वरः स्वाहापूष्णेसप्तलिंगोक्तदेवतानिस्वाहासंपयादेव
त्यंमधुहुतंघम्मोंभीमंगायत्री बृहत्यावनवसानेअतिशक्करी वाग्नेयीस
मस्तात्र्यवसानायातेघर्मक्षत्रस्य बृहतीचतुःस्रक्तिर्महाबृहतीघर्मैतद
नुष्टुबाचिक्रदत्परोष्णिग्यावती द्यावापृथिवीदधिघर्मोमयित्यत्पंक्तिर्य

जमानाशीः पयसोंरेतोगायत्र्यनवासानात्विषः संवृग्दधिघर्मौनुक्तंघर्मदैवतम् ॥ ७॥ स्वाहाप्राणेभ्योमांत्रवर्णिक्योदेवताः ॥ मनसः काममनुष्टुब्यजमानाशीः श्रीर्दैवताप्रजापतिःसंभ्रियमाणोयथाकालं प्रायश्चित्तदेवताः सविताप्रथमेहन्प्रत्यहंक्रमेणोग्रश्चमारुतीगायत्रीविमुखाख्योमन्त्रोग्नौविनियुक्तस्तस्मादाग्निकऽएवास्यऋषिः परमेष्ठीप्राजापत्योवाग्निर्ठंहृदयेनाश्वमेधिकानि त्रीणितन्त्रोक्तएव ऋषिर्लोमभ्यः स्वाहेति प्रायश्चित्ताहुतयो द्विचत्वारिंठंशत् ॥ ८ ॥ ईशावास्यमात्मदेवत्यआनुष्टुभोध्यायः ॥ अनेजदेकंत्रिष्टुप्सपरिजगतीवायु

रनिलंयजुषी ॐ ३ मितिपरमाक्षरस्य योगिनामालम्बभूतस्यपरस्यब्रह्मणः प्रणवाख्यस्यास्थूलादिगुणयुक्तस्यब्रह्मऋषिच्छंदोगायत्त्रंपरमात्मादेवताब्रह्मारंभेविरामेचयागहोमादिषु शांतिपुष्टिकर्मसुचान्येष्वपिकाम्यनैमित्तिकादिषुसर्वेषुविनियोगोस्यकृतोत्रिभिर्य्यजुर्भिरंते यज्ञान्योगी स्मारयत्यग्रेनयान्तनमस्कारोक्तिर्हिरण्मयेनादित्योपासनमो ३ मितिनामानिर्देशोब्रह्मणःखंब्रह्मेत्याकाशरूपमन्तेब्रह्मध्यायेत् ॥९॥ अथातश्छन्दोदेवता ॥ गायत्र्याअग्निरुष्णिहःसवितानुष्टुभःसोमोबृहत्याबृहस्पतिः पंक्तेर्वरुणस्त्रिष्टुभइन्द्रोजगत्याविश्वेदेवा विराजो

मित्रःस्वराजोमित्रः स्वराजोरुणोतिच्छन्दसः प्रजापतिर्वैच्छन्दसो वायुर्द्विपदायाः पुरुषएकपदायाब्रह्मासर्वांऋचआग्नेय्यः ससर्वाणियजूंषिवायव्यानिसर्वाणिसामानिसौराणिसर्वाणि ब्राह्मणानिच स्वाहाकारस्याग्निर्वषङ्कारस्यविश्वेदेवाः कर्मारंभेमंत्राणांदेवतावेदितव्याः संन्यस्यमनसिदेवतांततोहविर्हूयतेदेवतामविज्ञाययोजुहोतिदेवास्तस्यहविर्नजुषन्तेस्वाध्यायमपियोधीतेमंत्रदेवतज्ञः सोमुष्मिँल्लोकेदेवैरपीड्यतेतस्माच्चदेवतावेद्यामंत्रेमंत्रे प्रयत्नतोमंत्राणांदेवताज्ञानान्मंत्रार्थमधिगच्छतिमंत्रार्थज्ञानात्तु विधूतपाप्मानाकमभ्येतिनहिकश्चि

दविज्ञाययाथातथ्येनदेवताः श्रौतानां कर्मणां विप्रःस्मार्तानां चाऽनुतेफलम् ॥१०॥ अनादिष्टमध्वरादौ ॥ सर्वांतकर्मणिपरिभाषितंमन्त्रगणंवक्ष्यामः ॥ सर्वमाग्नेयंगायत्रंगौतमीयꣳसर्वꣳसावित्रमौष्णिहंभारद्वाजीयꣳसर्वꣳसौम्यमानुष्टुभमाथर्वणिकꣳसर्वं बार्हस्पत्यंबार्हतमांगिरसꣳ सर्ववारुणंपांक्तमालंबायनीयꣳ सर्वमैंद्रंत्रैष्टुभंयाज्ञवल्कीय ꣳ सर्वमादित्यदैवतंजागतंकौत्सम् ॥ ११ ॥ ज्योतिष्टोमेदीक्षाप्रभृति ॥ वक्ष्यामोदीक्षायां भृगुरग्नाविष्णुगायत्री प्रायणीयआंगिरसोदितिरुष्णिक्त्रयेविश्वामित्रः सोमोनुष्टुबातिथ्येवासिष्ठोविष्णुर्बृहतीप्रवर्ग्ये क

इयपआदित्यपंक्तिरुपसत्स्वात्रेयउपसद्देवतात्रिष्टुबग्नीषोमीयेगस्त्यो
ग्नीषोमौजगतीप्रायणीयेतिरात्रआग्निवेश्योहोरात्रेअतिजगतीचतुर्विं
ठंशत्यहेसौकरायणः संवत्सरः शक्कर्यभिप्लवेषडहेसौपर्णौर्द्धमासांमा
साश्चातिशक्करीपृष्ठ्येषडहेसायकायनऋतवोष्टिरभिजिति प्रियघृतो
ग्निरत्यष्टिः स्वरसामसुसरस्वत्यापोधृतिर्विषुवति रौहिणायनआदि
त्योतिधृतिर्विश्वजितिसौभरइंद्रःकृतिर्गौआयुषोबाष्कलिर्मित्रावरुणौ
प्रकृतिर्दशरात्रआचार्यौ विश्वेदेवाआकृतिर्द्वादशरात्रिकेपृष्ठ्ये षडहे
भाल्लवेयोदिशोविकृतिश्च्छन्दोमेषुशौल्वायनइमेलोकाःसंकृतिर्दशमे
हनिपराशरसंवत्सरोभिकृतिर्महाव्रतेशैलिनः प्रजापतिरुत्कृतिरुदय

नीयेतिरात्रेभौवायनोवायुश्छन्दाꣳसिसर्वाणि ॥ १२ ॥ ऋषिभिरुप
लक्षितंवाक्यम् ॥ ऋषयश्छंदोभिरुपलक्षितादेवतामंत्रवर्णादृग्यजुष
योर्विनियोगतश्चाविज्ञेयाः ॥ सर्वमेतच्छन्दोदैवतमार्षंचाविज्ञाययत्कि
ञ्चिज्जपहोमादिकरोतितस्यफलमश्नुते ब्रह्मयज्ञारंभेयथाविधिस्नात्वा
छन्दःपुरुषमेनोनिर्णोदनꣳशरीरं न्यसेत्तिर्यग्बिलश्चमसऊर्ध्वबुध्नस्त
स्याक्षिणीगोतमभरद्वाजौ श्रोत्रेविश्वामित्रजमदग्नी नासिकेवसिष्ठ
कश्यपौ वागत्रिर्गायत्रींछंदोग्निर्दैवताꣳशिरसिविन्यसेदेवमेवोष्णिहꣳ
सवितारं ग्रीवास्वनूकेबृहतीं बृहस्पतिंबाह्वोर्बृहद्रथन्तरे द्यावापृथिवी
मध्येत्रिष्टुभमिन्द्रꣳश्रोण्योर्जगतीमादित्यं मेढ्रेतिच्छंदसंप्रजापतिपा

यौयज्ञायज्ञियंवैश्वानरमूर्वौरनुष्टुभंविश्वान्देवानष्ठीवतोः पंक्तिंमरुतः पादयोर्द्विपदांविष्णुं प्राणेषुविच्छंदसंवायुन्यूनातिरिक्तेष्वङ्गेषुन्यूनाक्षरंछंदआपोदेवतेत्येवꣳसर्वांगेषुयोजयित्वावेदमयः संपद्यतेशापानुग्रहसमर्थोंभवतिब्राह्मंतेजश्चवर्द्धतेनकुताश्चिद्भयंविन्दतऋङ्मयोयजुर्मयः साममयस्तेजोमयो ब्रह्ममयोमृतमयः संभूयब्रह्मैवाभ्येतितस्मादेतन्नाब्रह्मचारिणेनातपस्विनेनासंवत्सरोषितायनाप्रवक्त्रेनुब्रूयादेनेनाधीतेनचांद्रायणाब्दफलमवाप्नोत्यनेनचसम्यग्ज्ञानेनब्रह्मणःसायुज्यꣳसलोकतामाप्नोत्याप्नोति ॥ १३ ॥ इतिसर्वानुक्रमणीयेचतुर्थोऽध्यायः ॥ ४ ॥ ॥ अथच्छंदाꣳसिगायत्र्युष्णिगनुष्टुब्बृहतीपंक्तिंत्रिष्टुब्ज

गत्यातिजगतीशक्वर्यतिशक्वर्यष्ट्यत्यष्टिधृत्यातिधृतयःकृतिप्रकृत्याकृतिविकृतिसंकृत्यभिकृत्युत्कृतयश्चतुर्विंशत्यक्षरादीनिचतुरुत्तराण्यूनाधिकेनैकेननिचृद्भुरिजौ द्वाभ्यांविराट्स्वराजौ पादपूरणार्थंतु क्षप्रसंयोगैकाक्षरीभावान्व्यूहेदाद्येतुसप्तवर्गैपादविशेषात्संज्ञाविशेषास्ताननुक्रामंत एवोदाहरिष्यामो विराड्रूपाविराट्स्थानाश्चबहूनामपित्रिष्टुभ एवेत्युद्देशस्तत्रदशैकादशद्वादशाक्षराणांवैराजत्रैष्टुभजागताइति संज्ञाअनादेशेष्टाक्षराः पादाश्चतुष्पदाश्चर्चः ॥ १ ॥ प्रथमं छन्दस्त्रिपदागायत्री ॥ पंचकाश्चत्वारःषट्कश्चैकश्चतुर्थश्चतुष्कोवापदपंक्तिःषट्सप्तैकादशा उष्णिग्गर्भास्त्रयः सप्तकाः पादनिचृन्मध्यमः षट्कश्चेदतिनिचृ

द्दशकश्चेद्यवमध्या यस्यास्तुषट्सप्तकाष्टकाः सावर्द्धमाना विपरीता
प्रतिष्ठा द्वौषटौसप्तकश्चेतिह्रसीयसी ॥ २ ॥ द्वितीयमुष्णिक्त्रिप
दांत्योद्वादशकआद्यश्चेत्पुरउष्णिङ्मध्यमश्चेत्ककुप् त्रैष्टुभजागतचतु
ष्काःककुम्न्यंकुशिरैकादशिनोः परः षट्कस्तनुशिरामध्येचेत्पिपीलिक
मध्याद्यःपंचकस्त्रयोष्टकाअनुष्टुब्गर्भाचतुःसप्तकोष्णिगेव ॥३॥ तृती
यमनुष्टुप्चतुष्पदाथपंचपंचकाः षट्कश्चैकोमहापदपंक्तिर्जागतावष्टक
श्चकृतिर्मध्येचेदष्टकः पिपीलिकमध्यानवकयोर्मध्येजागतःकाविराण्न
ववैराजत्रयोदृशैर्नष्टरूपादेकास्त्रयोविराडेकादशकावा ॥ ४ ॥ चतुर्थं
बृहती तृतीयाद्वादशकआद्यश्चेत्पुरस्ताद्बृहतीद्वितीयश्चेन्न्यंकुसारिण्य

९५९२६ ९५९२५

रोबृहतीस्कंधोग्रीवीवांत्यश्चेदुपरिष्टाद्बृहत्याष्टिनोर्मध्येदशकौविष्टार
बृहतीत्रिजागतोर्द्ध्वबृहती त्रयोदशिनोर्मध्येष्टकःपिपीलिकमध्यानव
काष्टकैकादशाष्टिनोविषमपदाचतुर्नवकाबृहत्येव ॥ ५ ॥ पंचमंपंक्तिः
पंचपदाऽथचतुष्पदाविराट्दशकाअयुजौजागतौसतोबृहतीयुजौचेद्वि
परीताद्यौचेत्प्रस्तारपंक्तिरंत्यौचेदास्तारपंक्तिराद्यांत्यौचेत्संस्तारप
ङ्क्तिर्मध्यमौचेद्विष्टारपंक्तिः ॥ ६ ॥ षष्ठंत्रिष्टुप्त्रैष्टुभपदाद्वौतुजाग
तौयस्याःसाजागतेजगतीत्रैष्टुभेत्रिष्टुब्वैराजौजागतौचाऽभिसारिणी
नवकौवैराजास्त्रिष्टुभश्चद्वौवावैराजौनवकस्त्रैष्टुभश्चविराट्स्थानैकादशि
नस्त्रयोष्टकश्चविराट्रूपाद्वादशिनस्त्रयोष्टकश्चज्योतिष्मतीयतोष्टकस्त

तोज्योतिश्चत्वारोष्टकाजागतश्चमहाबृहतीमध्येजागतश्चेद्यवमध्याद्यौदशकावष्टकास्त्रयःपंक्त्युत्तराविराट्पूर्वावा ॥७॥ सप्तमजगतीजागतपदाष्टिनस्त्रयः स्वौचद्धौमहासतोबृहत्यष्टकौसप्तकःषट्कोदशकोनवकश्चषडष्टकावाम्महापंक्तिर्माध्यंदिनीयेवाजसनेयके सर्वानुक्रमणिकैषाकृतिर्भगवतः कात्यायनस्यैषाकृतिर्भगवतः कात्यायनस्य ॥ ८ ॥

इति सर्वानुक्रमणिकायां पंचमोऽध्यायः ॥ ५ ॥ कंडिकासंख्या ॥ १२४ ॥

इदं पुस्तकं क्षेमराज-श्रीकृष्णदासश्रेष्ठिना स्वकीये “श्रीवेङ्कटेश्वर” (स्टीम्) यन्त्रालये मुद्रयित्वा प्रकाशितम्

इति शुक्लयजुर्वेदमाध्यंदिनीयसंहितासमाप्ता